731

731

पदवाक्यरत्नाकरः (गोकुलनाथ शर्मा)

		Pada-vākya-Ratnākara	Title
		Gokulnātha Sharma	Author
			Editor
		Saka 1715	Year, Vols.
			Publisher
731			Remarks

731

|पदवाक्यरत्नाकर|

श्रीगणेशायनमः श्रीनृसिंहायनमः ॥ नान्यसाधारणोविश्वविषयोयोविभोर्गुणः ॥ तस्यैषायानि
१ रखिलप्रपंचस्यप्रकाश्यते ॥ विभोः संयोगेनमूर्त्तद्रव्यसामान्यमनादिनिधनेनचैतन्येनसकलम
पिवस्तुव्याप्नुवताभगवताभवस्ययोगुणोनित्यसर्वविषयत्वानुबंधित्वादिनाजीवादिगुणव्यावृत्तेनधर्मेण
लोकोत्तरोविषयनयाविश्वमभिव्याप्यवर्त्ततेतस्यैदंताप्रतीतिहेतुस्ययत्नस्यजन्यजातजननानुकूलंसामर्थ्यं॥
॥अथच॥यः शब्दत्वेनानुगतीकृतः सन्नेकद्रव्यव्यवहिश्यमाणोगगनेतरत्रसमवायेनावर्त्तमानोजगति
विषयेविवर्त्तमानव्यापारानवच्छिन्नपरिमाणस्याकाशस्यवर्णलक्षणोगुणस्तस्यसर्वधार्मबोधायप्रभ
वस्यभिधानामवृत्तिरिति॥विश्वेश्वरस्यप्रकृतिरिवाकाशस्यशब्दोपितत्वेनाज्ञातः संसारान्मोचयतीतिप्र
योजनसंबंधध्वनिः॥ ननुघटादिवर्णानीप्रपंचकाशनसामर्थ्येनप्रत्येकपरिसमाप्तं॥यद्यश्रवणमा राम
त्रेणकलशावगमप्रसंगात्॥नापि[illegible]समुदायव्यासक्तं॥ क्षणाद्वयमात्रप्राणनस्यतेनपुरुषेणोच्चारित १

स्यघकारस्यतत्पुरुषेणोच्चारयिष्यमाणेनटकारेणसहयोगपद्येनोत्पत्तरसंभवात्॥विभिन्नपुरुषे
णोच्चारितघकारटकारव्यतिरेकेणार्थप्रत्यायनाभावाच्च॥नचैकपुरुषोच्चरितयोरेवघकारटकारयोरुप
त्पत्तियौगपद्यमव्यवधानेनपौर्वापर्यंवासमुदितत्वमित्यपिसंभवति॥तथाहि॥प्रथमंस्वतःपुरुषार्थ
तावच्छेदकसुखत्वदुःखाभावत्वादिविशेषितसुखादिज्ञानात्॥स्वस्यसुखेदुःखाभावेवातत्साधनताप्रति
संधानात्॥परस्परवाक्यार्थबुद्धौतत्कारणत्वाकलनात्॥शब्देतदुपायत्वप्रत्ययात्कंठतालुसंयोगेवक्तुरिष्ट
ततश्चेष्टाकंठतालुसंयोगसाधनंमदीयेदानींतत्कृतिसाध्याचेतिप्रतिसंधानमथमदीयेदानींतनकृति न
साध्यायाकंठताल्वसंयोगसाधनस्यचेष्टायाःसमवायीकंठइतिकंठांशेलौकिकमुपनीतंचेष्टाद्यंशेपुनरलौ
किकंत्वाचप्रत्यक्षमुत्पद्यते॥अंतर्भागावच्छिन्नत्वचरावृत्तिःशारीरावायवयाहकत्वादतएवांतर्नोप्रमाणंलब्धप्रसरो
नोदनादिगोचराःप्रयत्नादुत्पद्येत॥तेनेष्टसाधनत्वेचेष्टायामवगाहमानोपादानस्यकंठस्याचप्रत्यक्षेणचेष्टा,

प०वा०र० चिकीर्षाजनयित्वा कंठावच्छेदेन कंठोपादानिका चेष्टासाधिका प्रकृतिर्जन्यते ॥ इच्छसाधनुसमवा
२ द्वा यित्तयोपादानप्रसक्तस्यतदुपानप्रवृत्तौजनकत्वात ॥ शरीरावयववृत्तसवच्छेदकत्तासंबंधेनचेष्टासाध्य
कप्रवृत्तौ चेष्टोपादानत्वेनोवयवत्त्वाच्चस्यविशिष्यकारणत्वाच्चपरशरीरमिष्टसाधनंचेष्टादित्यवंबा
त्यत्वाच्चसत्वेपिनपरशरीरावच्छेदेनप्रवृत्तिः ॥ अवच्छेदकत्तयातदात्मीयविशेषगुणोतदात्मीयाद्दृष्टस्या
वच्छेदकत्तासंसर्गेणकारणत्वात ॥ उत्पद्यतेचपरशरीरोपादानिकाचेष्टासाधिकाप्रवृत्तिः ॥ निजमहाश
रीरेनत्ववच्छेदकत्तयाशरीरावयवे ॥ प्रवृत्तुचोपादानत्वविशिष्टावच्छेदकत्तेवनिरुक्तत्वाचजन्यतावच्छे
दकः संबंधस्तेनमहाशरीरावच्छेदनोसूतनादिचेष्टासाध्यकप्रयत्नोत्यभ्युपगमेपिनक्षतिः ॥ ॥ यत्तुकंठा स
द्यंतरवयवावगाहिनामंधकारेवक्रीगुलिः प्रविरलांगुलिरपहस्तइत्यादिबाह्यावगाहिनाचप्रत्यक्षाणांनसा राम
चत्वं ॥ तदूत्तपरिमाणमहत्वादेरपिग्रहणप्रसंगादपित्वात्मत्वेनकंठहस्ताद्यवगाहिमानसमेव ॥ योग्यधर्मे २

प्रसंगाच्च ॥ तयाकंठोपादानिकयाकंठावच्छिन्नयावृत्त्याकंठसमवेताचेष्टाजन्यतेउपादानविषयत्वावच्छेदत्वो = २
पुरस्कारेणायोग्यानामपीद्रिययोग्यत्वाभ्युपगमात ॥ अत्तएवदधिधवलमाकाशमितिनायनोनिश्चय
इति ॥ तन्न ॥ ॥ ममकंठइतिप्रतीत्यात्मत्वेनकंठाग्रहत्तइत्यस्यानुभवबाधितत्वात ॥ वक्रांगुलिहस्तइत्या
दौवक्रत्वांगुलित्वादीनांमग्रहंभयसंबंधेनवृत्तेः ममवायेनचेष्टाप्रतिकारणत्वात ॥ परशरीरेचेष्टासाध्यक
प्रवृत्त्योपादानत्वेनाविषयपरशरीरेसावच्छेदकेमहतिशरीरेचचेष्टायाश्चजननात ॥ कंठचेष्टयाचवि
भागपूर्वसंयोगनाशोजनयित्वातालुनाकंठस्यसंयोगोजन्यते ॥ तेनस्वाश्रयावच्छिन्नत्वसंसर्गेणाकाश
प्रत्यासीदत्ता ॥ घकारादिःशब्दोनिजाश्रयावच्छेदेनेचोत्पद्यते ॥ ताल्वादिप्रेरितोवायुश्चयथायथंकदंब
केसरन्यायेनवीचीतरंगन्यायेनवाशब्दांतरंबाह्यदेशावच्छेदेनोत्पादयन्प्रसारयतीतिशब्दासत्तिप्र
क्रिया ॥ तथाचघप्रयोजकस्येचेष्टागोचरप्रयत्नकाले ॥ सर्वेषामेवज्ञानानांनष्टत्वात्तदनंतरांसुखादि
ज्ञानतदिच्छाक्रमेणाटकारादिप्रयोजकचेष्टागोचरप्रयत्नोत्पत्तियावद्याचंतःक्षणास्तावत्क्षणांतरेणैव

प० बा०र० घकारोऽसत्तेरनंतरं टकारोऽस्तीति रीतिकयौगपद्यमव्यवधानं चेत्तत्रिदुच्यते॥ चतुर्भिः पंचभिर्वापिप्रा
३ यणांतरितः क्षणैः॥ पूर्ववर्णोऽसरो वर्णः पदत्वं प्रतिपद्यते॥ सुखेच्छानंतरं दुःखसाधनवाक्यार्थबुद्धिरिति
स्मरणेन जनितानुबोधयिषा सुखमपि विषयीकरोति॥ उपायेच्छायाः फलविषयत्वनियमात्॥ सुखसाधनबु
द्धिरितिज्ञानस्य सुखेच्छायाश्च सुखमिष्टफलत्वाख्याविषयतानिरूपितबुद्धिनिष्ठोद्देश्यताख्याविषयता
केच्छात्वावच्छिन्नं प्रत्येव जनकत्वात्॥ अन्यथा दुःखध्वंसजनकतातानध्वंसदुःखध्वंसेच्छायां जनितायां बु छ
द्धीच्छायां व्यभिचारप्रसंगात्॥ फलत्वाख्याविषयतानुसुखसाधनमिच्छामीत्यनुभवसिद्धा॥ भवतु सुखसा
धनताज्ञानस्यापि सुखज्ञानत्वात् ज्ञानितेच्छा सुखतदुपायोभयसमूहालंबनस्वरूपा॥ एवं वर्णगोचरमिष्ट
साधनतास्मरणमपि पूर्वगृहीततया वदिष्टसाधनतासमूहालंबनस्वरूपमिति॥ तज्जनितापीच्छा राम
सुखं बुद्धिं वर्णांश्चावगाहते। वर्णास्तु विवक्षितायावेत्तरावयत घोत्तरत्वादिना तादृग्इच्छाविषयाः ततोनि ३

रुक्ततया वदिष्टसाधनतासमूहालंबनस्वरूपं॥ प्रत्येकं तावद्वर्णसाधनतया तत्तत्स्थानचेष्टाज्ञानमवगा
हमानः स्वकीयकृतिसाध्यतया प्रथमवर्णजनकचेष्टाविषयकं स्मरणीभयपूर्वगृहीततया वदिष्टविषयि
णीचेष्टास्विच्छा ततः प्रथमवर्णानुकूलचेष्टायामिदानींतनं स्वकीयकृतिसाध्यत्वेष्टसाध्यत्वयोर्मानसं
जायमानमनुभूततच्चरणान्यखिलानीष्टतत्साधनानि सुखबुद्धिवर्णचेष्टांतराणि गोचरीकरोत्युपनायक
सत्वात्॥ इदानींकालस्तु मनोयोग्यत्वानादिस्वरूपो लौकिकादपि सन्निकर्षान्मनसा गृहीतुं शक्यः प
कृत्यधिकरणत्वलवानवगाहित्तोपि स्वाधिकरणकालगोचरस्थकर्तव्यताज्ञानस्य प्रवर्तकत्वापगमात्॥
भवतु वा पूर्वोक्तमिष्टसाधनतास्वकीयकृतिसाध्यत्वयोः स्मरणमेककालत्वेन तादृग्प्येपावेदानींका
लविषयकं तदानींतनं एव कृत्यधिकरणकालः कर्तव्यताघटककृतिविशेषणतया मनसा गृह्यते॥ अ
त एव वर्तमानस्य ज्ञानस्य मनःसन्निकृष्टस्यापि पूर्वागृहीतत्वेन कृतिविशेषणतया मानसं भानमुपपन्न

प०वा०र० मिलिसमाहित्तं॥संभवतिच॥कस्याधिकरणकालस्यत्ताद्रूप्येणास्मरणमनवच्छिन्नप्रकारताक
४ त्वेनानुभवस्यस्मरणंप्रतिकारणत्वाभावात्॥कालिकाधिकरणतावच्छेदकधर्मचानिस्यनुभवे
नविषयीकृतानांकालवर्त्तीदंत्तानामुद्बोधकविशेषवशादनवच्छिन्नयापिप्रकारतयास्मरणेनग्रहन
ग्रहणेबाधकाभावात्॥तेनचप्रथमवर्णानुकूलचेष्टायामिष्टसाधनत्वस्वकीयेदानींतनकृतिसाध्य
त्ववर्णांतरतदनुकूलचेष्टादौचेष्टासाधनत्तामात्रमवगाहमानेनमानसेनप्रथमवर्णचिकीर्षान्यत्रचे
ष्टमात्रंजन्यते॥जन्यतांवासंस्कारोद्बोधकविशेषप्रभवेनकालिकाधिकरणतावच्छेदकधर्मवत्का
लिकस्वकीयकृतिसाध्यात्वानुभवसमुत्थेनायमुषितकालिकाधिकरणतावच्छेदकस्वरूपतत्त्वोपल क
क्षणधर्मेणप्रथमवर्णानुकूलचेष्टायामिदानींतनस्वकीयकृतिसाध्यत्वमन्यत्रचेष्टासाधनतामात्रा राम
वगाहमानेनस्मरणेनैवनिरुक्तचिकीर्षाजनितायांतुनिरुक्तमानसेनकथितस्मरणेनवासकलेष्टप ४

रंपरावगाहिन्यांप्रथमवर्णचेष्टाचिकीर्षायांतादृशकृतिसाध्यत्वेष्टप्रथमवर्णानुकूलचेष्टावान्कं०
ठस्योपादानप्रसक्तं॥त्वाचमात्रचद्वितीयादिवर्णचेष्टानिष्टेष्टसाधनत्वादिकमप्युपनीतंविषयः॥इष्टसा
धनद्वितीयवर्णजनकचेष्टादीनांपूर्वकालीनत्वादिसंसर्गेणप्रथमवर्णचेष्टायांविशेषणतयाभानसंभवात्।
ततःउपादीनीस्तत्कंठावच्छेदेनप्रथमेवर्णानुकूलचेष्टासाध्यकःप्रयत्नः॥तज्जनितचेष्टासतिकालेतुद्विती
यादिवर्णानुकूलचेष्टादिष्विच्छा॥प्रथमचिकीर्षास्वरूपफलेसमानकालीनस्योपादानप्रसक्षात्मकस्येष्टसाध
नताज्ञानस्यपूर्वसत्वादतएवफलेच्छानस्वतउपायेच्छाजनिका॥किंत्विष्टसाधनताज्ञानोपलक्षणीभूयज
नकतावच्छेदकेतिसंप्रदायः॥ततःप्रथमचेष्टाजनितविभागकालेमदीयेदानींतनकृतिसाध्याद्वितीयवर्ण
जनकचेष्टामदिष्टसाधनमित्याकारकमखिलानांपरंपराणामग्रिमचेष्टानांचेष्टासाधनतावगाहिस्मरण म
मथचेष्टाजनितपूर्वदेशसंयोगनाशकालेद्वितीयवर्णचेष्टाचिकीर्षासकलेष्टसाधनतावगाहिनीततः

क॰वा॰र॰ प्रथमचेष्टाजनितोत्तरसंयोगदशायांद्वितीयवर्णचेष्टोपादानस्यस्थानस्याचप्रत्यक्षमुपनीतप्रथमवर्णे
५ तदनुकूलेचेष्टेतरयावत्साधनविषयकप्रथमवर्णोत्पत्तिकालेद्वितीयवर्णानुकूलसाध्यास्तदुपादानस्था
नीतरावच्छेदेनप्रयत्नस्तत्स्थानेचेष्टाविभागपूर्वदेशसंयोगनाशोत्तरदेशसंयोगोत्पत्तिलक्षणाचक्रमंतराव्यतिरि
च्यद्वितीयशब्दस्योत्पत्तिरेवमुत्तरोत्तरेषामपिवर्णानां॥ यदिचस्मरणेनचिकीर्षाजनकमपितन्मूलकंमानसंतदपि
चेदं लक्षणशब्दयोरंतराकालेपतितंप्रायिकं॥ अतःक्वचिदधिकविलंबेपिनक्षतिः। इतरविलंबितंवावदतीत्यनुत्त
वस्यविश्वजनीनत्वात्॥ श्रोतात्तुघकारोत्पत्तेरनंतरंजातिव्यक्तिसाक्षात्कृत्यघत्वेनघकारविकल्पादनंतरंघवि
शेषितंध्वंसंसाक्षात्कुर्वंति॥ स्मरतिचटकारोत्पत्तिकालेतत्स्मरणोपनीतघकारध्वंसविशेषितंटकारंसाक्षात्कुरुते॥ र
प्रसत्तिचघध्वंसवत्॥ टत्वावच्छेदेनकलशारिशांत्विमितिसुराकापदप्रवृत्तिरिति॥ घरहारादिपदप्रत्यक्षेणतुघध्वं राम
सवत्वंरेफएवप्रतीयते॥ ननुघकार॥ यदितुपूर्वोपनमवशात्प्रतीयतेतदाघटप्रत्यक्षकार्याणिजायंतएव॥ अत ५

एवचित्रकाव्यादौव्यवहितान्यक्षराणियोजयित्वानर्थस्मरं।तीतिकेचित्॥ ॥नव्यास्तु॥ ज्ञानयोरवैयोगपद्यंसिद्धं
तविरुद्धं॥ नतुयोग्यात्मविशेषगुणसामान्यस्य॥ तथाचघकारजनकचेष्टाचेष्टाचिकीर्षाकालेटकारजनकचेष्टा
पामिष्टसाधनत्वमदयिदानींतनकृतिसाध्यत्वमूर्धादिस्था नेतुतादृशचेष्टासमवायित्वमवगाहमानत्वान
घ मुपादानप्रत्यक्षं॥ पूर्वंतेषामुपस्थितत्वादथप्रौभकृत्युत्पत्तिकालेद्वितीयचिकीर्षातदनंतरंद्वितीयाकृतिरिति
कृत्योरव्यवधानवशात्संभवत्येकवर्णावच्छेदेनाव्यवधानेनघकारटकारयोरुत्पत्तिः॥ मतिसंधीयतेचघविकल्प
विषये।टकारऽव्यवहितोत्तरत्वस्वरूपंघवैशिष्ट्यं॥ तत्त्वस्वकालीनप्रागभावप्रतियोगित्वंस्वावच्छेदकावच्छेद्यत्वं
कालिकविशेषणताचैत्यतत्रितयस्वरूपं॥ कालमुद्र्यास्वस्वध्वंसोत्पत्त्याधिकरणत्वेसतिस्वावच्छेदकावच्छि
न्नत्वंवा॥ तेनघकाराच्चिरांतरितस्यघकारस्याव्यवहितपूर्वकालउत्पत्तिकालेवोत्पन्नस्यघकारानवच्छेद
ककर्णावच्छिन्नस्यचटस्यव्युदासः॥ यदिचैत्रीयघकाराव्यवधानेनैकस्मिन्नेवक्षणेसिसमुत्पन्नोमैत्रीय

प॰वा॰र॰ घकारोपिन्यावर्त्तनीयः॥ तदेकपुरुषप्रयोज्यतावच्छेदिकाघलटत्वव्याप्यत्वात् यद्वघत्वस्यानेननिवेशनीयाः॥ एवं
६ चानिरुक्तव्यवहितोत्तरसंसर्गघाविशिष्टटत्वमेवघटपदत्वव्यवहितोच्चरितत्वक्रमादेवपदार्थप्रतीतिसंधाने॥ ननुतत्स्मु
रोधेन॥ बहुक्षणमव्यवधानंप्रकृतेप्रवेशनीयंगौरवादितिप्राहुः॥ ननुप्रतीतिपर्यन्तामुपनीतपूर्ववर्णध्वंसेन
चाविशिष्टउत्तरोवर्णःपदत्वं॥ तथापिपदस्यरूपसदेवार्थस्यस्मारकमस्तिप्रसंगादतःपदज्ञानमेवतत्पेतिवक्तव्यं॥
तच्चानुपपन्नं॥ व्यभिचारविषयकज्ञानेनस्मरणाजननादितिचेदुच्यते॥ पूर्वानुभूतस्यास्संस्कारशेषयास्वार्थगोचर॥
ज्ञान्यानास्मृतिःसाद्भमुद्बोधकमपेक्ष्यन्ते॥ आसीत्पूर्वविषयगवादौगौरस्त्येवमाकारकोऽनुभवोगविव्यवहारादिना
गोपदसंबंधग्रहश्च॥ तस्यचेदानीमविद्यमानस्यापिगवानुभवस्यव्यापारोभावनानामस्मरणोपधानेप्रभवति॥ न
त्सहकारितयाऽनुपदाज्ञानमुद्बोधकंस्मृत्याजनकत्वेनापेक्ष्यते॥ पधर्मावच्छिन्नसंबंधायधर्मविशिष्टपूर्वंगृहीतःस्त नराम
धर्मावच्छिन्नगोचरसंस्कारेत्तधर्मावच्छिन्नदर्शनस्यनियतोद्बोधकत्वात्॥ दृष्टाहिगजेहस्तिपकसंबंधाहितसंस्का ६

रसहकृतेनहस्तिपकदर्शनेनगजस्मृतिः॥ यद्यपिस्मरणासामान्येसंस्कारोद्बोधकानिनानुगानि॥ तथाहि॥ गोप
दज्ञानविशिष्टगोस्मरणत्वावच्छिन्नंप्रतिगोपदज्ञानत्वेनसंभवत्येवयावत्स्मृतिविन्यायायावदनुगताकारणता॥
अगृहीतपदपदार्थसंगतिकानांपदज्ञानादर्थस्मरणादनुदयात्॥ गोपदसंगतेमनुभवजनितसंस्कारोपि
पदज्ञानसहकारित्वेनापेक्ष्यते॥ तस्यचरुक्षगोत्वप्रकारकस्मरणोपधायकत्वंनक्लृप्तकारणतानिर्वाह्यतिगो
पदसंगतिसंस्काराव्यवहितोत्पन्नरुक्षगोस्मरणंप्रतितादृशसंस्कारत्वेनपृथगेवकार्यकारणभावःकल्प
ते॥ तेनोद्बोधकान्तरजनितगोस्मरणेनव्यभिचारः॥ ॥ शाब्दिकास्तु॥ गोपदज्ञानस्यगोपदसंगत
गोस्मरणत्वमेवजन्यतावच्छेदकंतदवच्छिन्नेचगोगोपदसंगतेतिसंस्कारस्यकॢप्तएवकार्यकारणभावः॥
अतएवपदपदार्थोभयविषयकमेवप्रतिसंधानंवाक्यार्थबोधश्चोपपद्यतइतिप्राहुः॥ स्यादेतत्॥ यदि
पदस्यार्थेनसहसंगतिःस्यात्॥ नत्वेवं॥ नहिपदमर्थेनसहसंयोगसमवायघटितसामानाधिकरण्य

प॰ वा॰ र॰ बाल्यादिभिः संगतं ॥ अन्यागिवासिशब्देर्मुखस्य पूर्णप्रदाहपाटनापत्तेः ॥ नचाभिधानामार्थशब्दस्य
७ संगतिः ॥ सप्तस्य पदार्थेभ्यो ऽतिरिच्यत इतिवाच्यं ॥ मानाभावात् ॥ पारिभाषिकटियुसादिशब्दानाम
गुत्त्यत्तिनयानामप्यर्थेनसहातिरिक्तसंगतिसिद्धिप्रसंगात् ॥ ॥ यत्तुगोबुधिजनकत्वं वगोपदस्य
संगतिः ॥ गोत्वानशाक्यत्वमेव गोपदार्थेष्युपचर्यत्ते ॥ तद्बुधिजकत्तयागृहीतंपदमर्थंस्मारयतिधूम
इववन्हिं ॥ तथाविधसंगतेरेव संस्कारणपदज्ञानसहकृतेनजनितं पदार्थस्मरणमनुभवप्रतिहेतुः ॥
॥ यदाहुरभियुक्ताः ॥ इंद्रियाणांस्वविषयेष्वनादिर्योग्यतायथा ॥ अनादिरर्थैशब्दानां संबंधोयोग्य
तातथेति ॥ सान्वबुधिजनकयोग्यताभाषायामसत्यापिआधुनिकैरारोपितागव्यादिशब्दैःस्यो बोधंजन
यति ॥ ॥ व्युसन्नास्तुगाव्यादिशब्दैर्गवादिशब्दमनुमायस्मरत्वानुतितएवगवादिकंप्रतियंति ॥ राम
यदाहहरिः ॥ तेसाधुष्वनुमानेनप्रत्ययोत्पतिहेतवः ॥ तादात्म्याभुपगम्यैवशब्दार्थस्यप्रकाशकाः ॥ न ७

शिष्टैरनुमन्यंतेपर्यायाइवसाधवः ॥ नयत्तः स्मृतिशास्त्रेणातस्मात्साक्षादवाचकाः ॥ अम्बाम्बेतिय
याबालः । शिक्षमाणः प्रभाषते ॥ अव्यक्तंतद्विदांतत्रव्यक्तेभवतिनिर्णयः ॥ एवंसाधौप्रयोक्तव्येयोप
भ्रंशः प्रयुज्यते ॥ प्रभाषते ॥ तेनसाधुव्यवहितः कश्चिदर्थोभिधीयतइति ॥ भवतुवापभ्रंशेष्वपि
वापकत्वलक्षणंवाचकत्वं ॥ व्याकरणनतुदेवीनांवाचीकतत्पकारकत्वलक्षणंसाधुत्वमेवव्याक्रियते ॥ ना
पभ्रंशितवैइतिश्रुत्यापभ्रंशानांपरिसंख्यानात् ॥ तन्नं ॥ ॥ पारिभाषिकशब्दैनतदर्थबुधिजनकत्व
मगृहीतापिसंकेतमात्रज्ञानादन्वयमतेरूपपतेः ॥ शक्तिसंकेतज्ञानयोर्वैकाल्मिकजनकत्वेगौरवादि
ति ॥ उच्यते ॥ तादृशार्थावगाहित्वात्सदप्रभवत्वयोरेकत्रबुधौसंकेतः शब्दस्यार्थेनसंगतिः ॥ गवादि
जन्यत्वगोत्वादिविशिष्टविषयकत्वोभयमेकस्यां बुधौएकत्रद्वयन्यायेनविशिष्टवैशिष्ट्यरीत्यावगाहम
नोगोपदाऊत्वविशिष्टविषयिका बुधिर्जायतांगोत्वप्रकारत्वानिरूपितविशेष्यतारूपा ॥ बुधिविशेष
च

प॰ शा॰ र॰ णत्वेन संकेतविषयः ॥ अत एव गोत्वोपलक्षितगोविषयकबुद्धित्वावच्छेदेन द्रव्यपदजन्यत्वावगाह्याधु
निकसंकेतो न गोत्वेन गोबुद्धावुपयोगी । न वा पारमार्थिकः । द्रव्यपदस्य गोत्वविशिष्टे शक्यत्वं किंतु द्रव्यत्व
८ विशिष्टे ॥ न धर्मविशिष्टविषयकबुद्धित्वावच्छेदेन तत्पदजन्यत्वावगाहिनः संकेतस्य तद्धर्मविशिष्टत
त्पदयोः संसर्गस्वरूपं शक्तिमिति श्रुसंतः ॥ अत एव वाहिकादौ सत्यपि गोपदवाच्यत्वगोपदेऽभगवत्संकेतान
शक्तिराजानिकप्रयोगस्य कोशव्याकरणादेश्च शक्तिग्राहकस्याभावेन वाहिकत्वविशिष्टे गोसदृशविशिष्टे
वा संकेतान गोपदसंबंधइत्यवधारणात् ॥ भगवदिच्छायाः सर्वविषयत्वविषयत्वाभिरेवासंतो वाहिकविषयकबुद्धि
त्वावच्छेदेनाबाधितत्स्यापि गोपदजन्यत्वस्यावगाहित्वेप्रमाणाभावात् ॥ किं च स्मरणे गोपस्य तज्ज्ञानस्य याजकत्वेपि वाहिका
नुभवत्वशाब्दत्वावच्छेदेन तज्जन्यत्वं चाबाधितमेव ॥ लाक्षणिकस्याननुभावकत्वात् ॥ तदनुभवत्वाद्यवच्छेदेन तत्पदजन्यत्व राम
वगाहि संकेत एव च तत्पदशक्तिरित्यपि वदंति ॥ नन्वेवं [illegible]मपि जातिविशिष्टविषयकबुद्धौ गोपदजन्यत्वावगाहिसंकेता ८
पि गाविगोपदस्य संगतिः स्यात् ॥ न चानवच्छिन्नप्रकारतानिरूपिततादृशधर्मविशिष्टत्वस्ति यत्संज्ञे

विशेष्यताकबुद्ध्यवगाहि संकेत एव पदसंगतिरिति वाच्यं ॥ गोलोमवल्लांगूलत्वावच्छिन्नप्रकारताकपशुविशेष्य
ताकबुद्ध्यवगाहितः संकेतस्य पशुपदसंगतित्वविरहप्रसंगात् ॥ किं च शब्दाश्रयबुद्धिविषयत्वाद्युपलक्षितधर्मि
विषयकबुद्ध्यवगाहि संकेतः कथमनवच्छिन्ने गगनपर्वतत्वादिविशिष्टे वाय्वोपाद्यादिपदस्य तदादेर्वा संगतिः ॥
कथं वैकत्वगोत्वोभयविशिष्टबुद्धौ गोपदजन्यत्वसंकेतः । शुद्धगोत्वावच्छिन्ने गोपदस्य न संगतिः ॥ गौरिति
श्चैकवचनसत्कृते न गोपदेन तदुभयप्रकारकबुद्धिजननात् ॥ नदितर[illegible]प्रकारत्वानिरूपकत्वप्रकारतानि
रूपकतद्विशिष्टविषयताबुद्ध्येदृश्यक एव संकेतः ॥ पेशुद्धं चितद्विशिष्टपदसंगतिरिति चेत् । शुद्धपद्मत्वा
वच्छिन्ने पंकजपदसंगतेरनुपपत्तेः ॥ पंकजपदजन्यशाब्दबोधविशेष्यतायाः पद्मत्वेतरपंकजनिकर्तृत्वप्र
कारतानिरूपकत्वनियमात् ॥ शुद्धपद्मत्वावच्छिन्नस्मरणावगाहि संकेत एव पंकजपदसंगतिरिति चेदेवम
पि वाहीकत्वेन वाहीकं गोत्वेन गां च स्मारयतु गोपदमिति संकेतो गोपदसंगतिः स्यात् ॥ बुद्धित्वसंकेतादे

स्यतायाः तदितरधर्मप्रकारकबुद्धित्वानवच्छिन्नत्वमपि प्रवेशनीयमिति चेत्॥ सूर्यत्वेन सूर्ये चंद्रत्वेन चंद्रं बो
धयतु। पुष्पवंतपदमिति संकेतस्य कुत्रापि कस्याप्यसंगतित्वप्रसंगादिति मेवं॥ प्रवृत्तिनिमित्तं द्वेधा। अन्यूण
संकेतानां संगतित्वं वैचित्र्यात्॥ तथाहि संकेतविषयीभूतप्रकारत्वविशेषणं॥ शुद्धं धर्मांतरेणानुपलक्षितं
तद्विशेषितं॥ एकं नानेकत्रानानाव्यक्तौ वा बुद्धिगोचरे॥ परिच्छेदकं मतेन विचित्रापदसंगतिः। संकेतादृश
यां बुद्धौ प्रतियोगित्वेन तादृशविशेष्यतायां वा निरूपकत्वेन विशेषणं या प्रकारता तस्यामाधेयतया प्रका
रीभूय संकेतविषया धर्मः प्रवृत्तिनिमित्तं॥ तन्निष्ठा संकेतप्रकारता काचिदनवच्छिन्नैव॥ यथा गोपदसंकेत
स्य गोत्वनिष्ठा प्रकारता। आधेयत्वसंसर्गावच्छिन्ना प्रकारतानिष्ठविशेष्यतानिरूपिता च न धर्मांतरेणावच्छिद्य
ते॥ समवायेतरसंसर्गावच्छिन्नाया जातिप्रकारताया धर्मावच्छिन्नत्वनियमे मानाभावात्॥ अत एव गौरिति राम
बुद्धेरनुव्यवसायेन प्रकारताविशेषणतया शुद्धगोत्वादेर्ग्रहणं॥ ननु गोत्वविशिष्टस्य तथोपनायिक

स्य व्यवसायस्य भावात्॥ अत एव च जातिशक्तिवादिनापि शुद्धगोत्वमेव शक्तिविशेषणत्वेनावगाह्यमानं गोत्व
शक्तपदमिति प्रतीयंति। अपरा प्रवृत्तिनिमित्तपरिचायकधर्मावच्छिन्ना॥ यथा बुद्धिविषयधर्मप्रकारतानि
रूपितबुद्धिविषयविशेष्यताकबुद्धिस्तत्पदजन्येति सर्वनामपद१ संकेतस्य या गोत्वादौ प्रकारता सा प्रकार
तासा स्वरूपसत् बुद्धिविषयत्वावच्छिन्ना वदितरसंकेतेन प्रकारतायां बुद्धिविषयत्वावच्छिन्नत्वमपि वि
षयीक्रियते॥ इतरा तु संकेतप्रकारताया यद्धर्मावच्छिन्नत्वमवगाह्यते तद्धर्मावच्छिन्ना॥ यथा धन्यपदासु
न्यत्वावच्छिन्नाया पुन्यप्रकारतानिरूपितायाः पुन्यपदविशेष्यतायाः प्रतियोगिनि बुद्धिर्जायतामिति
संकेतस्य पुन्यवृत्तिः प्रकारता॥ यथा वा लोमत्वावच्छिन्नलोमप्रकारतानिरूपितलांगुलत्वावच्छिन्नवि
शेष्यत्वेनाभिन्नावच्छिन्ना वा॥ लोमलांगूलत्वाभ्यामवच्छिन्नाया लोमवल्लांगूलवृत्तिः प्रकारता त
न्निरूपकपशुवृत्तिविशेष्यताका बुद्धिः पशुपदजन्येति संकेतस्य लांगूलादिवृत्तिः प्रकारत्वविशेषण

प.वा.र. ताप्रकारतावच्छेदकतयाभासमानेनपुन्यत्वलांगूलत्वलोमादिवावच्छिन्नाएषात्रिविधापिप्रवृत्तिनिमित्त
१० संकेतोद्देश्यबुद्धिविशेषणप्रकारत्वविशेषणताक केचिदंकेवलद्वितरप्रकारताकत्वानवच्छिन्नातत्प्रकारता
कबुद्धित्वावच्छिन्नासंकेतोद्देश्यतेतियावत्॥ तथाचैक विसंकेतएकमात्रधर्मप्रकारकबुद्ध्युद्देश्यकः यथा
गोपदस्यतत्पर्यायतदादिपदस्यधन्यादिपदस्यचापरोवाना धर्मप्रकारकबुद्ध्युद्देश्यकः यथा धाव
त्यपद्मत्वोभयविशिष्टवाचिनः पुंडरीकादिशब्दस्य धानकर्मकत्वगोत्वोभयविशिष्टशक्तिवाचिनोधे
न्वादिशब्दस्यचसचद्विविधः॥ एकत्रविशेष्येनानाधर्मप्रकारकत्वावगाहिनानाधर्मिणिनानाधर्मप्र
कारकत्वावगाहिचाद्यउदाहृतः॥ अंत्योयथाखर्वैउभ्रशरीरद्वयवृत्तियदेकदानेकवृत्तिजातिद्वय
तत्प्रत्येकप्रकारतानिरूपितप्रत्येकविशेष्यताकबुद्धिगोचरोनासत्तिघदसंकेतः॥ यथावासूर्यत्वेन राम
सूर्यमिंदुत्वेनइंदुमवगाहमानाबुद्धिर्जायतामितिपुष्पवंतपदसंकेतः यत्तुपुष्पवंतपदाच्चंद्रसूर्य १०

योर्निद्वित्वबंनैवबुध्यते॥ तथाचसामानाधिकरण्येनचंद्रत्वसूर्यत्वाभ्यांमवच्छिन्नयावद्धित्ववत्त्विप्रकारतया
निरूपितायाश्चंद्रसूर्योभयविशेष्यतायाः प्रतियोगिनीं बुद्धिमवगाहमानएवतत्रसंकेतः तेजनितस्मरण
शाब्दबोधादिकंतुसामानाधिकरण्येनचंद्रत्वसूर्यत्वाभ्यामव्यवच्छिन्नंद्वित्वमिंदुश्च१चसूर्यश्चोभयमपि
धर्मिणिविशेषणतयागृह्णाति॥ सामानाधिकरण्येनतद्धर्मविशिष्टस्यवैशिष्ट्यमवगाहमानाया
बुद्धेःसविषयकस्यवासामानाधिकरण्यघटकसंसर्गेणधर्मिणिविशेषणतावच्छेदकीभूततद्धर्म
वैशिष्ट्यावगाहित्वनियमात् अतएवगुणकर्मान्यत्वविशिष्टसत्तायाः द्रव्ये वैशिष्ट्यमवगाहमानाबु
द्धिर्द्रव्येगुणान्यत्वादेरपिवैशिष्ट्यमवगाहते॥ नेनगुणादौतादृशीप्रतीतिर्जायमानापिनप्रमाणमपि
॥ तत्र पुष्पवंतपदाद्वित्वबुद्धेरनुभयविरुद्धत्वात्॥ द्वेपुष्पवंतौजगतिदोदस्रौद्वौपुनर्वसूउत्पादाव
नन्वयापत्तेश्च॥ अतएवाभिन्नयाभिन्नयाशक्त्यातत्तदुपस्थापकनानार्थशब्दानां॥ पुष्पवंतादिपदस्य

प॰भा॰र॰ वैलक्षण्यद्योतनाय एकयोक्त्यापुष्पवंतौ दिवाकरनि। शाकराविल्यत्रशक्यैक्यमित्यनौनैत्तं॥ संकेतेतस्याभे
५ देपिबोधकत्वे: संकेतोद्देश्यतायाः एकोनशक्यैक्यव्यवहारः॥ नानार्थपदसंकेतियत्वबुद्धेरुद्देश्यता
द्वयं॥ तत्तद्धर्मप्रकारकबुद्धित्वावच्छिन्नमिदंतुयदुद्देश्यत्वकर्मत्वप्रकारकत्वावच्छिन्नंतदेवंदुप्रकारक
त्वावच्छिन्नमितिविवेकः॥ अतएवजात्याकृतिव्यक्तयः पदार्थइतिसूत्रेपदशक्यत्वस्वरूपस्यजात्याकृति
व्यक्तिषुपदार्थत्वस्यैकत्वद्योतनायपदार्थइत्येकवचनं॥ प्रातिपदिकार्थयोरभेदेनान्वयतत्रैवतुल्यवचनो
तप्रातिपदिकोपस्थाप्यंतंत्रं यत्रोद्देश्यान्वितसंख्याविरुद्धसंख्यायाः विधेयतद्विशेषणेवान्वयोनवि
वक्षितो वेदाः प्रमाणंजात्याकृतिव्यक्तयः पदार्थःशक्तिस्तुसप्तस्वभ्यासाः कार्यंप्रतिहेतुः शक्यमोषधिपदे
न तेर्विलासिसिद्धिच्छित्तुमयूरखकोरकेकाराइत्यादिषुवेदहसमप्रमाणनवर्त्ततइतिजातिमात्रंवानपदशक्य राम
मिति॥ शक्यादिप्रत्येकमात्रंनकाव्योपधायकमिति॥ विरहिणामिवविलाशिनामपिचंद्रकरस्य ११

शैखेदइतिध्वनत्वातुंप्रमाणनावच्छेदकनिर्दोषवाक्यत्वादिस्वरूपेप्रामाण्येगवादिपदार्थकत्वेकाव्योपधापकतावच्छेद
केविलासिकर्तृकशक्तौचस्कवर्थैकत्वान्वयोविवक्षितएवकराङ्गतुंशक्यमित्यत्रस्कदुपहतुशक्यमितिनिर्दशाशिष्टं॥ सा
मान्येनपुंसकपदार्थैकदेशस्कवर्थसंख्यान्वयोपिजात्याख्यायामेकस्मिन्बहुवचनमन्यतरस्यामितिसूत्रसिद्धिः॥ एवं
प्रवृत्तिनिमित्तवैचित्र्येणसंकेतवैचित्र्यमुपपादितमिदानीमन्यथापितद्वैचित्र्यमुपपाद्यते॥ ॥ संकेतोद्विविधोनि
त्योजन्यमित्यादिमोभिधा॥ अपरः परिभाषानावविशेषेणधक्तो। नित्योभगवत्संकेतोभिधेतिव्यहृयते॥ जन्योजी
वसमवेतः परिभाषेत्युच्यते॥ तयोः संकेतत्वेनैवस्मारकत्वमनुभावकत्वंचेतिउच्यतेनित्यसंकेतिनागवादिपदादि
वापाणिन्यादिनापिभवासंकेतिताङ्कुणवृध्यादिचैत्रादिपदाद्देऽनुमादेचांमनुष्यविशेषस्यचस्मरणमन्वयबो
धः॥ ननूपितृसंकेतितापदविशेषस्याभिधेवास्तु। एपिनानामकुर्यादितिश्रूयते॥ नदभिधायकत्वमेवहितंना
मत्वंअतएवद्व्यक्षरंचतुरक्षरंवाघोषवाद्यंतरस्थदीर्घाभिनिष्ठानं॥ कृतंकुर्यान्नतद्धितमित्यादिगृह्येणवर्गादि

१०७।०७॰ इत्यभिन्नैः स्पर्शैर्हकारेण च घोषवद्भिरादौ परत्वैरंतस्थैर्मध्ये दीर्घेणोपात्तेन घटितं हृदंतं ॥ देवराजादिपदमेवाभिधा
१२ यकमितिनियम्यते ॥ नरितरपित्रादिसंकेतितमपिनस्थितानांनादिपर्युदस्यते ॥ अन्यथास्थितिचेत्यथ्यादितिचेत्त ॥
परिभाष्यैवोपपत्तावभिधाकल्पनायांमानाभावात् ॥ अजानिकप्रयोगविरहस्याभिधाबाधकत्वाच्च । नामदंतुसं
केतितशब्दमात्रेशक्तं ॥ नन्वनित्यसंकेतित ॥ शब्दे ॥ अदेङ्गुणोनामेतिशास्त्रकारायपरिभाषामादायापिना
मपदप्रवृत्तेः ॥ घोषवदादिविधिनालुप्तसंस्कारकत्वं रूपकारकत्वंवापदविशेषस्यनियम्यतेनत्वभिधेतिबहवः ॥
मणिकृतस्तु ॥ आधुनिकनाम्नामशक्तत्वशक्यसंबंधरूपलक्षणाअप्ययोगात्तदृत्तिमत्स्वरूपमर्थवत्वमपिनस्या
त् ॥ तथाचाप्रातिपदिकसंज्ञानुपपत्तेचस्यादपभ्रंशवत् ॥ तथाचस्वरूपामप्यनुसत्यापत्तिरतस्तत्राप्यभिधाभ्युपेत
व्या ॥ इदत्रेदृत्तिपितानामकुर्यादित्यत्रनामपदस्यप्रातिपदिकपर्यायत्वमानदर्थपर्दुर्याभत्वात्तननार्थवत्वाक्षेपा राम
तत्रशक्तिसिधेः ॥ काव्याकरणव्युत्पाद्यत्वलक्षणांसाधुत्वमपितत्रनानुपपन्नमुणादयोबहुलमित्यादिभिस्तषांव्यु १२

पादितामित्याहुः ॥ इत्थंमपिडिशब्दादीनांप्रातिपदिकसंज्ञानुसत्याअव्ययसर्वनाम्नामकच्प्राक्टेरित्यादौविभक्त्य
नुत्पत्त्यापत्तिनादवस्थत्वात् ॥ टिसंज्ञासंकेतग्राहकवाक्यस्यपंचम्यप्रकृतिकत्वपातदुपस्थितेः ॥ पंचमीप्रत्ययार्थोन्वया
नुपपत्तेः ॥ अन्यथालक्षणिकशब्दस्यलक्ष्यार्थोपस्थापकत्वाभिनिवेशोमणिकृतानेवानुपपन्नस्यात् ॥ गंगायांघो
षइत्यादौपूरस्मारितेतीरसत्वस्यार्थोन्वयसंभवात् ॥ यदिचटेरित्यादिपाणिनिप्रयोगान्यथानुपपत्यानिरर्थकत्वेष्वपिसं
ज्ञाशब्देषुप्रातिपदिकसंज्ञाविधिराक्षिप्यते ॥ तदापितानामकुर्यादितिनामपदप्रयोगान्यथानुपपत्यानिरर्थकत्वेष्व
पिसंज्ञाशब्देषुप्रातिपदिकसंज्ञाविधिराक्षिप्यते ॥ तदापितानामकुर्यादितिनामपदप्रयोगान्यथानुपपत्यानिरर्थ
केपितदाक्षेपसंभवादिदमनुपपन्नमिवप्रतिभाति ॥ यदपिस्वरूपंशब्दस्याशब्दसंज्ञेतिव्याकरणबलेनसर्वशब्दा
नांस्वरूपेशक्तिरितिप्रतीयते ॥ तथाचादेवराजादिसंज्ञाशब्दानांमानुषविशेषेनिरूढलक्षणैवगृह्यस्त्रेणाख्या
ते ॥ शक्यार्थस्वरूपेणसहपित्रसंकेतस्यैववलक्ष्यार्थसंबद्धत्वादितिनप्रातिपदिकसंज्ञाद्यनुपपत्तिरिति ॥ नन्व ॥

१०।१०।२० कशब्दसंज्ञे त्वनेन पूर्वं दृष्टानां दिधुभादीनामेव वृत्तिमत्त्वानुपपत्तिनादवस्थानात् ॥ गवयत्वाहेत्यादौ गोशब्दस्य। स्वरूप
१३ परतापात्प्रादिपदिकसंज्ञातिश्चेत्साधिकमुपरिष्टात् ॥ ननु भवतु संकेतो नाम पदार्थेन संगतिः ॥ तत्किं संकेतत्वेन ॥ उ
नगोत्वविशिष्टविषयकबुद्धौ गोपदजन्यत्वावगाहि समनन्तरेन ज्ञानेन गवयानुभवस्मरणहेतुराद्येऽतिप्रसंगः ॥ द्वितीयेना
दूषणोपमानादिनाग्रहणासंभवस्तथाहि ॥ प्रथमतोऽतिदेशवाक्याद्गवयपदवाच्य इत्याकारकाद्गवयसादृश्यमुपलक्ष
णीकृत्य गोपदवाच्यत्वं प्रतीयते तेन च वाच्यत्वं न गोत्वविशिष्टविषयताकबुद्धित्वावच्छिन्नोद्देश्यताकसंकेतस्वरूपं ॥ गो
त्वादेः पूर्वमप्रतीतेः ॥ अपि तु गोपदजन्यबुद्धित्वावच्छिन्नोद्देश्यताकसंकेतविषयत्वमात्रं ॥ अन्यथातिदेशवाक्यादेव गो
त्वविशिष्टशक्तिसिद्धेरुपमानवैयर्थ्यात् ॥ ततो गोत्वावच्छेदेन गवयसादृश्यप्रत्यक्षेण जनितातिदेशवाक्यार्थस्मृति राम
गोत्वावच्छेदेन स्वविषयीभूततादृशसंकेतविषयत्वमेवोपपादयति संकेतेन तु गोत्वविशिष्टविषयकबुद्धित्वावच्छिन्नोद्दे
श्यताकत्वं कथं गमयेदसामर्थ्यात् ॥ एवं कोकिलः पिक इति कोशोऽपि कोकिलत्वावच्छिन्नो पिकपदजन्यबुद्धिविषयकसंकेत १३

विषयत्वमात्रं ग्राहयति ॥ न तु तादृशबुद्धौ कोकिलत्वविशिष्टविषयकत्वमपि ॥ तादृशविशिष्टसंबन्धस्य पूर्वमग्रहेण तद्विशिष्ट
पिकपदलक्षणया अप्यग्रहात् ॥ एवं शीतं गुणमत्सरोन्यशुभेद्वेष इत्यादिककोशोऽपि शीतादिपदत्वाद्यवच्छेदेन गुणविशेष
त्वविशिष्टविषयबुद्ध्युद्देश्यकसंकेतविषयत्वमात्रं ॥ गुणविशेषार्थकगुणपदसमभिव्याहृतसभम्पाप्रत्याययति ॥ न तु
शीतंपदजन्यत्वावच्छिन्नसंकेतोद्देश्यत्वमपि तादृशबुद्धौ बोधयितुमीष्टे ॥ विशिष्टस्य कोशप्रवृत्तेः पूर्वमनुपस्थित्यास
म्पास्मरणासंभवात् ॥ येनेन कर्त्तरि कृदिति व्याकरणमपि व्याख्यातं ॥ आप्तवाक्यमपि अतिदेशवाक्यवन्नवि
शिष्टशक्तिं बोधयितुमर्हति ॥ न हि कलशो घटपदवाच्य इत्यत्र वाच्यपदेन घटत्वविशिष्टविषयकघटपदजन्यबुद्ध्युद्दे
श्यकसंकेतविषयः पदार्थविधया बोधयितुं शक्यते ॥ प्रागनुपस्थितेरन्यथोपदेशवैयर्थ्यात् ॥ व्यवहारवाक्यशेष
विवरणशब्दानरसामानाधिकरण्यानि अनुमानविधयैव संकेतग्राहकाणीति तत्र व्युत्पादयिष्यते। तथान्वयपदं
दीर्घश्रुकवाचिकं ॥ त्वत्तं नरं विनाशिष्टे त्वत्र प्रयुज्यमानत्वाद्दित्याद्यनुमानेनापि पवत्वविशिष्टधवविषयकमव

१०वा०२० पदजन्यबुध्युद्देश्यकसंकेतघटितंसाधर्म्यव्यपदेनसाधयितुंशक्यते॥ प्रगत्वुपस्थितेनरूपाच्छिन्नोवाकिमनुमानेनेतिचेदुच्यते॥
१४ गोशब्दशाब्दजन्यबुद्धौयासंकेतोद्देश्यतानयानिरूप्यताविशेष्यत्वविवर्तनेनप्रकारता॥ तदवच्छेदकत्वयावद्विषयीभावलक्ष
णं॥ तद्गोपदेनवाच्यत्वंगवादावुपमीयते॥ विशिष्टवैशिष्ट्यबुधिमर्यादावगाहनस्कसा॥ अवच्छेदकतागोत्वगोसंसर्गेषु
गृह्यते॥ विद्यतेहिविशेष्यतोपरिसंसर्गभेदत॥ व्यक्तिसंसर्गजातीनांसंकेतगोचरीक्रिया॥ गौर्गोपदवाच्येत्युपमित्या
गोत्वविशिष्टमुद्दिश्यगोपदजन्यबुद्ध्युद्देश्यतयानिरूपितायाविशेष्यत्ववृत्तिविशेषणतातन्निरूपितत्वविषयीभाव
लक्षणंविशेष्यतीयस्वरूपसंबन्धावच्छिन्नमवच्छेदकत्वंतेनसंसर्गेणसंकेतः संकेतनीयः संसर्गोवाभिधीयते॥ ना
दृमवच्छेदकत्वमेवहिगोपदसहकृतनवाच्यपदप्रवृत्तिनिमित्तमतिदेशवाक्येनोपनीतमुपमितेः पूर्वंसादृश्यविशि
ष्टपिंडप्रत्यक्षेणस्मर्यते॥ विद्यतेचगोत्वविशिष्टाभागविगोविशेष्यकागोपदजन्याबुद्धिरितिसंकेतस्यानिरूक्तसं राम
सर्गेणगवितिराबाधात्॥ नतेनादृशसंसर्गेणगविसंकेतस्यसंकेतप्रतियोगित्वनादृशसंसर्गस्यवासत्वामयु १४

पमितौगोत्वावच्छिन्नविशेष्यताकबुद्धिर्गोपदसंकेतोद्देश्येति॥ बुद्धेस्तत्यतोबाधकविरहात्॥ तदागोत्वेनगोस्मरणशा
ब्दबोधादेरनुत्पत्तेनेष्टमुपमितिरन्वयबोधागमितिचेन्न॥ गोत्वविशिष्टतादृशसंकेतप्रकारतावच्छेदकत्वोपमिति
र्जायमानाविशिष्टवैशिष्ट्यावगाहिन्याबुद्धेः स्वभाववैचित्र्येणपरस्परसंवलितविषयतापन्नेषुगोत्वगोसमवायेषु
विधेयधर्मंगृह्णाति॥ रक्तदंडोज्ञायतइतिप्रतीतिरिवारक्तदंडत्वसमवायेषुज्ञानविषयताधर्मिपारतंत्र्येणधर्मि
तावच्छेदकतादेरपिविशेष्यताभ्युपगमात्॥ अतएवलंबकर्णजानीयतांयष्टयः प्रविशंतिसपुत्रआगतःकुद्दालादिर्ग
णः भुवादिर्धातुरित्यादौधर्मिविशेषणतापन्नेषुकर्णयष्टिपुत्रकूरभुवाप्रभृतिष्वानयनकर्मप्रवेशकर्तृत्वागत
गणधातुतादात्म्यादिप्रतिविशेष्यत्वमनुभवसिद्धं॥ स्यादेतत्॥ यदिगोपदवाच्योविशेष्यिकाबुद्धिर्जायतामितिसंके
तस्यविशेष्यतावृत्तिप्रकारतायाअवच्छेदकत्वंगवित्वरूपत्ववर्तेत॥ नैवंशब्दबोधविशेष्यतोपरिगोत्वस्याधाराधेयभावेनसंके
तविषयत्वेबाधात्॥ नहिशाब्दप्रमितिरपिगोत्वादिविशेष्यकेतिचेन्न॥ संकेतोहिशाब्दबुद्धिविशेष्यतायांआधाराधेयभावेनगोत्वस्वरूपवृत्तिप्र
कारतानिरूपकत्वेनचस्वावच्छिन्नप्रकारतानिरूपकत्वेनचगोत्वसमवायावपिविशेषणीकृत्यावगाहते अवच्छेदकतासंबंधविशेषणता।

९०७।०२० नन्निपनात्तदन्यावेत्यन्यदेतत्॥ अथवागौर्गोपदजन्यबुद्धित्वावच्छिन्नसंकेतोद्देश्यत्वेननिरूपितायाः विशेष्यत्वप्रकारतायाः अवच्छेदकद्
१५ त्युपमितौधर्मितावच्छेदकतयाभाषणंगोत्वस्यप्रकारतावच्छिन्नतावच्छिन्नत्वसंसर्गेणविशेष्यत्वंप्रकारताकंबुद्धिर्गोपदादिग्राममवच्छि
न्नत्वसंसर्गेणावच्छेदकतायांचभासते॥ गोत्वप्रकारतावच्छिन्नगोविशेष्यताकबुद्धिर्गोपदादित्याकारकोपमितिविषयीभूतः सं
केतोद्देश्यत्वेहि॥ विशिष्टवैशिष्ट्यबुद्धावुद्देश्यतावच्छेदकधर्मेणविधेयस्यतद्विशेषणस्यापिवैशिष्ट्यावगमः॥ अतएवगंधप्रागभा
वकालीनोघटोगंधविशिष्टपृथिवीत्ववानितिबुद्धेरप्रामाण्यं॥ गंधतत्प्रागभावयोरवच्छेद्यावच्छेदकभावस्यभासमानस्यबाधात्॥
एतेनगौर्गोपदवा॥ व्याख्यातंनराजन्यगोपदजन्यप्रतीतिविषयत्वादित्यनुमानमप्युपमानतुल्यतयाव्याख्यातं॥ व्याख्यातांश्चोपदेश
विशेषाः॥ अनुमानोपमानयोरुद्देश्यविधेयभावेनवाच्यत्वं॥ कोकिलःपिकइत्यादौतादात्म्येनवाच्यंभासतइतिविवेकः॥ एवमर्थविशे
ष्यकबोधजनकानिवाच्यताग्राहकाणिप्रमाणान्युक्तायपदधर्मिणिवाचकताग्राहकाणिव्याकरणादिप्रमाणानिप्रस्तूयंते॥ भूसत्तायांक
र्तरिकृष्णेवेधीधनेवस्तइत्यादौवाचकतार्थासप्तमी॥ स्वाद्यपेक्ष्यते॥ विशेष्यतावच्छेदकत्वावच्छिन्नोद्देश्यतानिरूपितजनकत्वप्रका
रतावच्छेदकत्वस्वरूपासंकेतविषयतावाचकता॥ सेवभूसत्तायामित्यादौसप्तम्यर्थः॥ नदेकदेशेविषयतामीसत्तात्वादिवि राम. १५
शिष्टस्यविशेषणतया ऽन्वयः॥ सप्तम्यर्थविशेष्यतयातुभ्वादेः॥ ननुभूशब्दस्यनिर्विभक्तिकत्वेनासाधुत्वात्पदत्व[illegible]त्यनुप

स्थितात्वाच्चकथंमत्रपदार्थान्वयः। यत्तुभूशब्देनवाच्यवाचकत्वलक्षणयास्वंरूपंशब्दस्येतिसूत्रेणग्राहितसंकेतेन
वास्मादितिभूधातौसत्तावाचकत्वान्वयोपिनानुपपन्नः॥ स्वस्यार्थप्रतिपादकत्वरूपार्थवत्त्वेपिभुवोनप्रातिपदिकसं
ज्ञा अर्थवदधातुरप्रत्ययःप्रातिपदिकमित्यत्रधातोःपर्युदासादिति॥ तन्न। भूसत्तायामित्यत्रभूपदस्यस्वरूपेप्र
त्तिमत्त्वेक्रियावाचित्वाभावेनधातुपदप्रवृत्त्यभावाद्धातुरितिपर्युदासप्रसक्तेः सुब्लुप्तेर्दुर्वारत्वात्। अन्यथाभु
नावुकभूनोवाचि॥ भाषायांसदवसःश्रुवः इत्यादावपितदनुपपत्तेः। इकृश्तिपौधातुनिर्देशइत्यनेनभुवि
भीवतिरितिप्रयोगापत्तेः। भूशब्दस्यागृहीतशक्तिकत्वेनतद्वाच्यवाचकेलक्षणानुपपत्तेः। नचभूशब्दःस
प्रवृत्तिनिमित्तकःसाधुपदत्वादित्यनुमानेनसामान्यतःशक्तिर्गृहीतेति। वाच्यंशक्तिपदार्थस्यशक्यतावच्छेदक
विशेषघटितत्वेनतदग्रहणेग्रहासंभवात्। यदिचसर्वनामशब्दानामिवचवक्तृत्वमुपलक्षणीकृत्यवक्तृविशेष्यकम
शब्दजन्यबुद्ध्युद्देश्यकसंकेतोविशिष्यप्रवृत्तिनिमित्तायहेपिसुग्रहइत्युच्यतेतदापिएतादृशसामान्यशक्यसंबंध

फ.वा.र. स्वरूपालक्षणानानुभावोयथिकस्मरणोपयोगिनी। अतएवसर्वनाम्निनलक्षणेतिवदंति एतेनभूधातोः स्वरूपेप
१८ परिभाषास्वरूपमित्यादिसूत्रग्राहिता। तयास्मारितेनभूधातोसत्ताद्यर्थकत्वान्वयइत्यपिनसंभवति। प्रातिपदि
कसंज्ञापत्तेः। नचस्वरूपार्थकस्यापिभुवः क्रियावाचित्वानपायाद्धातुरितिपर्युदासान्नप्रातिपदिकसंज्ञाप्रस
क्तिः। ब्रुवोवचिरित्यादौतुसौत्रीप्रातिपदिकसंज्ञातुवैकल्पिकी। इक्तिपावपिवैकल्पिकावेव। यद्वाभूशब्दोद्वि
विधः एकोगणपठितत्वेसतिक्रियावाचीधातुरितिसंज्ञापत्तेसस्वरूपपरोप्यधातुरितिपर्युदासान्नप्रातिपदिकसं
ज्ञः। द्वितीयस्तुगणापठितत्वादधातुस्तस्यविकल्पेनप्रातिपदिकसंज्ञा। इक्श्तिपस्यादितिवाच्यं। ब्रुवोवचिर्भु
वोवुगित्यादौब्रुवेर्भुवेश्चधातुत्वाभावेअचिश्नुधातुभ्रुवांय्वोरियङुवङावित्यनेनयुङुवङोर्विरहप्रसंगात्। य
त्तुश्रोत्रोपस्थितभूशब्दादौसत्तावाचकत्वादिरन्वयः। पदार्थोपस्थितीनांविषयभेदेनशाब्दबुद्धिंप्रतिकारणता राम
भेदात्। पदोपस्थितोपदजन्यत्वाप्रवेशादन्यथाप्युपस्थितेपदेपदार्थांतरान्वयसंभवात् तथाचभूसत्तायामित्यत्र १८

वृत्त्यापदार्थानुपस्थापकत्वेनार्थवत्वाभावान्नप्रातिपदिकसंज्ञा। यत्रतुभुवोनुकार्यानुकरणभावेनभेदोविवक्षितस्त
त्रानुकार्यस्यश्रोत्रेणानुपस्थितत्वात्तदुपस्थितयेश्रूयमाणस्यलक्षणापरिभाषाबाधवृत्तिरभ्युपेतव्येतितयार्थव
त्वाद्ब्रुवोभुवइत्यपिप्रयोगःसूपपदः। अतएवगवीत्याहेत्यादावितिनिपातोपस्थितायांकर्मतायांश्रोत्रोपस्थितस्यगो
शब्दस्यान्वयः। अन्यथानिपाताभिहितेकर्मणिप्रथमाश्रवणापत्तेः। आप्रगृह्यःस्मृतोवाक्येप्यास्तुस्यात्कोधपी
उयोः। चान्वाचयसमाहारेतरेतरसमुच्चयेइत्यत्रकोशोपिश्रोत्रोपस्थितेषुप्रगृह्यसंज्ञकतादात्म्यस्यतदर्थकस्यचा
न्वयः। खलुवाक्यालंकारइतिप्रत्यक्षालोकेश्रोत्रोपस्थितस्यखलुशब्दस्यवाक्यमुखचमत्कारात्मकालंकारद्योतकत्वा
न्वयः अतएवश्रोत्रोपस्थितेविव्रियमाणवाक्येपचतीत्यादौपाककरोतीत्यादिविवरणवाक्यं। तथाविधसमार्थकत्वे
नतदुपस्थापितः पाककर्तृत्वाद्यर्थोवाप्रतिपादकत्वेनसंसर्गेणान्वेति। पाकंकरोतीतिवाक्यप्रतिपादितकर्तृत्वस्याख्या
तार्थस्यापिप्रातिपदिकतासंसर्गेणप्रथमांतभिन्नेपिपचत्यादावन्वयोनानुपपन्नः आख्यातार्थकर्तृत्वस्याश्रयत्वसंबंधे

प॰शा॰र॰ नान्वयएवप्रथमांतपदापेक्षा। अतएवनिर्विभक्तिकेनञ्पदोपस्थाप्येअत्यंताभावेनपचतीत्यादौप्रतियोगित्वयापाकभा
८ वनान्वयः। एतादृशानांनिर्विभक्तिशब्दानांसाधुत्वमपिज्ञापकसिद्धं। अनुकरणशब्दासाधवइति सामान्यतएवभूसत्ता
यामित्यनेनज्ञापनात्। अतएवगवित्याह प्रतीतंतानीतिप्रत्यस्तविल्यादिल्यादिषुअनुकरणनिरर्थकशब्दांतर्गतस्योत्तावादे
शः। हेलयोहेलयइतिवदंतोसुरःपरावभुभुरितिश्रुतापभ्रंशानुकरणालृथः शब्दांतर्गतस्याकारस्यपूर्वरूपत्वं। कुमा
रीलृतकइतिब्रूतेइत्यादौलृतकानुकरणप्रथमावभवस्वरस्यपूर्वयणादेशानिमित्तत्वंसंगच्छते अन्यथावादिकिंधींसा
धुमात्रविषयतयागोआलोपअलंजीआईइत्यादौभाषायामिवनदप्रसक्तंस्यादिति। नन्नु। एवंसतिलतिष्ठतिशब्दोगोइत्या
देरपिसाधुत्वप्रसंगात्। आपगृह्यइत्यादौविभक्तिंविनापितादात्म्यान्वयस्यपचतिपाकंकरोतीत्यादिविवरणवाक्यप्रति
पादकतयाशब्दआख्यातान्वयस्यचत्वमेवस्वहस्तितत्वात्। तस्मादनुपपन्नमेव भूसत्तायामित्यादिवाक्यमिति। अत्रोच्य राम
ते। यदर्थशक्तयाधातुत्वंनिपातत्वंचवारिषु। तदर्थसंबंधशक्त्याबोधकत्वेतिनत्तया वाकारस्यैवगतिनिशेषशक्तिविधंधनं ८

धातुत्वं। विकल्पशक्तिनिबंधनंचनिपातत्वमित्यन्येषामभूवाप्रभृतीनां धातुत्वनिपातत्वप्रयोजिकाभवत्यर्थविशेषेश
क्तिरेवतदाश्रयसंबंधस्वस्वलक्षणयाबोधकतापि। अतएवस्थितिशक्तस्यततसंबंधेगतिलक्षकस्यष्ठाधातोःप्रतिष्ठ
तेइत्यादौधातुत्वंअभावशक्तस्यतदधिकरणलक्षकस्यनञोघटोभूतलमित्यादौनिपातत्वंचसंगच्छते। तथाचस्वश
क्यसत्तावाचकत्वेनस्वलक्षकस्यभूशब्दस्यधातुत्वेनपर्युदस्तत्वात्। नप्रातिपदिकसंज्ञा। चकारस्यचस्वार्थवाचकेस्व
रूपेलाक्षणिकत्वेननिपातत्वानपायात्। सुपोलुकिचान्वाचयेत्याद्यमरोपिसंगच्छते। नखेवस्वखलुवाक्यालंकारइत्या
लोकप्रयोगः। परिभाषास्वरूपेणसंकेतेनतुवृत्तिमत। भवद्वादिपदंप्रातिपदिकत्वंप्रपद्यतेस्वरूपंशब्दस्याशब्दसंज्ञेति
सूत्रेणप्रतिपादितेनपाणिनिसंकेतेनवृत्तिमान्भ्वादिशब्दः प्रातिपदिकसंज्ञामपिलभते। चकारादिरव्ययसंज्ञात्यजति।
टिघुभप्रभृतिषुपरिभाषायाअप्यर्थवत्वसंपादकत्वस्यदृष्टत्वादिति। भुवोवुकत्त्वर्थेइत्यादयःप्रयोगास्तूपपादागवित्याह
त्यादिवाक्येश्रोत्रेणोपस्थितेगवि। इतिशब्दपरामृष्टेज्ञेमावचनकर्मताइत्यशब्दः सर्वनामप्रकृतिकतयाबुद्धिस्थप्रकारेण

परामर्शाति बुद्धिश्चकि निश्चयरूपब्दजन्या तदिदमादिपरामर्शबीजं। यथायो धूमवानसोग्निमानिति। क्वचित्पूर्ववाक्यप्रक्र-
मजन्या। यथाअभ्रूलनयोदशरथइत्युदाहृतः साध्येष्ववेदानितिक्वचिद्दिद्यमानानुभवात्मकप्रसिद्धरूपायथा। घटंद्द
ष्टागोशब्दश्रुत्वाबावदनिरमस्मानयश्मृण्वतिक्वचित्स्मरणरूपा। यथा। तेलोचनेक्षिपतिस्सेति। गवित्याहेत्यादौलि
लिशब्दपरामर्शबीजभनुभवंसंपादयितुंमुक्तोगोशब्दोनवृत्तिमानितिप्रातिपदिकसंज्ञाइतिशब्दानन्तरंतुलुप्तापि
प्रतिसंहिता। द्वितीयाकर्मतांब्रूयादितिकीवचनान्वपि गोशब्दार्थकेतिशब्दानंतरं द्वितीयालुप्तामतिसंहितावच्यर्थो
न्विनांकर्मतामपिधातुंप्रभवति। अव्ययानां नित्यप्रथमांतत्वे निर्विभक्तिकत्वेवाइत्यर्थस्पक्रियाकर्मभावसंसर्गेणसा
क्षाद्धनान्वयोपिसंभवति। दृष्टोहिनारदइतिपश्यतीत्यत्रेति निपातोपात्तायाः कर्मतायाः कर्मणोवास्तोकमेवपचतीत्ये
वकारेणबोधितस्यस्तोकान्यतादात्म्यव्यवच्छेदकस्यकुटिलंनगच्छतित्यत्रन आप्रतिसंहितस्यकुटिलान्योन्याभावस्यच
दर्शनपाकगमनेषुधात्वर्थेषुभेदान्वयः। ननुपचतिपाकंकरोतीत्यादिविवरणेपदधर्मिकः प्रातिपदिकतयाब्रीयमाणवाक्या

र्थानान्वयः कथंस्यात्। पचतिपदस्यपदानुपस्थितत्वात्। पचतीत्यस्यवाक्यतया[illegible]अप्ययोगात् लकारएव
पदलक्षकइति चेन्न। पचधात्वर्थस्यानन्वयप्रसंगात्। पचंस्तात्पर्यमात्रग्राहकत्वेप्रत्ययानांप्रकृत्यर्थान्वितस्वार्थबोधक
त्वव्युत्पत्तिभंगप्रसंगात् पचधातुः पचतिलक्षकोलकाराभावइतितिपसाधुत्वप्रयोजनकइतिचेत्। निर्धतिङात्मने
पदत्वघटकसमभिव्याहृतत्वादिनियमभंगापत्तेःरिति। मैवंविब्रियमाणावाक्यमाख्यातस्यप्रतिपाद्यत्वलाक्षणिकत्वा
त्। तथाहि पंचतीतिपदंब्रूतेपचिलड्विषयत्ववाक्यपत्वेनान्वितोलार्थोव्याख्यावाक्यार्थमन्वितः सप्तम्यंतोद्भव
पदार्थिकोद्भवपदास्यरासप्तमीबोध्यतामाह व्याख्यावाक्यव्यपेक्षया पचतिपाकंकरोतीत्यत्र पचेः पचतीतिपदे
लटोनुबोध्यत्वेलक्षणानद्वाक्यार्थः पचतिपदबोध्यत्वं पाकंकरोतीतिविवरणवाक्यार्थेपाकत्वेन्वितः प्रभवस्यर्थो
व्याख्यानव्याख्येययोरेकार्थत्वं गमयितुं एवंतस्यकाव्यस्योद्भवेनिर्माणे समुल्लासे चहेतु रित्यत्रोद्भवपदं सप्तम्यंतो
द्भवपदे सप्तमीचप्रतिपाद्यत्वेलाक्षणिकी तद्व्याख्यातो निर्माणसमुल्लासेचेतिव्याख्याते निर्माणप्रतियोगिकत्वा

प॰वा॰र॰ दावत्वेपिवाक्येकवाक्यतयापदार्थयोरन्वयेविलक्षणव्युत्पत्तिस्वीकारेणविभक्त्यर्थयोरपिपरस्परमन्वयोनविरुध्यः।अ
१८ नएवयजेतेत्यत्राख्यातार्थेभावनायांतरतिमत्सुमित्याद्यार्थवादिकाख्यातेनलक्षणयान्यथावोपस्थापितंप्राशस्त्यंसर्वे
चसुवर्थकारकमन्वेतीतिमीमांसकाः।चैत्रःपचतिपाककृतिजन्यचेष्टाश्रयत्वादित्यादिन्यायेहेतुपंचम्यर्थाख्यातांतार्थे
न्वेतीतिनैय्यायिकाः।इतिसंवलितंव्याख्येयग्रंस्थवपुःस्थितं।तत्रश्रोतोपस्थितंत्वदितिनापरिमृश्यते।यत्रपचतीति
पाकंकरोति इत्यर्थएवंव्याख्यानग्रंथः तत्रैतिद्वयंश्रोत्रोपस्थितस्यपचतिपदस्यपाकंकरोतीतिवाक्यस्यचपरामृश्य
कंतदर्थस्सुप्रतिपाद्यप्रतिपादकभावसंसर्गेणार्थपदार्थेन्वेतीत्यथाव्याख्यानव्याख्यापयोरेकार्थत्वंलक्ष्यते नन्वे
पदसं वमपिविवरणकेतग्रहइतिकथमुपपद्यतामितिचेदित्थं॥पचतेःपाककर्तृत्वबोधकत्वव्यवस्थिते। सुग्रहापचितापा
कलाभाकृत्यर्थतडः।विवरणेनपाककर्तृत्वबोधकत्वेपचतिपदस्यप्रमापितेतिअकर्तृत्वबोधिका पाकार्थकपचि राम
भिन्नत्वेमतिपाककर्तृत्वबोधकपचतिपदांतर्गतसाधुपदत्वादित्यनुमानेनावापोद्धापाभ्यांकृतोतिङः शक्तिग्राह्येति १८

व्युत्पादयिष्यते।व्याकरणात्कोशाद्उपमानाच्चवस्तुनि।गृह्यतेपदसंकेतःपदेवावस्तुवाचिता।व्यवहारेविवरणेप्रसि
ध्धपदसंन्निधौ।वाक्यशेषेचानुमानद्वारातदुभयग्रहः॥तद्गृहीतसंस्कारसचिवानुपदश्रुतिः॥स्मारयत्यर्थमेषेववस्त्व
तिरर्थानुभाविता।कर्तरिकृत।शेषेषष्ठीत्यादिव्याकरणेन।शीतंगुणेतद्वद्‌र्थाःस्तुशीमवशीशिराजडइत्यादिकोशेनपदेव
स्तुवाचकतातिदेशवाक्यार्थस्मरणसहकृतसादृश्यविशिष्टपिंडप्रत्यक्षेणवस्तुनिपदवाच्यताव्यवहारस्थलीयानुमा
नेनपुनरनियमेनक्वचिद्वस्तुनिपदवाच्यताक्वचित्पदेवस्तुपदवाचकताचगृह्यते।तादृशग्रहाहितसंस्कारस्तुपदज्ञान
मुद्बोधकमासाद्यवस्तुस्मारयति।तस्याश्चस्मृतेर्गोपदज्ञानत्वविशिष्टजन्यत्वेसविशेषगोपदशक्तिसंस्कारत्वावच्छि
न्नकारणतानिरूपितकार्यताधिकरणगोस्मरणत्वेनशाब्दबुद्ध्योजनकत्वं।तेनसंबंधांतरज्ञानेनगोपदज्ञानेनैववापु
रुषांतरसमवेतेनकालवधिपाजनितायाःपदेनसहतुल्यकालीनत्वादिसंसर्गेणगोगोत्वरसंस्कारेणगविशेषपदशक्तत्व
संस्कारेणैववापुरुषांतरसमवेतेनसमयविभयोत्पादित्यादितायागोरितिस्मृतेर्नशाब्दबोधांगत्वं यस्कृतस्य पदज्ञानश

प॰वा॰र॰ २ क्तिसंस्कारयोः पदार्थस्मरणं प्रति साक्षादनुभवं प्रति च स्वरन्यपदार्थानुसंधानद्वाराकारणत्वं पदार्थस्मरणस्य चा
नुभवत्वादिजात्यसत्वे शाब्दस्मरणोभयवृत्तिजात्यात तत्त्वे तदन्यतरत्वेन वा शाब्दबुद्धिजनकत्वे शाब्दबोधोत्पा
दकसामग्रीप्रवेशस्य गोपदज्ञानतद्वृत्तिमत्त्वाच्च संस्कारोभयजन्यज्ञानत्वेनातः। प्रत्यक्षादुपस्थितस्य गोत्वरान्व
यबोधः। दृश्यते च चिरंतनः कर्णव्यापाराणां जनकतानवच्छेदके नापि कर्णजन्यत्वादिसामग्रीघटकत्वं। अतएवानु
भवव्यापाराणां संस्काराणां निर्विषयत्वं गगने घटानुभवजनितसंस्कारत्वेन स्मरणसामग्र्यां यागव्यापारस्यापू
र्वस्य च दानजन्यापूर्वाद्वैलक्षण्ये यागजन्यापूर्वत्वेन स्वर्गविशेषसामग्रीघटकत्वं अन्यथा घटानुभवजनितसंस्का
रानजनितापूर्वसत्वे पटस्मरणस्वर्गयोर्विषयोस्त्यादापत्तेः। यदि चात एव संस्कारस्य विषयत्वमपूर्वस्य च वैजात्यमभ्यु
पेयते तदवच्छिन्नमेव सामग्रीमध्ये प्रविशतीति मतं तदा प्रकृतेपि यदवच्छेदेन पदज्ञानवृत्तिसंस्कारं जन्यत्वं तदुभया रत्न
व्यवहितोत्तरस्मरणत्वादिरन्वयबुद्धिं प्रतिजनकभावच्छेदकोन तु तत्र जन्यतामेव शाब्दगौरवात्। शाब्दबुद्धित्वादिना २

पृथगेव शाब्दबुद्ध्यौजनकत्वं। अतएव यत्र पटपदामपट्टादीनां प्रतिसंधानं मध्यघटकर्मत्वादीनां स्मरणमप्यपदा
नामाकांक्षाप्रतिसंधानं ततो विशेष्यविशेषणन्यायेन शाब्दबुद्धिरर्थविशिष्टवैशिष्ट्यबुद्धिस्तत्र पदेन साक्षाज्ज
निताया उपस्थितेरसत्वेपि न विशिष्टवैशिष्ट्यबुद्ध्यनुपपत्तिः। शाब्दिकास्तु संकेतसंसर्गेण पदपदार्थवैशिष्ट्यावगाहि
गौर्गोपदवान् गोपदं वा गोमदित्याकारकसंगतिग्रह एव पदार्थस्मारकः। संकेतस्तु भगवत्समवेत एकोपि यत्पदजन्यत्वेन
यद्धर्मविशिष्टविशेष्यिकाबुद्धिमुद्दिश्य जनितद्धर्मावलीढतत्पदस्यैव संसर्गी भवति न त्वन्यस्य। संसर्गतानुतस्य संकेत
त्वेनैव। समवायोपि हि यदनुयोगिकत्वावच्छेदेन यत्प्रतियोगिकस्तयोरेव विशिष्टबुद्धिं जनयति ननु वायुरूपयोः। संसर्ग
तानुतस्य समवायत्वेन न केनापि चावच्छिन्ना कोपाध्याकरणादिरपि पदतदर्थयोः संकेतेन वैशिष्ट्यं ग्राहयति। अतएवा
गृहीतेपि प्रवृत्तिनिमित्ते दशरथपदवानिति निर्धर्मितावच्छेदकशक्तिग्रहेण तादृशीं स्मृतिमुत्पाद्य तादृश एव शाब्दबोधो
जन्यते। दशरथत्वादिजातीनामाधुनिकयोग्यतात्वद्विशिष्टशक्तिग्रहासंभवात् दशरथस्य संसर्गिकाबुद्धिरपि न दशर

प॰वा॰र॰ थत्वविशिष्टमुपनेतुंप्रभवतिसांसर्गिकविषयताभिन्नविषयताया एवोपनीतभानजनकतावच्छेदकत्वात्। अन्यथासंयो
३१ गसंसर्गकबुद्धेरनंतरंसंयोगंजानामीत्यनुव्यवसायसंभवेनसांसर्गिकविषयत्वायोग्यत्वप्रवादस्यनिर्युक्तिकत्वापत्तेः। अ
जातिमानितिविशिष्टबुद्धिरपिनानवच्छिन्नंदशरथत्वप्रकारकस्मरणमपिजनेतुमर्हति। समानप्रकारताकानुभवस्यैव
स्मरणोपधायकत्वात्। अन्यथाजातिमानितिखिलजात्यवगाहिन्याबुध्यामुंडितसर्वजातिप्रकारकस्मरणेसार्वज्ञप्रसं
गात्। नापिदशरथपदवाच्यदशरथपदलक्षणा। शक्तिज्ञानस्येवतदाश्रयसंबंधज्ञानस्यापिशाक्यतावच्छेदकविषय
त्वनियमेनतदग्रहेलक्षणायाअपिग्रहणासंभवात्। संकेतत्वेनैवसंकेतस्यलक्षणाज्ञानविषयत्वेतुशक्तिज्ञानेपितथैव
विषयत्वौचित्यात्ताद्दशसंकेतसंसर्गकस्यनिर्धर्मितावच्छेदकस्यपदप्रकारकाग्रहस्यतथैवस्मरणंप्रतिसंस्कारद्वाराकॢ
प्तकार्यकारणभावेनैवनिर्वाहोदाशरथिमिकमतेतुदशरथपदवाच्यत्वाद्यनवच्छेदेनदशरथपदलक्षणागोचरस्मसंस्कार राम
स्यकार्यकारणभावांतरंकल्प्यमितिगौरवं। एवंगौर्गोपदवाच्य इतिसधर्मितावच्छेदकस्यतदाहितसंस्कारस्यवाताद्दशस्म ३१

रणेक्लृप्तकार्यकारणभावोननुभुद्ध्यार्थांगौरितिस्मृतौअतिरिक्तकारणताकल्पनंयुज्यते संकेतसंसर्गेणयादशरथपदत्वा
वच्छिन्नप्रकारतातदतिरिक्तप्रकारत्वानिरूपितविशेष्यताकपदार्थप्रतिसंधानस्यताद्दशानुभवेताद्दशगोपदत्वावच्छिन्न
प्रकारतानिरूपितगोत्वावच्छिन्नविशेष्यताकनिश्चयस्यचताद्दशान्वयबुद्धौताद्रूप्येणाकारणत्वं। ननुगोपदप्रतिसंधान
जन्यागविगोपदसंस्कारजन्याचयागोत्वावच्छिन्नस्मृतिस्तस्यास्तत्वेनगोत्वावच्छिन्नानुभवेकारणता अवच्छेदकगौरवा
त्शाब्दपदार्थज्ञानस्यविशिष्टशाब्दबुद्धिजनकत्वप्रसंगात्। शाब्दबोधेपिसंस्कारकारणत्वकल्पनेगौरवात् सुरभि
पदजन्यगवानुभवेचलाघवेतरबाधाद्युपनीतगोत्वविशिष्टानुभवेचव्यभिचारप्रसंगात्गोपदजन्यगोस्मरणनाशकानु
भवत्वस्याव्यवहितोत्तरत्वसामानाधिकरण्योभयसंबंधेनताद्दशविशिष्टानुभवत्वस्यवाविनश्यदवस्थताद्दशस्मरण
जन्यगवानुभवाव्यापकत्वात्। विभिन्नक्षणिकयोर्वैशिष्ट्यविरहात् विनश्यदवस्थस्मृतीनांतुतत्तद्व्यक्तिंप्रतिहेतुत्वेचा
तिगौरवात्। तस्माद्गोत्वावच्छेदेनसंकेतसंसर्गेणगोपदवत्ताग्रहस्यविशेषणविशेष्यतावच्छेदकप्रकारकनिश्चयविधया

प॰वा॰र॰ गोपदवाच्यं गोरस्तीत्यादिपदजन्यानुभवेक्लृप्तेन कार्यकारणभावेन निर्वाहादतिरिक्तकार्यकारणभावकल्पने गौरवात् । वृ
२२ त्तिग्रहतुल्यविषयताक एव शाब्दबोधोन्यत्रः कोशव्याकरणव्यवहारादिजनितः शाब्दबोधानुमित्यादिरूप इव संकेत
ग्रहः प्रात्यक्षिकोप्यन्वयबोधांगं यदि विधत्ते पदयोराकांक्षादिग्रहसहकारि अत एव शाब्दबोधानंतरमपि शाब्दबोधांत
रेणानुपपन्नं । प्रथमशाब्दबोधस्यापि पदवृत्तिमत्पदार्थविषयत्वात् । नन्वेवं दशरथपदवान्निति निर्धर्मितावच्छेदककप्र
तिसंधानस्य यदि संकेतसंसर्गावच्छिन्नदशरथपदप्रकारकत्वेन कारणता तर्हि सोऽदशरथपदवान्नवा वस्तुसंकेतसंस
र्गेण दशरथपदवत्त्वे स्यादिसंशयादौ पशाब्दबोधप्रसंगः । यदि च संकेतसंसर्गावच्छिन्नदशरथपदप्रकारताभिन्नप्रका
रत्वानिरूपितविशेष्यताकत्वेन तदा दशरथो दशरथपदवान्निति ग्रहजनिततथाविधान्वयबोधे व्यभिचारः । यदि च जन्य
तावच्छेदककुक्षावपि दशरथपदवृत्तिताइशावच्छेदकताभिन्नावच्छेदकत्वानिरूपकस्य तादृशदशरथपदावच्छिन्नविषयत्व राम
स्य प्रवेशः । तदा दशरथपदवान्निति निर्धर्मितावच्छेदकग्रहानंतरं इतरबाधाद्युपनीतपुरुषत्वराजत्वदशरथत्वाद्यवगाहिनो २२

न्वयबोधस्यानुपपत्यह इति चेन्न । इतरबाधाद्युपनीतधर्मस्य तत्र प्रकारत्वेपि तन्निष्ठविषयतानवच्छेदकत्वात् दशरथपदमात्रावच्छिन्न
विषयत्वस्याभिहितान्वयबोधेपि सत्त्वात् । एतेन गोपदस्य विशिष्य संकेताग्रहणकाले निर्धर्मितावच्छेदककगोपदप्रकारकज्ञाने
न जनितो गोपदवाच्यत्वलाघवेनतरबाधाद्युपनीतं गोत्वमप्यवगाहमानोन्वयबोधोपि व्याख्यातः तत्र गोत्वस्य प्रकारत्वेपि गोपद
वाच्यत्वावच्छिन्नविषयतानवच्छेदकत्वात् । अन्यथा हि गोत्वपदवाच्यत्वोभयप्रकारतानिरूपितविषयता गोत्वगोपदवाच्यत्वोभया
वच्छिन्नविषयता । अत एव तादृशस्थले गोत्वावच्छेदेन गोपदवाच्यत्वग्रहकारणतायाः न व्यभिचारो नापि सुरभिपदेन गोशाब्दबुद्धौ
जन्यमानायामितरबाधाद्युपनीतगोपदवाच्यत्वे इतरबाधाद्युपनीतस्याविषयतानवच्छेदकत्वात् । अत एवानुमितावपि विधेयां
शे लाघवाद्युपनीतो महानसीयत्वादिर्न विधेयतावच्छेदक इति । शुद्धवह्निमत्तासिद्धिकालेपि न तथाविधानुमितिः । न च तथावि
धानुमितिस्थले भिन्नविषयकप्रत्यक्षादिप्रतिबंधाय लाघवादिज्ञानघटितापृथक्सामग्री अवश्यं वदार्शनिकैरपि तादृशस्थ
ले विशेषणविशेष्यतावच्छेदकप्रकारकनिश्चयकारणत्वासद्वृत्तिमत्पदार्थोपस्थितेः करणत्वमुरीक्रियते । व्यभिचारपरि

द्वारायकोऽपिप्रकारआदरणीयः।नहिमयाविशेषणविशेष्यतावच्छेदकनिश्चयकारणत्वादन्यस्यपदवृत्तिमत्पदार्थोपस्थितेः
कारणत्वमुरीक्रियते।एवंकोशानुमानादिजनितपदधर्मिकपदार्थवाचकताग्रहस्यनसाक्षात्पदार्थशाब्दबोधोपयोगः।किंतु
पदार्थपदवाच्यताग्राहकमानांतरमुत्थाप्य यदि विशेषणविशेष्यतानवच्छेदकविशेषणाद्युभयवैशिष्ट्यावगाहिनिश्चयत्वेन
विशिष्टवैशिष्ट्यबुद्धौनकारणत्वसंभवस्तदावाचकताग्रहस्तुपदशा बुद्धावेसाक्षादुपयुज्यते।गामुच्चारयेत्यादौगोपदार्थवाचकाभि
त्वपदार्थवाचकंवागोपदंतत्कर्मकंत्वंतत्कर्तृकं।।आशंसाविषयउच्चारणमितिवाक्यार्थबोधेसंगतित्वसंसर्गावच्छिन्नगोत्वेन
वाकेनाप्यनवलीढयाप्रकारतयानिरूपितगोपदत्वावच्छिन्नविशेष्यताकत्वस्यनिरूपकंज्ञानमपेक्षणीयमितिन्यायदेवसिद्धमेवं
विलोमानुलोमवाच्यवाचकतायहेपोवपदार्थविशेष्यकस्यैववक्ष्यमाणत्वपदविशेष्यकस्याप्यन्वयबोधस्यात्पत्तोस्वरूपेश
व्दानांनलक्षणा नवास्वरूपवाच्यत्वावच्छिन्नेशक्त्यैवोत्पयबोधसंभवात्।अतएवविनैवलक्षणांवाजपेयपदवाच्ययाग राम
त्वादिनायागादेर्बोधइतिविधौव्युत्पादयिष्यते।अतएवघटपदामपदयोरेकपदव्यतिरेकप्रयुक्तान्वयाननुभवप्रयोजनव्य २३

तिरेकप्रतियोगिद्वितीयपदस्वरूपायाःपदांतराव्यवहितघटपदोत्तरत्वविशिष्टांपदस्वरूपायावाआकांक्षायाज्ञानस्यघटपदवा
च्यघटत्वावच्छिन्नप्रकारतानिरूपितांपदवाच्यकर्मत्वाद्यवच्छिन्नविशेष्यताकान्वयबुद्धिप्रतिजनकत्वंसुवचमन्यथाकलशाइ
तिजानामीदमितिनोपात्तकर्मणिकलशान्वयबोधेव्यभिचारवारणायप्रयासातिशयापत्तेः।घटद्वितीययोराकांक्षाज्ञानसत्वेपिक
र्मनामपदवाच्यमितिविपरीतबुद्धिसत्वेकर्मपदोपस्थापितेकर्मणिघटतादात्म्यान्वयापत्तेः।अमपदधर्मिकघटपदाकांक्षाज्ञान
स्यघटपदजन्यघटपदोपस्थित्यमपदजन्यकर्मोपस्थित्योःसकारितात्कल्पनेप्यमपदविषयककर्मपदज्ञानजनितेनकर्मस्मरणे
नतथाविधस्थलेघटकर्मसन्वयबोधस्यदुर्वारत्वात्।कर्मपदज्ञानत्वावच्छिन्नकारणतानिरूपितकार्यतावच्छेदकीभूतेनामपद
ज्ञानाव्यवहितोत्तरकर्मस्मरणत्वेनावलीढनमाकथमपिस्मरणवारणासंभवात्।संभवतिचतादृशस्थलेवाधग्रहकालेप्यनु
बुद्धःकर्मामपदवाच्यमित्याकारकःसंस्कारइतितज्जन्यत्वादिप्रवेशेनापितादृशसंस्काराव्यवहितोत्तरज्ञानस्यवारयितुमशक्य
त्वात्।एतेनयत्रपदेआकांक्षाग्रहस्तज्जनितापदार्थोपस्थितिःकारणमितिव्यक्तिभेदेनापिकार्यकारणभावोनिरस्तः।नचाम

प॰वा॰र॰ पदधार्मिकत्वेन घटपदधर्मिकेण वाकांक्षाज्ञानेन शाब्दिकमेतत्प्येकविधान्वयबुद्धिजनने परस्परं व्यभिचारः॥ त
२४ न्नदाकांक्षाविशिष्टपदवाच्यत्वेन पदार्थानामन्वयबुद्धित्वप्रवेशो चात्यंतिकानुभवविरोधादिति वाच्यं॥ घटपद
स्य बहुवर्णघटिततया तद्घटिताकांक्षायां द्विधाप्रवेशेन घटाकांक्षानिश्चयत्वस्य गुरुतया लघुना घटपदधर्मिकां
पदाकांक्षानिश्चयत्वेनैव तज्जनकत्वात् तद्व्यतिरेकेण फलानुत्पत्तेः॥ गोष्पद इत्यादौ तु प्रत्ययस्य बहुवर्णघटि
ततया तद्धर्मिक एव प्रकृताकांक्षानिश्चयः कारणं॥ गवामित्यादौ विनिगमनाविरहादुभयसत्वे एव शाब्दबो
धो नान्यदा॥ कृप्तकारणबाधे कार्यबाधस्य न्याय्यत्वात्॥ ननु तथापि विपरीतव्युत्पन्नानां मम घट इत्यादि
वाक्यादम घटोत्तरं घटपदमित्याकांक्षाज्ञानेन जनिते घटपदवाच्यघटाभिन्नमम पदवाच्यकर्मत्वान्वयबोधे व्यभिचार इ
ति चेन्न त्वद्व्यवहितपूर्वत्वादिकमाकांक्षा किं वाकांक्षाग्राहकं आकांक्षात्वनुगमपदव्यतिरेकप्रयुक्तो योऽन्वयबोधाभावस्तत्प्रयोज राम
कव्यतिरेकप्रतियोगिघटपदत्वं॥ प्रयुज्यते हि कारणाभावेन कार्याभावः॥ अन्वयबोधश्च घटपदवाच्यत्वावच्छिन्न २४

विषयतानिरूपितामपदवाच्यत्वावच्छिन्नविषयताको ग्राह्यः तेन घटरूपं पश्येत्यादौ विशिष्टशाब्दबोधप्रतियोगिका
भावविशेषं प्रति घटपदापदव्यतिरेकयोः प्रयोजकत्वेऽपि न घटकर्मेति शाब्दबोधः। आकांक्षाशरीरे च न प्रवृत्तिनिमित्तानां
घटकर्मत्वादीनां अन्वयविषयतया प्रवेशः। प्रयोजनविरहात् सकलपदार्थसाधारण्याकांक्षाया अभ्युपगमात् प्रवृत्तिज्ञाने
नैव पदार्थानामन्वयबोधे प्रतिनियमनासंभवाच्च। आकांक्षाज्ञानजन्यतावच्छेदकमपि तत्पदवाच्यत्वावच्छिन्नप्रकारतानिरू
पिता परपदवाच्यत्वावच्छिन्नविशेष्यताकान्वयबुद्धित्वं भिद्यते पुनराकांक्षान्वयभेदेन। अन्यथा सत्यामपि पदार्थोपस्थितौ
सर्वत्र सर्वसंसर्गेणान्वयबुद्धिप्रसंगात्। सेयमाकांक्षा प्रत्ययः परश्च। बङ्कुजपुरस्ताद्दिस्यादिभिरूपमियते नुमियते वा। परःप्र
त्ययप्रकृतिव्यतिरेकप्रयुक्तान्वयबोधाभावप्रयोजकव्यतिरेकप्रतियोगित्यतिदेशवाक्यार्थस्मारयता घटानुत्तरोमशब्द इति
प्रत्यक्षेणामशब्दे घटपदसाकांक्षत्वोपस्थितिजननस्यापि संभवात्। एवमेव कर्त्तरि कृदिति व्याकरणेन कृत्वोपलक्षीते कर्त्त
वाचकताग्रहानंतरं ण्वुलादौ कृत्वाग्रहात् इति देशवाक्यार्थे ण्वुलि कर्तृवाचकत्वमुपमित्या परिच्छिद्यते विपरीतव्युत्पन्नेऽस्त

प॰वा॰र॰ सेनाकांक्षापरिच्छिद्यतइति क्व्यभिचारः। स्याद्वा तादृशाकांक्षाज्ञानस्यानायत्यानदव्यवहितोत्तरत्वादिनान्यत्नावच्छेदकं।
२५ अतएवलस्यशक्यार्थसहस्रभेदेनाकांक्षाज्ञानकारणताभेदः। इत्थं च तल्लक्षणाज्ञानस्यापितल्लक्ष्यत्वेनतत्तदर्थविषयीणां
स्मृतिरेवतल्लक्ष्यार्थनुभवेहेतुः। शक्तिज्ञानतुल्ययोगक्षेमत्वात्। प्रतिपाद्यत्वमेववाशक्यत्वंलक्ष्यसाधारणमविशेषेणजन
कजन्यज्ञानयोर्विषयः। यदाहुरभियुक्ताः। ग्राह्यत्वंग्राहकत्वंचद्वेशक्तीतेजसोयथा। तथैवसर्वशब्दानामेतेपृथगवस्थिते। न
सोस्तिप्रत्ययोलोकेयः। शब्दानुगमादृते। अनुविद्धमिवज्ञानंसर्वंशब्देनदृश्यते। इत्यादितस्मात्। स्मरणंपदेनजनितंयद्वत्तिः
मनः पदार्थस्यान्वयबुद्धावर्थः। कथंनतादृक्परिस्फुरत्वितिव्याकुर्वते। अलंकारिकास्तु। व्यंजनयावृत्त्योपस्थितानांपदाना
मन्वयबुद्धौक्वचित्तादात्म्येनक्वचिद्वाच्यवाचकभावेनपदार्थानुप्रवेशः। तथाहि। दुयातिनिक्षासत्यंचयुक्तंत्यक्तुंनतुलया। अ
पवर्गव्यंजनानिकथंस्युर्भिमभूमिपे। इत्यत्रभीमाभिधानेराजनिप्रकृतेभिमपदः। मीपपदस्यव्यंजनालभ्यस्यतादात्म्यमाश्रित्यत
स्मिन्नपवर्गव्यंजनानामासन्नसिद्धिसूचकानांरयातितिक्षादीनांप्रस्तुतानीध्वननप्रातीनपवर्गेतरस्वरान्यवर्णाभिदेनाध्य २५

वसितानामसंभवकथंस्युरित्यनेनप्रतिपाद्यतेनप्राकरणप्राकरणिकयोरर्थयोः कोपिस्वारसिकोविरोधइतितदुपपादकतयागुणि
भूतमेवव्यंग्यं। तथाउदेतिसवितातांम्रस्ताम्रएवास्तमेतिसः। सपत्तौचविपत्तौचमहतामेकरूपतेत्यत्रविशेष्यस्यप्रकृतेनस्यतासामा
न्येनसमर्थनरूपेऽर्थान्तरन्यासेउदयस्यसंपत्तित्वेनास्तमयत्वस्यविपत्तित्वेनताम्रस्वरूपस्यचैकरूपताभावेनस्योपादानायताम्रप
दवाच्यस्ताम्रइतिताम्रपदद्वयजन्योबोधोगौणीकार्यः। रक्तपदोपादानेतुरक्तपदबोध्यत्वताम्रपदबोध्यत्वयोर्वैरूप्यादेकरूपतोपन्या
सायानप्रतीतिस्थागनस्यादनएवेतादृशस्थलेकथितपदंनदोषः। प्रस्तुतपदांतरअनुसादनमेव। नादृगेवास्तमेतिंचेतिसर्वनामश
ब्दोपादानेतुनपतीतिस्थगयति। सर्वनाम्नापदबोध्यत्वेनपरामर्शसंभवादिति। एवमेवसकलकलंपुरमेतज्जातंसंप्रतिसुधांशु
बिंबमिवेत्यादौसकलकलबोध्यत्वंविधुपुरयोः साधारणोधर्मः संभवतीत्याहुः। तदुभयमपिदर्शनविरोधादुपेक्षणीयं। नन्वेकपदज
नितयापदार्थस्मृत्यासहद्वितीयपदजनितायास्तस्यामेलकासंभवात्कथमुभाभ्यांपदार्थान्वयधीरितिचेत्। उच्यते। समूहालंबनस्मृ
त्यारूढयोः सव्यपक्षयोः। पदयोर्योगपद्येनस्मृतोर्थोऽन्वयमर्हति। प्रत्येकानुभवजनितादूयोर्वैरूप्याद्वास्मृतिः परस्परमपेक्षासमप्य

प॰वा॰र॰

२६

वगाहमाना अव्यवधानेन तावतः पदार्थान् स्मारयति। सा च स्मृतिः पदार्थान्वयविषयां। बुद्धिं जनयतीति किमनुपपन्नं। इति पदवाक्य
रत्नाकरे महामहोपाध्यायश्रीगोकुलनाथप्रणीते पदवृत्तिग्रहविवरणं॥१॥ ॥अन्वयबुद्धिविषयाणि मन्वयानां विभागः प्रस्तूयते। अभे
दो भेदश्चेत्येवमन्वयो द्विविधोऽर्थयोः। आद्यस्तत्रान्वयो नेष्टो निपातार्थेन कस्यचित्। पदार्थयोरन्वयो द्विविधोऽभेदो भेदश्च। तत्राभेदश्च प्रा
येण निपातार्थेन सार्धमितरस्य संसर्गतया न भासते। यल्लक्ष्मीरिव तेन विश्वमखिलमत्तं करोत्युन्मदाय त्सोकोत्तरश्चेष्टितैर्वरमणीवर्गो तदुन्न
ष्यते। यन्नोपप्लुतमेतिते न शिथिलेत्याख्यायते। तद्रूतिर्यज्जागर्ति नवासरोरुहमुखी तन्नाभिसर्तुं क्षमेत्यादौ। यदभिन्नं लक्ष्मीसादृश्यं त
द्धेतुकस्याखिलविश्वमत्तीकरणस्याश्रयः। यदभिन्नो लोकोत्तरचेष्टितान्यतादात्म्यव्यवच्छेदतद्धेतुकस्य रमणीवर्गावधिकस्योत्कर्षस्याधि
करणं सरोरुहमुखी यदभिन्नेनोपप्लुतभेदेन विशिष्टगमनकर्त्रुत्तरवृत्ति निमित्तकशिथिलाभिन्नाख्यानकर्मकं तद्गतिः। यदभिन्न
स्य जागरणतदभावकोटिकसंदेहस्य विषयः सा तत्प्रयुक्ताभिसरणक्षमत्वाभाववाहेनेमित्याकारकशाब्दबोधे यस्पदार्थाभेद इवेवन
ञ्चाकाराणां निपातानामर्थे भासत इति प्रायिकमेवेनत। यल्लक्ष्मीरिवेत्यादौ सरोरुहमुखीत्यनुषंगेणास्तीत्यध्याहारेण चलसरोरुहमु २६

खीकर्तृके लक्ष्मीसदृशास्ति। त्वेस्तेरर्थे यदिति द्वितीयांतक्रियाविशेषणार्थस्यान्वयो न तु निपातार्थ इति नित्यसक्रियवाक्यवादिनो वैयाकर
णाः। कात्यायनः। अस्तिर्भवंतिपरः प्रथमपुरुषेऽप्रयुज्यमानोऽप्यस्तीति भवंतिरिति भुवो रुजिस्यौ णादिकेणसूत्रेण प्रातिसिद्धो वर्त्तमानकाला
र्थको पि तद्वाचकत्वलक्षयालटस्पर। तेन प्रथमपुरुषे लडंतास्ति धातुरप्रयुज्यमानक्रियेवाक्ये नित्यमाध्याह्रत इति कात्यायनवाक्यार्थः।
सूत्रे भुव इति वदतेरवतेश्चोपलक्षणं। तेन वदंतिरवंतिश्चेत्यपि सिद्धं। णिचूप्रत्ययांताः सर्वे स्त्रियां द्वयोर्वा किंवदंति जनश्रुतिरिति दर्शनात्।
नाम्नो नाम्नो धातुनाम्नश्च विभक्त्यांतद्धितेन च। सामानाधिकरण्यं स्यात् किं वा नाम्नैव केवलं। तादात्म्यसंसर्गावच्छिन्नतत्पदार्थविषयतानिरूपि
तस्वार्थविषयताकबुद्धिजनकपदत्वं तेन पदेन सह तस्य सामानाधिकरण्यं। तत्र प्रथमं प्रातिपदिकेन सह प्रातिपदिकस्य। तदपि समानविभक्ति
कयोः समासांतर्गतयोरभेदापन्नयोश्च नाम्नोरिति त्रिविधं। तत्राद्यं यथा पुण्यजनप्रीतिकरी कुवलयदलकोमला कांतिः। कथमंधकारभवतः
सर्वेषां नयनहारिणी न स्यात्। अत्र सबाध्यस्यांधकारस्यारोपितनीलिमस्वरूपायां कांतौ सर्वेषां समर्थानां तादात्म्यनान्वयात् सामानाधिकर
ण्यं प्रातिपदिकानां। एवं नीलो घट इत्यत्र नीलघटपदयोरपि सामानाधिकरण्यमवसेयं। नीलघटपदयोः सामानाधिकरण्ये द्विविधाकांक्षा। ए

प·वा·र· कानीलप्रकारकघटविशेष्यताकबुद्धिव्यतिरेकप्रयोजकप्रतियोगिकत्वावच्छेदकप्रथमांतघटनीलोभयपदत्वस्वरूपा। द्वितीयाघटप्रका
२० रतानिरूपितनीलविशेष्यताकबुध्यभावघटिता। यादृशबुध्यभावघटिता या सा तादृशीमेव बुद्धिं प्रयोजयति। व्यंजते च विशेष्यपदस्य
विशेषणप्राथम्येन तदर्थकविशेष्यकबुद्धिं प्रति प्रयोजिकाकांक्षा। अतएव वन्हिमान्पर्वत इत्यादौ पर्वतविशेष्यकबुद्धिजनकाकांक्षाभा
वात्तदनभिव्यक्त्यान्न पर्वतविशेष्यका बुद्धिः विपरीतव्युत्पन्नानां तु व्यंजकांतराभिव्यक्ताकांक्षाज्ञानाद्भवत्येव। परंतु तादृशबुद्धितात्प
र्येण प्रयुक्तमिदं वाक्यमसाधु यज्ञकर्मणि प्रयोगानर्हमंत्रो न्यायेकाव्येतु तत्प्रयोगानर्हं। तादात्म्यसंसर्गकस्थले विशेष्यत्वमेवोद्देश्य
त्वं विशेषणत्वमेव विधेयत्वं। तदुद्देश्यकान्वयबुद्धिः तस्मिन्सिद्धत्वं विधेये चागंतुकत्वमुत्सर्गतो व्यंजयति। अतएव जातिगुणवाचि
नोः जातिवाचिनः प्राधान्यमिति कर्मधारयघटकनाम्पोर्वा पर्यनियामकः प्राचीनानां प्रवादः। अतएव न्यक्कारो ह्ययमेव मेयदर्थेरं
इति वाक्ये न्यक्कारस्य पूर्वसिद्धत्वध्वननेन गर्भभावापकर्षप्रसक्तिरित्यविमृष्टविधेयांशाख्यत्वं दोष इति रसविद्याविदः। अतएव विशे
ष्यनिघ्नपदस्य प्रातिपदिकांतरसामानाधिकरण्य एकलिंगबोधकसुबंतत्वं प्रायेणतंत्रं। अतएव नीलं घट इत्यादिर्न प्रयोगः। प्र २०

योगश्च पृथिवी घट इत्यादिः। यत्र च लिंगानन्वयिपदार्थद्वारकं पदार्थतादात्म्यमितरपदार्थे चेति। न साक्षात्तत्राजहल्लिंग
पदसमानाधिकरणेऽपि विशेषणनिघ्ने नियतं नपुंसकं। सामान्यविधिप्राप्तत्वात्। यथा क्षुदुपहंतृ शाक्यमित्यत्र हननकर्मणि
क्षुधि उपहननतदर्थशक्तिकर्मणतादात्म्येन साक्षादन्वयो बाधित इत्युपहंतेरर्थद्वारीकृत्यान्वयात्। सविशेषणे हीति
न्यायाल्लक्ष्यमिति सामान्येन नपुंसकनिर्देशः। अत्रोत्पत्त्यनुकूलो व्यापार उत्पादनाशकस्तत्कर्मोत्पाद्यत्वं तत्रपत्ययस्य
ध्वंसानुकूलो व्यापार उपहंतेः शाक्यार्थो न्वयिभावस्तादर्थ्यं वा तुमुनोर्थः। प्रधानधात्वर्थकर्मण्यभिन्ते गौणधात्वर्थक
र्मत्वमुपहननफलीभूतध्वंसान्वयि। प्रतियोगित्वस्वरूपं क्षुदनंतर प्रथमार्थः। भवतु वैतादृशस्थले उपहंतिनाफ
लविधेयोक्तस्य ध्वंसप्रथमांतप्रातिपदिकार्थे प्रतियोगितयान्वयः। पदभेदेनाकांक्षावैचित्र्यात्। दृश्यत घटो नीलो
भवतीत्यादेः प्रथमांतार्थस्य भवत्यर्थेन्वयः। हरिरप्याह। प्रधानेतरयोर्यत्र द्रव्यस्य क्रिययोः पृथक्। शक्तिर्गुणा
श्रया तत्र प्रधानमनुरुध्यते। प्रधानविषया शक्तिः प्रत्ययेनाभिधीयते। यदा तदा गुणे तद्वदनुक्तापि प्रतीयत

इति। यत्रैकस्य द्रव्यस्य गुणप्रधानभावापन्नक्रियाद्वयनिरूपितं शक्तिद्वयं कारकद्वयं पृथक्। तत्र गुणशक्तेरभिधा
नेपि प्रधानानुरोधिप्रधानकारकानभिधानप्रयुक्तं कार्यं भवत्येव। तेन पक्वमोदनं भुंक्ते पाचकेनौदनः। पक्वो भुज्य
ते इत्यादौ पच्यर्थकर्मकर्त्रोरभिधानेपि भुज्यर्थकर्मकर्त्रोरभिधानाद्द्वितीयातृतीये स्तपपदे। यदि तु प्रधानक्रिया
कारकं प्रत्ययेनाभिहितं। तदा तत्प्रत्ययार्थान्वितद्रव्ये गुणक्रियाकारकमनुक्तमपि प्रथमादिप्रत्ययलक्षणयासं
सर्गतया वा प्रतीयते। तथा पचता पक्त्वा वा भुज्यत ओदन इत्यत्र पाके ओदनकर्मकत्वं। पक्वमोदनं भुंक्ते इत्यत्र
पाके चैत्रकर्तृकत्वं संधाय शरेण हंतीत्यादौ संधाने शरकर्मकत्वं। आहूय ब्राह्मणाय ददातीत्यादावाह्वाने ब्रा
ह्मणकर्मकत्वं। आरुह्य वृक्षात्पततीत्यादावारोहणे वृक्षकर्मकत्वं। गत्वा ग्रामस्य स्थाता गत्वा ग्रामे तिष्ठतीत्या
दौ गमने ग्रामकर्मकत्वं। स्वीकारयितुं ब्राह्मणाय ददाति प्रतिदातुं ब्राह्मणाद्दत्त इत्यादौ स्वीकारे प्रतिदाने च ब्रा २८
ह्मणकर्मकत्वं च। पतित्वा वृक्षमवलंबत इत्यादौ वृक्षापादानकत्वं। स्थित्वा ग्राममीक्षत इत्यादौ स्थितौ ग्रामा

धिकरणकत्वं च। तद्वाचकत्वविभक्त्यभावेपि पदादन्वयविधया वा प्रतीयते। यत्र तु द्रव्यभेदस्तत्र प्रधानक्रियाकारकस्या
भिधानेपि गुणक्रियाकारकाभिधायकांतरमपेक्ष्यते। अत एव स्वरूपं पक्त्वौदनं भुज्यत इत्यादयो व्यवहारा इति संप्रदायः। क्षु
दुपहंतुं शक्यं पक्त्वौदनो भुज्यत इत्यादौ प्रथमांतपदानामुपहननकर्म क्षुत्पाककर्मौदनादौ लक्षणा। न तु प्रथमायाः क
र्मत्वमर्थो नुशासनिकत्वात्। नापि धात्वर्थप्रथमांतार्थयोर्भेदेनान्वयो व्युत्पन्नत्वात्। अत एव श्रुत्वाप्यर्थं नानुमतः कं
सेनार्थः। कुबुद्धिनेत्यादौ प्रधानक्रियाकर्मणः कृदभिहितत्वेपि श्रवणकर्माणि द्वितीया श्रवणमुपपद्यत इति नव्याः।
तच्चिंत्यं। क्त्वाप्रत्ययस्य समानकर्तृकत्वे कर्तरभिधानाच्चैत्रः पक्त्वा चैत्रेण भुज्यत इति प्रयोगस्य कुतो भावमात्राभिधा
यित्वे चैत्रेण पक्त्वा चैत्रो भुंक्त इति प्रयोगस्यापत्तेः। प्रथमया गुणक्रियाकारकाभिधानावश्यकत्वात्। श्रुत्वाप्यर्थमित्यादौ
श्रवणकर्मणो न क्रियाकारकमभिहितं तद्रूपावच्छिन्नान्वयि गुणक्रियाकारकमपि तद्रूपावच्छिन्नवाचकतत्पदसमपेक्षया वि

पु.वा.र. भक्त्याभिधीयत इतिसामान्यव्युत्पत्तिः।अतएवचैत्रत्वावच्छेदेनभोजनकर्तृत्वस्यस्वरूपत्वावच्छेदेनपाककर्तृत्वस्यचविवक्षा
२८ यामात्मनापक्त्वाचैत्रोभुंक्तइत्यादिकः प्रयोगोपिसूपपदः।अत्रकरणतृतीयेतिवदंति।एवंबहुव्रीहेरपिभिन्नलिंगपदस
मानाधिकरणस्यक्वचिन्नपुंसकंसाधु।अतएवतमःशांतिरवयदर्थंतदाहैतिप्रकाशः।यदृश्यमितिक्तिनंतत्राम्पर्यविशेष
णत्वात्।क्लीबद्वितीयांतमितिवस्तुगतिः।तस्मात्सामानाधिकरण्येपिभिन्नलिंगपदेपियत्।विशेष्यनिघ्नक्लीबत्वंतदन्यान्व
यमूलकं।एवंप्रातिपदिकयोःसमानाधिकरण्येवचनैक्यमपिप्रायेणतंत्रमतोनीलोघटःसुंदरोदाराःस्त्रीतप्रकृतिरापइत्या
दिप्रमाणं।येनप्रातिपदिपदिकेनसमभिव्याहृतायाविभक्तेरर्थोसंख्यासंख्यातत्समानाधिकरणपदार्थेविवक्षिता।तत्रस
मानाधिकरणप्रातिपदिकयोर्भिन्नवचनत्वमपिसाधु।साचसंख्याक्वचित्सदार्थेक्वचित्तदेकदेशान्वेतीतिद्विधा।उभयंयथा।निज्ञा २८
यज्ञोहिफालबद्धाश्चिकुराइत्यत्राचिकुरान्वयिबहुत्वं।उलपाछेतुंशाक्यमित्यादौशाकार्थव्यापारान्वयिचैकत्वं।बहूनामुलपाना

मेकव्यापारछेद्यत्वेनसौकर्यंविवक्षायांहितथाप्रयोगः।एवंव्युत्पत्तिःशक्तिरभ्यासइतित्रयोहेतुरित्यत्रफलोपधायकार्यकहेतुप
दार्थैकदेशाफलेएकत्वविवक्षायांहेतुरित्येकवचनं।तथैवदंडचक्रादिन्यायेनव्युत्पत्यादीनांपरस्परसहकारितालाभात्।एवंचैत्रो
मैत्रश्चसुंदरावित्यादौचैत्रएकत्वस्यद्वित्वविशिष्टसुंदराभेदस्यचोभयोरेकत्रद्वयमितिन्यायेनान्वयबुद्धौतात्पर्येप्रामाण्यमेक
त्वद्वित्वयोरेकविशिष्टेऽपरविशिष्टस्यबुद्धिरेवहिप्रतिषिध्यते।नत्वेकत्रद्वयन्यायेन।एकोद्वित्ववानितिप्रतीतिः सर्वजनीन
त्वात्।यत्रचैकवचनार्थोनविवक्षितःकांक्षाभिव्यज्जेत।यथानीलोत्पलादिकर्मधारयांतर्गतयोःप्रातिपदिकपदयोःसामाना
धिकरण्यं।तथापंकजपदादौतेनैववाक्यार्थमर्यादयोपस्थापितस्यपंकजनिकर्तुःसमुदायरूढ्योपस्थापितपद्मेनतादात्म्येना
न्वयात्तेनैवसहतस्यसामानाधिकरण्यं।तथाहि।पंकजचरमवर्णप्रत्यक्षस्मृताःपंकजनिडप्रत्ययाःसंस्कृतःपंकजसमुदा
यस्यभासं।द्वितीयक्षणेपंकजजननकर्तृपद्मानिकैचत्वारिस्मर्यंते।तृतीयेकलकपोतन्यायेन।चतुर्थेविशिष्टवैशिष्ट्यम

प॰वा॰र॰
३०

वगाहमानः। पंकजनिकर्तृपद्ममित्यन्वयबोधः। ततः पदांतरासत्तिस्तत्स्यस्वपदार्थस्मरणादिक्रमेणापूर्वानुभवविषयपं
कजनिकर्तृत्वप्रकारेणस्मृतस्यपद्मस्यान्वयबोधः। ननुकेवलस्यपंकजनिकर्तुः पद्मस्यवा॥ विशिष्टपडाडयोपिस्थि
तेः केवलान्वयबुद्धिं प्रत्यसमर्थत्वात्॥ अतएव केवलस्ययोगार्थस्यरूढ्यर्थस्यवोपस्थितयेलक्षणानेवपंक
जपदंगींकुर्वन्ति॥ यत्रतुकुमुदपदादिविषयिपयोधपंकजपदस्यकुमुदविषयिणीवापंकजनिकर्तुःस्यत्वाधिकर
णत्वविषयिणीवापद्मस्योपस्थितिस्तत्रविनापिलक्षणांकलयोगार्थरूढ्यर्थबाधकुमुदत्तादात्म्यस्यस्यलप्धत्तिस्त्वस्या
न्वयइतिमणिकृन्मतसारः॥ एवंधातुप्रातिपदिकयोरपिसामानाधिकरण्यंस्तोकंपचतिसुखमासातइत्यादौ॥ अत्रद्विती
यांतस्तोकादिपदार्थस्यपचाद्यर्थतादात्म्येनान्वयात्॥ अत्रधीत्वर्थफलान्वपिकमत्वेवकर्तुरीप्सिततमंकर्मेतिसूत्रस्या
भिरतासर्याभ्यामर्थः॥ अन्वयश्चाश्रयत्वमिवतादात्म्यमपि॥ तथाचविक्लित्त्यनुकूलव्यापारार्थपचधात्वर्थफलेविक्लित्ते राम
स्तोकस्य। स्थिरभूसंयोगानुकूलव्यापारार्थकासधात्वर्थफलेस्फिग्भूसंयोगेसुखपद च स्थित्ति नौतायाणे ३०

सुखसाधनस्यतादात्म्याच्चपविवक्षापायुज्यतएवकर्मसंज्ञाकर्मणिद्वितीयेतिजरद्वैयाकरणाः तन्न॥ तथास
तिद्वितीयायाइवकर्मणिलकारस्यापिप्रसंगात्॥ आस्यतेमासइतिवास्फूप्यतेसुखमित्यादिप्रयोगप्रसंगा
त्। स्फिग्भुवोः कर्मणो धात्वर्थांतर्गतत्वेपिसुखादिकर्मणोवास्तेः सकर्मकत्वेसुखमास्यतइतिभावलका
रादौलभ्यापत्तेः॥ नव्यास्तु धात्वर्थफलाश्रयत्वमेवकर्मत्वं॥ फलत्वंत्यापारभिन्नत्व। व्यापारत्वंचार्यनिर्वक्ष्यते॥ पचमर्थ
श्चविक्लित्तिरुत्पत्त्यावनुकूलोव्यापारः॥ धात्वर्थत्वंतुधातुजन्यप्रतीतिविषयत्वं। उत्पादकस्यसंसर्गत्वेणुत्पत्तेरव्याहतं। धात्व
र्थोत्पत्तिस्वरूपफलाधिकरणतयापिविक्लित्तिरपिपाककर्म। उक्तार्थानामप्रयोगाद्विक्लित्तिपचतीतितिनप्रयोगः। लक्ष्यो हिपचि
धातुनैवविक्लित्तिकर्मकः पाकस्तथाचफलांशमादायधातुनासमानाधिकरणेप्रातिपदिकेपिशोभनादौकर्मत्वानुबा
दिकाद्वितीया। ओदनेहयमोदनंपचतीत्यादौ तंहेयादिपदसमभिव्याहृतायाइवद्वितीयायास्तस्तद्विशिष्टार्थतपदत्वव्यंज
नीपाकांक्षाद्योतकतयातादा। त्म्यसंसर्गकबुद्ध्यनुपपत्तेगात्॥ अतएवाग्निहोत्रंजुहोतीत्यादौकर्मत्वेनभावनायामन्वि ती

प०वा०र० तस्यजुहोत्यर्थस्यनामधेयमग्निहोत्रपदंकर्मत्वानुवादकद्वितीयांतं। उद्भिदायजेतपशुकामइत्यत्रकरणतया
३१ भावनायमन्वितस्ययज्यर्थस्यनामधेयउद्भिदिकरणत्वानुवादकतृतीयांतत्वमितिमदर्दर्शनेसिद्धांतः॥ यदित्वव्रीहि
यमोदनंपचत्यग्निहोत्रंजुहोतीत्यादौविशेषणपदद्वितीयायास्तदात्म्यमर्थस्तदाप्रकृतेपितथा॥ यत्रतुसोमादि
व्यापारान्वयोविवक्षितस्तत्रप्रथमैवाज्ये। निष्टोमेनयजेतेत्यादिवत्तृतीयाकरणानुवादिका॥ नचैवमपिस्ता
कःपश्यतइतिकर्मणिलकारोदुरुभ्मइतिवाच्यं॥ अस्तीत्युत्सत्वस्यात्मधारणमुच्यतइतिनिरुक्तस्मृत्यास्तेरा
त्मधारणानुकूलव्यापारार्थकतयात्मनिधात्वर्थधारणफलवत्वपाकर्मणिलकारेणात्मा। भूयन
इतिसर्वमेतत्पिप्रयोगापत्तेः॥ अप्यात्मनःकर्मत्वेपिधात्वर्थान्तर्गतत्वाद्धातोश्चफलसमानाधि
करणव्यापारवाचित्वाद्दिकर्मकएवास्तिः॥ तथाचलः कर्मणिचभावेचाकर्मकेभ्यइत्य राम
त्राकर्मकेभ्योभावविधिनाकर्मणिलकारोबाध्यते॥ सकर्मकेभ्यस्त्व एवकर्मणि ३१

लविधिरास्थीयते॥ सकर्मकत्वंचफलाधिकरणावाचकत्वेसतिस्वार्थफलव्यधिकरणव्यापारवाचित्वं॥ तेन
शब्दाससनुकूलव्यापारवाचिनःशब्दायतेरर्थशब्दस्य॥ स्फिग्भूसंयोगानुकूलव्यापारवाचिनउप
विशतेरर्थेस्फिग्भवेरधःसंयोगफलकक्रियावाचितःपततेरर्थेधःपदार्थस्यसर्वावयवाधःसंयोगानु
कूलव्यापारवाचिनःशयतेरर्थेधःसंयोगयोरुदयागिरिसंयोगानुकूलव्यापारार्थकस्योदयतेरर्थेउदय
गिरेःमिद्धामनसोर्विभागस्यसंयोगस्यचानुकूलेव्यापारेशक्तस्यजागर्तेर्निद्रितश्चार्थेमिद्धोनेसोरवयवा म
नामपचयस्योपचयस्यचानुकूलेव्यापारेशक्तस्यक्षीयतेर्वर्द्धश्चार्थेःवयवानांप्राणैःसहशरीरस्य
संयोगविशेषंतदसंतध्वंसंप्रतिचानुकूलेव्यापारेशक्तस्यजीवतेर्म्रियतेश्चार्थेप्राणशरीरयोश्चतत्तद्धा
तूनांभवतेरर्थेव्यापारेतदर्थस्यफलस्यात्मधारणस्य॥ लज्जतेःस्वपतस्परमतेःसुखस्यसामानाधिक
रण्यात्तेषांगतिनिवृत्तिप्रवृत्तिमिच्छाध्वस्तंरूपविशेषंचाश्रित्यधत्ते। तिष्ठतिपततितिरोचतिनश्यतिदीप्य

पं॰वा॰र॰ तीनांस्वार्थफलाभावान्नसकर्मकत्वप्रसंगः॥ फलत्वं च मुख्यधात्वर्थव्यापारेण केनापि संसर्गेणा
३२ न्वितधात्वर्थत्वं॥ तेन विषयताविशिष्टज्ञानं जानाति रूढेश्यत्ताविशिष्टरागं इच्छति रूतस्यानुकूलयत्नं क
रोति चोध्यत्वविशिष्टद्वेषं द्वेष्टि॥ लौकिकविषयताविशिष्टचाक्षुषघ्राणजरासनचाक्षुषत्वाचश्राव
णसाक्षात्कारेषु च साक्षात्करोति जिघ्रति रसयति पश्यति स्पृशति शृणोतीनां विधेयताविशिष्टमनुमि
तिकृत्योरनुयात्मापाघस्योः सकर्मकत्वं निराबाधमत एव सुखत्वमिच्छति घटं करोति दुःखत्वं द्वेष्टि
तानीयनीतं गगनं साक्षात्करोति जिघ्रतिरस्यति पश्यति स्पृशति शृणोति वह्नित्वमनुमिमीते वह्निभाव
त्वमापादयतीति न प्रयोगः॥ परस्तु सुखवंतमात्मानमिच्छतीत्यादिकप्रयोगः॥ स च स्थालीं पचतीति प्र
योगेन तुल्ययोगक्षेमः॥ कर्मलकारोप्येवं॥ तेन दध्यानेति ध्वनं भक्ष्य तद्योचजन्म इति माघउपपद्यते राम
॥ येन व्यापारस्याधिकरणफलवत्ताधात्वनभिहितेन कर्मणा सकर्मको धातुस्तत्रैव कर्मणि लकारविधी 32
ण

यते॥ अन्यथा प्राणवियोगफलकव्यापारार्थकस्य हन्तेर्वियोगस्य द्विनिरूप्यत्वेनैकस्मिन्नधिकरणेधा
त्वभिहितेप्यधिकरणांतराकांक्षाया अविच्छेदात्॥ चैत्राहन्यन्त इतिवत्॥ प्राणा हन्यंत इति प्रयोगः स्यात्
॥ प्रकृते तु भूप्रभृतिर्द्वेशकालभावगतव्याप्ताभिः सकर्मकोपि फलाधिकरणेनात्मना कर्मणा न सकर्मक इति
कथं तत्र कर्मणि लकारः प्रसज्यते॥ येनात्माभूयत इति प्रयोगापादनं संभवतीति चेत्सत्यं॥ एवं फलस्य क
र्मत्वेपि धातुनाभिधानात्तेन कर्मणा सकर्मकत्वाभावात्तत्र लकारः कथं प्रसज्यते॥ येन स्तोकः पच्यत इत्यादिप्रयु
ज्यते॥ द्वितीया तु तेन कर्मणा धातोः सकर्मकत्वमपेक्षते॥ अत एव तारं शब्दायते॥ दीर्घमस्तीत्यादौ द्वितीयाधा
त्वर्थतिरस्कृतकर्मणः शब्दस्यादिविशेषणे कर्मानुवादिकं दृश्यते॥ साचेयं द्वितीया विशेष्यनिष्ठप्रातिप
दिकसमभिव्याहृतानां चेन्नियतक्लीबलिंगाभिव्यंजिका सामान्ये नपुंसकस्यैव साधुत्वात्॥ नियतलिंगसमभि
व्याहृताचेल्लिंगस्यागानुशासनाभावात्तल्लिंगाभिव्यंजिकैव॥ अत एवादिपचतिन्द्रुतिहृद्रुं पचतीत्यादियः प्र

प० वा० र० ३३ योगाः॥ अथ भिन्नां द्रुतिहेतुत्वसिन्नां विक्लित्तिं बोधयतेतारय्यत्न इति क्रियान्वयिफलविशेषणानां कर्मानुवादि
कविक्लित्तिव्यापारयोः संसर्गो भिन्नं तस्य कर्मत्वस्य प्रापिकाद्वितीयेति शाब्दिकाः प्राहुः॥ तच्चिंत्यं विशेषणास्
पां विशेष्यान्वयाकांक्षाव्यंजकत्वेन॥ विशेषणं विशेष्येण बहुलमिति॥ सविभक्तिकस्य विशेषणस्य क
र्मधारयानुशासनसिद्धत्वेन च साधुत्वात्॥ विनानुशासनं क्रियाविशेषणाद्वितीयायाऽसंभवात्॥ न
हि द्वितीयाव्यंजित्तेवक्रियाविशेषणस्य धातुना सहाकांक्षा॥ ज्योतिष्टोमेन यजेत वलित्तं गच्छतीत्यादौ
तृतीयाप्रथमयोरपि दर्शनात् विनाविशेषविधिप्रातिपादिकार्थमात्रे प्रथमा त्यागायोगात्॥ फलव्या
पारयोः कर्मकर्मिभावस्य संसर्गमर्यादयैव लाभे द्वितीयायास्तदनुवादकत्वस्यानपेक्षणाच्च॥ तस्मात्फलवि
नर शेषणानामनुशासनबलसिद्धेवायपदद्वितीया॥ नकारकार्थिके तिन स्तोकः पच्यत इति कर्मणि लकारः॥ राम
अनुशासनं च॥ उभसर्वतसोः कार्याधिगुपर्यादिषु त्रिषु॥ द्वितीयाम्रेडितांतेषु ततोन्यत्रापि दृश्यते इ ३३

क
ति उभयतो ग्रामं सर्वतो ग्रामं॥ धिग् पिशुनं॥ मेघानुपर्युपरि॥ पयोधरानधोधो॥ गगनमध्यधीत्यादेर
द्र न्यत्रापि क्वचिद्द्वितीयास्यादित्यर्थकफले वा व्यापारे वा धात्वर्थतादात्म्येनान्वितस्य प्रातिपदिकस्य द्वि
तीयां विधत्ते॥ न तु व्यापारविशेषणस्य प्रथमां तत्त्वयुक्तं॥ फलहेतुः पचती चैत्र इत्यादिप्रयोगापत्तेरि
ति वस्तुगतिः॥ तस्मात्॥ प्रायेण क्लीवलिंगं यत्स्वार्थस्य विशेषणं॥ आनुशासनकी तत्र द्वितीयाप्यत्र
दि दर्शनात्॥ एवं विभक्त्यासहप्रातिपदिकस्य सामानाधिकरण्यं॥ द्रोणो व्रीहिरेक प्रस्थ द्वे च स्तुषी त्र
ति: योऽन्यरस्यादौ प्रादेशः कुशोऽरत्निः कुंडमित्यादौ च गुरुत्वलेन संख्यात्वेन परिमाणत्वेन वावच्छिन्न
मभिदधत्याः प्रथमायाऽर्थे द्रोणादेर्गुणमतिदधातोऽर्थस्तादात्म्येनान्वेति॥ प्रथमार्थस्तु सैत्रप रि
माणपदस्य तत्त्रेणा गुरुत्वस्याप्युपस्थापकत्वात्॥ गुरुत्वे चोदेभेदेन व्रीह्यादौ॥ न हि द्रोणादेरर्थस्य स्त
थान्वेतुमर्हति॥ प्रातिपदिकार्थयोर्भेदेनान्वयस्याव्युत्पन्नत्वात्॥ एवमाख्यातेन कर्तृकर्माभिधापि
र

प० वा० र० नाप्रथमांतचैत्रौदनादेः सामानाधिकरण्यमतएववायुर्भूम्यादिसमानाधिकरणेस्यानित्यपिमध्यइतिसौ
३४ त्राव्यवहारइतिदीधितिकाः ॥ तदुभयमपिचिंत्यं ॥ एवंस्वरूपार्थकस्यतल्ःकमप्रत्ययाहितस्यार्थे ॥ देवस्य
क यार्थस्यचान्वयात् ॥ देवतापावकइत्यादौतद्धितेनापिप्रातिपदिकस्यसामानाधिकरण्यं ॥ स्वरूपत्वेन
गगनाभावादिरखंडोधर्मस्तादृशानांप्रत्ययानांप्रवृत्तिनिमित्तंनपुनरनर्थकएवतल्रादिरागम
व्यावृत्तस्यप्रत्ययत्वस्यसार्थकत्वघटितत्वादितिवदंति ॥ अन्येतुप्रातिपदिकयोरव्यवधानमेव
सामानाधिकरण्येतंत्रं ॥ यथानीलोघटइत्यादौ ॥ विभक्त्याव्यवहितयोस्तुप्रातिपदिकयोर्विभक्त्य
र्थएवान्वयः ॥ नीलोघटइत्यादौनीलपदसमभिव्याहृतविभक्त्यर्थेघटान्वयिन्यभेदेनीलादेरन्वयः ॥ न
चास्मदादौविभक्तेरनुशासनदौर्लभ्यंशंक्यं ॥ प्रातिपदिकार्थलिंगपरिमाणवचनमात्रेप्रथमेतिसूत्रस्य राम
प्रथमायांकंठतोविभक्त्यंतरेमात्रयहणासामर्थ्यात्प्रातिपदिकार्थवाचकत्वव्यवस्थापकत्वात् ॥ प्राति ३४

पदिकार्थश्चयेनरूपेणप्रातिपदिकादुपस्थितस्तद्रूपावच्छिन्नेभेदंविभक्तिर्बोधयेदन्यथैकधर्मावच्छिन्ने
योरन्वयोनिराकांक्षत्वप्रसंगात् ॥ तच्चरूपं ॥ स्वरूपभेदाभावत्वं ॥ प्रातिपदिकार्थव्यक्तिस्वरूपभेदोहि
छा३ हिनिरवच्छिन्नतत्तद्व्यक्तिवृत्तिप्रतियोगिताकस्तदभावश्चप्रतियोगिस्वरूपएव ॥ तत्रैवान्योन्याभावस्याभा
वः ॥ प्रतियोगिविशेषणधर्मस्वरूपे । यत्रप्रतियोग्यननुगतोनुगतश्चप्रतियोगितावच्छेदकोधर्मइति
निपुणतरमुपपादितंदीधितिकाप्रविवरणे ॥ वक्ष्यतेचोपरिष्टात् ॥ घटाभावेघटाभावत्वस्वरूपेस्व
रूपभेदाभावस्याधाराधेयभावस्याभ्युपगमेप्यात्माश्रयोपधानदोषस्तथात्रैवानुसंधेयं ॥ अ
न्यथाप्रतियोगितावच्छेदकस्वरूपेन्योन्याभावस्याभावेऽन्योन्याभावभेदाधिकरणस्वरूपःकथमा
धाराधेयभावोनवत्तेत ॥ अन्योन्याभावान्योन्याभावस्याधिकरणभेदाभ्युपगमेनवस्थाप्रसंगात् ॥
ननुतथापिविशेषणविभक्तेर्भेदत्वावच्छिन्नप्रतियोगिताकाभावत्वंभेदप्रतियोगिकाभावत्वेनीलभेद
गिता

८२ अत्र

प॰वा॰र॰ त्वावच्छिन्नप्रतियोगिताकाभावत्वं चाशक्यतावच्छेदकं ॥ आद्ये ऽप्रसिद्धिः ॥ द्वितीये । पीतेऽपि नीलोघ
३५ ट इति प्रयोगप्रसंगः ॥ नीलश्चे घटो नाभयाप्त । चाद्देः पीतेऽपि सत्त्वात् ॥ तृतीये ऽशक्यानंत्ये ॥ नीलघट
व्यक्तितात्पर्येण नीलो घट इति वाक्यस्य प्रामाण्यप्रसंगश्चेति चेन्न ॥ भेदसंसर्गताभावे च विभक्तेः पृथक्
शक्तिस्वीकारात् ॥ नीलो घट इत्यत्र नीलत्वोपलक्षितनीलव्यक्तिर्भेदो भेदस्तु तद्व्यक्तिस्वरूपावच्छि
न्नप्रतियोगित्वाऽभावेऽन्वेतीत्यनुपपत्तिविरहात् ॥ प्रतियोगितावच्छेदकविशेषणतयाऽभासमानो ध
र्मः प्रतियोगितावच्छेदकतावच्छेदकतयापि संसर्गतया नियमतो गृह्यत इति पुनरप्रामाणिकं ॥ भवतु
वा उभयावृत्तित्वोपलक्षितधर्मावच्छिन्नप्रतियोगिताकान्योन्याभावे संसर्गताभावे चाखंडशक्तिः ॥ स्मर
णं तु सर्वनामन्यायेनोपलक्षणमुभयावृत्तित्वमपहाय याव्यक्तिः प्रातिपदिकेनोपस्थापिता तास्वरू राम
पत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकत्वेनान्योन्याभावमवगाहत इत्यसंसर्गताभावविशेषणतयाऽनुभा ३५

वयतीति चेति नीलपदस्य प्रातिपदिकेन स्मरणान्नीलो घट इति बुद्धेरप्रामाण्यमुपपद्यते ॥ तादृशाभेदे वि
शेषणतया नीलाद्यन्वितघटस्य विशेष्यतयान्वयस्वीकारात् । प्रकारतयाऽन्वप्रतियोगितावच्छेदकभा
नं न प्रतियोगितावच्छेदकविशेषणावच्छिन्नभाननियमः ॥ अशुद्धवह्नित्वावच्छिन्नप्रतियोगिताकाभावस्य
साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकधर्मावच्छिन्नप्रतियोगितावच्छेदकत्वेनोल्लेखदर्शनात् ॥ अत
नोभयावृत्तित्वोपलक्षिततत्तद्व्यक्तित्वस्वरूपभेदप्रतियोगितावच्छेदकत्वग्रहणासंभवाद्विभक्तिशक्तिग्रह
नुपपत्तिः ॥ नन्वेवमभेदे विभक्तेर्वृत्त्यादिकल्पनापेक्षया लाघवान्निरूढाभेदसांसर्गिकैवान्वयबुद्धिरभ्युपेतुमु
चिता । प्रातिपदिकार्थमात्रे प्रथमेति सूत्रे मात्रपदार्थैकदेशैः प्रातिपदिकाद्यर्थातिरिक्तानर्थकत्वमात्रं विवक्षितं
नतु प्रातिपदिकाद्यर्थार्थकत्वमपि । अन्यलभ्ये शक्तेरकल्पनादिति चेन्न । अभेदसंसर्गे प्रातिपदिकार्थयोरन्वयांगी स२
कारे हि स्वं तन्नीलपदेन सहस्वंतघटपदस्य पौर्वापर्यस्वरूपाया आकांक्षाया ऽस्त्वद्व्यंग्याया वा कांक्षायाः प्रयोजकत्व
या

प॰ वा॰ र॰ स्वीकारेगौरवमधिकवर्णघटितत्वादभेदस्यपदार्थतावादेतुनीलपदस्यसुनासहनीलप्रकारकाभेदविशेष्यक
३६ बुद्धौतेनसुनासहस्वंतत्घटपदस्याभेदप्रकारकघटविशेष्यकबुद्धावाकांक्षाद्वयस्यप्रयोजकत्वस्वीकारेलाघ
वं।नीलघटयोरेकत्राकांक्षायामप्रवेशोनतयोर्विशेषणविशेष्यभावव्यत्यासप्रयुक्ताकांक्षाधीकारणताभेदाभा
नात्।नचैवंघटोनीलइतिवाक्यादिवनीलोघटइतिवाक्यादपिघटमुद्दिश्यनीलाभेदविधेयकस्यवाक्यार्थबो
धस्यप्रसंगेनप्रथमान्तघटपदोत्तरत्वविशिष्टत्वतथाविधनीलपदत्वव्यंग्यायाआकांक्षायास्तथाविधबुद्धौप्रयोज
वै४ कत्वध्रौव्यकुल्लापवाचकाशा इति वाच्यं।नीलप्रकारकाभेदविशेष्यकबुद्धौनीलोत्तरसुत्वाभिव्यंग्याकांक्षा
याअभेदविधेयकघटविशेष्यकबुद्धौसुपूर्वत्वंतत्घटपदत्वव्यंग्याकांक्षायाःप्रयोजकत्वद्वयस्वीकारेणैवचरि
तार्थत्वात्।यद्यपिनीलोघटःपटःशुक्लइत्यत्राप्यभेदेनीलान्वयस्यघटेचाभेदान्वयस्यप्रयोजिकानीलो राम
त्तरसुत्वेनघटपदानन्तरसुपूर्वत्वेनचाभिव्यंग्याकांक्षावर्ततएवेतिघटमुद्दिश्यनीलाभेदविधिर्दुर्वारइतिसर्वम ३६

तेपिप्रथमान्तविशेषयोरेवपौर्वापर्याभिव्यंग्याकांक्षेतिविभाव्यते॥तदाप्यभेदस्यपदार्थत्वेतथाप्रकारत्वमेव
युक्तंतेनतुसंसर्गत्वं।तथासतिक्षुधमुपहन्तुंशाकंशरीरीदृष्टःशिखीविनष्टःसुरभिचंदनमाघ्रातंनिर्धनःसांच
जन्यःकृतोवन्हिमत्पर्वतोनुमितइत्यादावुपहननतदर्थशाकाभावस्यनाशप्रतियोगिनोदर्शनस्याघ्राणस्यश्र घ्रा
वणस्यलौकिकविषयस्यानुमितिविधेयस्यचाक्षुधिशरीरिणिजीवेशिखिनिचंदनेपांचजन्येपर्वतेचतादात्म्य
बाधादन्वयापत्तेः।स्वतादात्म्योपहननकर्मत्वादिसंसर्गेणान्वयस्वीकारेसामानाधिकरण्याभावादेकविभक्तिक
त्वाभिधानानुपपत्तेः।पदार्थभूतस्तुशाकदृष्टविनष्टाघ्रातकृतानुमितानामभेदःस्वाश्रयोपहननशिखाशरीरि
सौरस्यानिध्वानवन्हिद्वाराक्षुदादावन्वयमुपलभमानोनयोग्यतांनवासामानाधिकरण्यंव्याहन्ति।येनकेनापिसं
सर्गेणैकतरपदार्थाभेदविशिष्टस्यापरपदार्थस्यबोधकयोरेवपदयोःसामानाधिकरण्यात्।कर्मधारयावयव
योःसामानाधिकरण्यव्यवहारोगौणः।अतएवाप्रगृह्यइत्यत्रप्रथमोपात्तप्रगृह्याभेदोनिपातार्थेस्वरूपेणान्वेति।

अभेदेन तयोरन्वयबोधोपगमे कर्मधारयस्यापि प्रसंगात्। न चाव्ययीभावविधिनापवादः। समीपसमयाद्यपरिगणितातिरिक्तस्वरूपार्थे वर्त्तमानस्य आङ् इति निपातस्याव्ययीभावविध्यविषयत्वात्। आङ् एव मर्यादाभिविध्योरव्ययीभावविधानात्॥ एवं स्तोकं पचतीत्यादौ द्वितीयार्थो भेदः॥ मात्रपदसामर्थ्येऽपि प्रातिपदिकार्थे द्वितीयायाअपि साधुत्वादन्यथा क्रियाविशेषणाद्वितीयायाः। अकारकविभक्तित्वेस्तोकं नम्रेति विग्रहे स्तोकनम्रेति तत्पुरुषानुपपत्तेः॥ विशेषविधिं विना अकारकद्वितीयया समासस्यासाधुत्वात्। न चायं कर्मधारयो विरुद्धविभक्तिकयोः कर्मधारयायोगात्। एवं द्रोणो व्रीहिरित्यादौ द्रोणपदं द्रोणपरिमितेवाचकं लाक्षणिकं वा। प्रथमान्तु प्रातिपदिकार्थमात्रे दमस्ति धत्ते। न तु परिमाणे। प्रमाणाभावादन्यलभ्येसूत्रस्य प्रत्याख्येयत्वात्। अन्यथा द्रोणं न क्रीणातीत्यादौ करणत्वस्यानन्वयापत्तेः। प्रातिपदिकार्थपरिमाणेत्तस्य बाधात्॥ द्रव्यस्य चापदार्थत्वा
त्। एतेन सुपां वचनवाचिनापि प्रसक्ता। एकवचनत्वादिना तत्प्रतिपाद्यासंख्याभेदेनैव प्रातिपदिकार्थेन्वे

ति। तद्धितस्थलेऽपि योदेवदत्तेत्यादौ अनर्थक एवेति कथं तस्य प्रकृतिसामानाधिकरण्यं। यथा चानर्थकानामपि सार्थकजातीयत्वेन प्रसयत्वं तथास्य स्पष्टमुपरिष्टात्॥ अत एव देवपर्याये देवत्तापदगणनमप्युपपद्यत इति समासांतर्गतस्य प्रातिपदिकस्येव प्रातिपदिकेन सामानाधिकरण्यं न तु शाब्दोत्तरस्य प्रातिपदिकार्थे वर्त्तमाना विभक्तिरपि भेदाभावत्वविशिष्टे स्वार्थे प्रकृत्यर्थस्याधाराधेयभावमेवायगाहते तेनाभेदसम्भिन्नेयोरप्यभावत्वेनात्माश्रयस्याकरे स्वहस्तिकत्वादिति प्राक्तस्तदग्रे विवेचयिष्यामः। इति महामहोपाध्यायश्रीगोकुलनाथशर्मप्रणीतपदवाक्यरत्नाकरे भेदान्वयविवरणप्रकरणं॥ २॥ नाम्नां सुपस्तद्धितानि निपाताः कादयः कृञादयः। भेदान्वये व्युत्पत्तेतिङ् नामेति तु केचन। भेदेन नामार्थप्रकारकान्वयबुद्धावुपयोगिनी सुपामाकाङ्क्षा। सुपो हि स्वार्थसंबोध्यत्वकर्मत्वकरणत्वसंप्रदानत्वापादानत्वसंबंधत्वाधिकरणत्वादिषु प्रातिपदिकार्थसंबंधं बोधयन्तोनामभिरव्यवहितोत्तरत्वेनापेक्ष्यन्ते। तथा तद्धितानि। अणादयः जादीनि स्वार्थे अपत्यत्वत्वादौ प्रातिपदिकार्थस्य भेदेनान्वयबुद्धि

प॰ बा॰ र॰ मारधति।प्रातिपदिकैःकश्चित्पूर्वत्वेनकश्चिदुत्तरत्वेनाकांक्ष्यंते।एवंनिपातानञ्नञ्वादयःस्वार्थेऽभावसादृश्या
३८ दौप्रातिपदिकार्थस्यसेदोऽन्वयंबोधयंति।तथाक्यङ्क्यजादयोधात्वर्थप्रत्ययाःस्वार्थेप्रातिपदिकार्थस्यैतदन्
न्वयंबोधयंतःप्रातिपदिकैरप्यपेक्ष्यंते।तथाहि।पुत्रीयतिगव्यतिनाव्यतिदीव्यतीत्यादौपुत्रगोनौदिवांक्यजर्थेइच्छा
यांप्रकृत्यर्थतावच्छेदकावच्छिन्नायाःस्वत्वोद्देश्यतानिरूपितविषयतात्वयासंसर्गेणान्वयः।पुत्रःस्वंभवत्वित्या
कारकेच्छायाःस्वत्वस्योद्देश्यतयाहिनिरूप्यतेपुत्रत्वावच्छिन्नाविशेष्यतास्वत्ववृत्तिविषयतापिसमभिव्याहृ
रत्वान्यकर्तृपुरुषनिष्ठत्वव्यक्तित्वावच्छिन्नप्रकारतानिरूपितेचग्राह्या।तेनभ्रातुःपुत्रमिच्छतीत्यर्थेभ्रातुःपु
त्रीयतीतिनप्रयोगः।अतएवसुपआत्मनःक्यजित्यत्रआत्मनइतिसंसर्गविशेषप्रापकमेव।आत्मनः भा॰
पुत्रीयतीत्यादावात्मनइतिसंसर्गलाभार्थमनुवादः।आत्मनइतिपदंपुत्रादिसाकांक्षेप्रयुज्यमानेवाक्ये १
ऽभावतीत्यनुशासनार्थमित्यपिकेचित्।पुत्रःपितरिगोःस्वामिनिचात्मनिपुत्रगोपदयोर्लक्षणा।तथाचपु राम
३८

त्रःपितरंगोःस्वामिनमात्मानमिच्छतीतिपुत्रीयतिगव्यतीत्यादेरर्थइत्यपरे।अशनायतिउदन्यतिधनायतीत्या
दौबुभुक्षापिपासालिप्सासुक्यजर्थेषुकर्मद्रव्यस्याशनस्योदकस्यधनस्यचान्वयः।अशनायोदन्यधनायाबु
भुक्षापिपासागर्धेष्वितिसूत्रेबुभुक्षात्वादेरेवक्यचःप्रवृत्तिनिमित्तत्वलाभात्।भोजनसमानकर्तृकतदिच्छास्वरू
पबुभुक्षादिपर्यायाणांक्यजामर्थेव्यधिकरणभोजनादेरन्वयासंभवात्।परस्याशनायतीत्यादिकेनप्रयोगः
क्षीरस्यतिबालोलवणस्यत्युष्ट्रोदधिस्यतिदध्यतिवावृषभोमधुस्यतिमध्वस्यतिभ्रमरइत्यादौसुगसुगाग
मापसंदानेतस्यक्यजोऽर्थेधारापन्नेच्छास्वरूपलालसायांक्षीरादेःकर्मतयाऽन्वयः।अश्वस्यतिवडवा।वृषस्य
तिगौरित्यादौमैथुनेच्छायांक्यचःशक्तिःमैथुनकर्तृतयाश्वस्येच्छायांप्रकारितयामैथुनस्यान्वयादश्वकर्तृकमै
थुनप्रकारकेच्छावतीवडवाइत्याद्यन्वयबोधनफलन्तोऽश्वोमैथुनंकरोत्वितीच्छालाभः।मैथुनस्येच्छान्वयेमै
थुनत्वावच्छिन्नप्रकारतायाएवसंसर्गत्वात्।मैथुनेऽश्वकर्तृकस्योपरंजकत्वात्।अस्तु।मैथुनप्रकारकेच्छायांकर्म

प० बा० र० तया अभ्याचय इतितन्न। तथासति धात्वर्थान्तर्भूतकर्मकत्वेनशब्दायते रिवाश्वस्यते रप्यकर्मकत्वापत्तेः। त
३९ याचौर विरथहयानश्वस्यंति ध्रुवं वडवावलप्राप्ति वल्लचलावस्थाभिनः समीक्ष्यसमीयगान। निरूपरि वृढंगा
ढप्रेमारथ्यांग विहंगमिस्मरशरपराभूतस्वात्म वृषस्यति संप्रति इति निषेधचरित्तप्रयोगोपि व्याहन्येता यदि
कर्तृतयामैथुनेश्वस्यमैथुनस्यचरणात्तया इच्छायामन्वयस्तदाकर्मणोनभिधायुस्यंते एवहेयेन्यो द्वितीयापि
सक्तिः। स्वकर्तव्यत्वेनपाकमिच्छतिस्वेनपाकं चिकीर्षतीतिवत्। अश्वस्यति वृषस्यंतीधातू कामेरूढौ। अत
वृषस्यंतीतु कामुकीत्यमरः। कामुकीपर्याये वृषस्यंतीमगयायत। जारं वृषस्यति कामुकीतिप्राचः प्रयु
जंत इत्यपि वदंति। सूतेनक्यचू पर्यायोयत्राः काम्यन्ति पुत्रं काम्यति सर्पिष्काम्यति किंकाम्यति स्वःकाम्य
वृत्र२ तीत्यादौ काम्यत्यस्योपिव्याख्यातः। मांतादव्ययगाच्चक्यचोनिषेधेपिकाम्यचस्तदभावात्। किम्यतिस्वुर्यती राम
तिवत् किंकाम्यति स्वःकाम्यतीतिप्रयोगेप्यसाधुत्वायोगात्। तथा। पुत्रीयति पौरं निशांतीयति रणे इ ३९

त्वा
त्यादावाचारसदृशौरस्यवक्तर्यस्यैकादेशोप्रथमाचारपुत्रादेः कर्मतयानिशांतादेरधिकरणतया अन्वयः।
प्रथमाचारस्य कर्मण्यधिकरणेपि। चाभिहितेद्वितीयाचारकर्माधिकरणयोरनभिधानात्पौरे रणेवद्वितीया
सप्तम्यौ। आचारश्चात्रसंवर्द्धनविहारादिः सर्वनामन्यायेन शक्यस्तेन पुत्रकर्मकसंवर्द्धनसदृशपौरकर्म
कसंवर्द्धनानुकूलायाः निशांताधिकरणकविहारसदृशरणाधिकरणकविहारानुकूलायाः रेने पतिकर्तृक
भावनायालाभः। रसिकास्तु। क्यच आचारश्चसंवर्द्धनत्वविहारत्वादिः प्रातिस्विकधर्मावच्छिन्न एव सर्वनामन्या
येन शक्यः। तस्यच व्युत्पत्तिवैचित्र्यात्सादृश्यसंसर्गेण तद्धर्मावच्छिन्न एवान्वयः। अत एव पुत्रीयति शा
त्रुमित्सादृशत्रुकर्मकताडनेपुत्रकर्मकस्यसंवर्द्धनस्यन सादृश्येनान्वयः। विभिन्नरूपावलीढयोरन्वयेक
चः सामार्थ्यविरहात्। तद्धर्मस्वरूपमेवात्रसादृश्यं। अत एव वादे लोपेसमासेसाकर्माधारक्यचि क्यङिः। कर्मक
र्त्रोर्णमुल्लेत्राद्वि लोपेद्विपिसमासगा इतिकारिकयानिर्दिष्टासादृश्यवाचकलुप्तोपमा। पौरं सुतीयति मुहुः स

प॰ वा॰ र॰ मरंगणोसावंतःपुरीयतिस्यत्रोदाहृता। अन्यथा क्यचः सादृश्यवाचकत्वेतल्लोपोदाहरणमसंगतं नवेदिस्या
४० हुः। वस्तुतस्तु। पुत्रपदं पुत्रकर्मकनिशांतपदं निशांताधिकरणके। आचारे निरूढलाक्षणिके। तदर्थउपमा
नोपमेयभावेन संसर्गः। क्यजर्थ आचारेन्वेति। अतएवोपमानादाचारे अधिकरणाच्चेति वक्तव्यमित्यनुशास
नक्यचः प्रकृतेरुपमानपदत्वं निरूढलक्षणालभ्याचारविशेषणकर्माधिकरणार्थकत्वं। क्यचश्चाचारमात्रवा
चकत्वमुक्तं संगच्छते संभवतिचक्यङः क्यचोरैक्यरूप्येणाख्यत्वेनैवाचोरत्वात्। कः कर्तेराचारस्य तत्कर्मक चो॰४
तदधिकरणकान्यतरस्यैवप्रतिपादने सामर्थ्यमनुशासनस्यनियमार्थत्वात्। एतेन वन्हिकणकर्तृकाचार
सदृशाचारकर्तृत्वपरिघकरणकाचारसदृशबहुकरणकाचारकर्तृत्वौदितासयेंणप्रयुक्ताः। मार्त्तंडकर
निष्पतंरजोवन्हिकणीयति। असौसमरदुर्धर्षोबाहुनापरिधीयति। देवतीयतिविप्रेभ्यःक्रतुकर्मणिदीक्षितराम
तः। प्रहर्त्तुमुद्यतःशत्रुंगिरिपः क्षुपीयतीतिप्रयोगानसाधवः। किंतुवन्हिकणइवतपति। परिघेणेवबाहुनाप्र ४०

हरति। देवतेभ्यइवब्राह्मणेभ्योददाति। क्षुपादिवगिरेःपततीत्यादिवाक्यान्येवप्रयोक्तुंयुज्यंते।। हंसीयति
कीर्त्तिरित्यादौहंसकर्मकाचारएवहंसपदार्थः। क्यजर्थाचारकर्मकबोधस्यात्मानमितिपदस्याध्याहारेणहं
समिवात्मानमाचरतीतिवाक्यार्थोलभ्यते।। अतएवक्यचिवाद्युमेंपर्यासइतिकारिकयोपन्यस्तायावाच्
कोपमेयत्वलुप्तोपमायाः पुरस्ताद्धरिणाक्षिणएमेषपुष्यायुधीयतीतिकाव्यप्रकाशोक्तमुदाहरणंसंगच्छते।
युक्तु। आत्मधारणंभवस्यर्थः क्रियात्वेनाचारइतिसवन्हियते। तस्यचधात्वर्थान्तर्भूतआत्माकर्म। तद्वि
शेषणस्यापिद्विकर्मानुवादिकाद्वितीया। स्तिमितमस्तिनस्यंदत्तइत्यादौ। तथाचपुष्पायुधाभिन्नात्मधारणे
वृ॰हू॰३ पुष्पायुधश्चाचः। कर्तृत्तरर्थः। क्यचोपिधावेतर। तयोःसादृश्यंसंसर्गः। तथाचपुष्पायुधाभिन्नात्मधा
रणसदृशात्मधारणवत्तिराजनिराजापुष्पायुधीयतीसैन्येनबुध्यमानेआत्मानमितिपदंनापेक्ष्यतेधातुनो
क्तार्थस्यपदस्यप्रयोगानर्हत्वात्। तथाचधात्वर्थान्तर्भूतेकर्मणिनकर्मत्वव्यातप्रसक्तिर्धातोरकर्मकत्वात्। त

प०बा०र० प्यापत्तिपादित्तमधस्तादिति। तन्त्रभवत्स्यर्थस्य कर्त्तरि कर्मसंज्ञयाऽप्रवृत्तेः। अपादानसंप्रदानकरणाधारकर्म
४१ णां। कर्त्तुश्चोभयसंप्राप्तौ परमेव प्रवर्त्तत इति न्यायात्। अन्यथा पुष्पायुधं सवति मदन इति प्रयोगप्रसंगात्। तारं
शब्दायत इत्यत्र शब्दस्य तु कर्मसंज्ञाभवेऽपवादकाभावात्। अत एव श्येन इव भवतीत्यर्थेन वत्यर्थस्वरूप आचा
र क्यङ् प्रत्यय एव साधुः। नहि श्येनायत इत्यत्र सकर्मकः कश्चिदाचारः क्यङा बोध्यते। अन्यथा श्येन इव गृ
ह्णाति पतत्रिणा इत्यर्थे श्येनायते पतत्रिणा इत्यापत्तेः। ओजायते अप्सरायते विद्वायते विद्वस्यते वेत्यादौ
क्यङर्थः कर्मकाचारे ओजोभावो अप्सरोभावो विद्वद्भावो वस्तु सादृश्येन प्रतीयते। कर्त्तुः क्यङ् सलोपश्चे
ति सूत्रे तु कर्तृकाचारलक्षकादुपमानबोधकात्सरन्तः क्यङ् तस्मिन्परे प्रकृतेः सान्तप्रातिपदिकस्य सस्य
लोपो व्यवस्थितवैकल्पिक इति व्याख्यानबलेन सलोपादेः साधुत्वोपगमात्। यदाहुः सकारे क्यङः राम.
सन्नियोगशिष्टो लोपो व्यवस्थितः। ओजसोऽप्सरसो नित्यमन्यत्र तु विभाषयेति। हरिणीवाचरति ह ४१
ह

रितायते। एणीवाचरति एतायते रोहिणीवाचरति रोहितायते इत्यादौ क्यङ् मानिनोश्चेति सूत्रेण क्यङ् मानि
नोः परयोः स्त्रियाः पुंवद्भावः स्त्रीप्रत्ययसंनियोगेन वर्णादनुदात्तात्तोपधात्तो न इति सूत्रशिष्टस्य नस्यापि व्यप
यान्यथास्थिता एव हरित एत रोहितशब्दादयः श्रूयंते। हरितः पालाशः। एतःश्वेतः। त्रय एताः श्वेता भागाय
स्याः एतात्रयाः शलल्याः श्याविद्धा मिलिति वक्तव्ये त्र्येण्या शलल्या विनीया त्रीणि कुशलराण्यंतर्दधातीति गृह्यसू
त्र दर्शनात्। रोहितो रक्तः रोहितो लोहितो रक्त इत्यमरकोशात्। वर्णवाचिनां हरित लोहित रोहित शब्दान
मनुदात्तोपधत्वं वर्णानां तणतिनितान्तानामिति फिट् सूत्रेण सिद्धमित्यनुदात्तोपधवर्णवाचिभ्योऽपि सि
द्धस्य रोहिणी शब्दस्य गुणवृत्त्या योगरूढ्या वा नक्षत्रविशेषे प्रवृत्तिस्तदा रोहितायत इत्येव। यदि तु कंक्रङ्क
र्मणी वरुहोः कर्त्तर्यपि इनन्प्रत्यये नौणादिकेन हरिणा इव रोहिणा अपि प्रकल्प्यन्ते तदा हरिणायत इति रोहिण
यत इत्येव प्रमाणं। सपत्नीशब्दश्चतुर्विधः। शार्ङ्गरवादिगणपठिताच्छात्रौरूढात्सपत्नशब्दादुसन्नेन ङीनानि

ङि मि

प० बा० र० ष्यन्नएको भाषितपुंस्कः। तस्मात्क्यङि तन्निमित्तके पुंवद्भावे सपत्नीवाचारति सपत्नीयते द्वितीयस्तु। समानः प
४२ तिर्यस्या इति विग्रहे निष्पन्नस्य बहुव्रीहेः सपत्नीशब्दस्यानित्यं सपत्न्यादिष्वित्यनेनानुशासनेनादेशो। स
न्त्यो ङीप् इति सूत्रेण ङीपि कृते नित्यस्त्रीलिंगः। पतिशब्दस्य वोढृवाचकतया स्त्रीभिन्नत्वे तद्घटितबहुव्री द्व
हेरप्रसरात्॥ एतादृशस्थले ऽनेकसंसृष्टः समानपदार्थः संसर्गस्तु पदान्तरोपस्थित एव। समानपदेनोपस्था
प्यते। समानोपमावयोर्द्दशः। अधिकरणांशस्तु वस्यादौ समानपदेनानेकनिरूपितानां निवासत्वाधिक
रणत्वस्य तत्वादीनां प्रतिपादनात्। समानः पतिरित्यत्राप्यनेकवोढापत्तिः प्रतीयते प्रतीयते चैकपरिणी
ताबहुव्रीहेः स्त्रीत्वे ङीप् अर्थ इत्यनेकस्त्रीवोढृभिन्नवोढृपरिणीता स्त्री सपत्नी समुदायार्थः रुक्मिण्याः
सत्यभामायाः सपत्नी इत्यत्र पतिपदार्थे सत्यभामापरिणेतृत्वस्वरूपषष्ठ्यर्थस्यान्वय इति रुक्मिणी रु राम
क्मिण्याः सपत्नीति न प्रयोगः। बहुव्रीहिणैवोक्तार्थत्वात्। सीतायां तु न प्रसज्यत एव सपत्नीपदस्य प्रवृत्तिः। ४२

ण

अत्र सपत्नीवाचारति सपत्नीयते। भाषितपुंस्कानामेव पुंवद्भावप्रसरात्। तृतीयस्तु स्वामिपर्यायेण पति
शब्देन घटितो बहुव्रीहौ विभाषा सपूर्वस्येत्यनेन ग्रहपतिर्गृहपत्नी सादाविव सोपपदस्य पत्युर्नादेशो
सविसिद्धो भाषितपुंस्कः। सपतिर्दासी इति प्रयोगात्। ततः क्यङि सपतीयते इति प्रयोगः। नादेशस्य
स्याधिकारीयत्वेन पुंवद्भावे तदप्रवृत्तेः। चतुर्थः। सस्य सनामकस्य पत्नीति विग्रहे निष्पन्नस्तु सुरुषोनि
त्यस्त्रीलिंगः तत्पुरुषस्योत्तरपदलिंगकत्वनियमात्। पत्नीशब्दस्तु पतिशब्दस्य ष्यार्थपत्निकते कयाग
जन्यफलवतिस्त्रीत्वं स्त्रीप्रत्ययार्थबोधयन्नियतलिंग एव पुमादौ तदर्थसंभवात्। पत्युर्नो यज्ञसंयोग इति सूत्र
स्य यत्साहित्येन यत्ताधिकारस्तस्यां स्त्रियां पतिपदार्थे नियमतो न विधायकत्वात्। अत्रापि सपत्नीयत इत्येव प्र
योगः। कुमारविक्रमे वीक्ष्य सेयं चकित तारका। सेनादानवसिंहानां शर्वरीसुंदरायते। इत्यादौ शर्वरीसुंदरीवा
चरतीति विग्रहे शर्वरीशब्दस्य न पुंवद्भावः परत्वाभावात्। किंतु सुंदरीशब्दस्यैव। पाचिकायत इत्यादावपि कोप्

१०वा०प० धस्य पुंवद्भावनिषेधो वाच्च निकः ॥ एवं कष्टायते इत्यादावुक्तार्थे चिकीर्षायामुत्साहे क्यङर्थे कष्टपदार्थस्य पा
४३ पस्यान्वयः ॥ सत्र कष्ट कृच्छ्र गहन शब्दा नां पापे लक्ष्यार्थः । क्यङर्थे क्रमणे निरूक्तोत्साहस्वरूपे विशेषणं । ते
न सत्रायते इत्यतः पापायोत्सहत इति पर्यवसन्नो बोधः ॥ रोमंथं वर्त्तयतीति रोमंथायते इति प्रयोगे निगी
र्णो द्गीर्णद्रव्यं रोमंथस्तस्य कर्मत्त्वा क्यङर्थे हनु कर्मस्वरूप चर्वणेऽन्वयः ॥ हनुचालनमित्ये तदर्थे पानं नि
पात्त द्रव्ये च रोमंथपदार्थे कीटो रोमंथं वर्त्तयतीति वाक्यमेव प्रमाणं । हनुचालन इति वार्त्तिकात् । अपान
द्रव्यस्य तु निगरणं संचयो वा वत्सार्थः । तपस्यतीत्यादौ रागप्राप्तस्य सोऽननादेः परिहारस्तपस्तत्से कल्मेक
५· र्थे चेति । संकल्पस्तु प्रस्तवाय्यसाधन व्यापार प्रतियोगिविषयिणी चिकीर्षा । अत एव परस्मैपदमा
नुशासनिकं । बाष्पायते ऊष्मायते फेनायते इत्यत्रो द्वमने शब्दायते वैरायते अभ्रायते किं [illegible] वायते सुदि राम
नायते दुर्दिनायते मेघायते इत्यादौ करणे क्यङर्थे च कर्मत्वया प्रातिपदिकार्थस्यान्वयः । किं एवं पापं सुखायते ४३

दुःखायते इत्यादौ वेदने क्यङर्थे सुखादेः कर्मत्वसामानाधिकरण्योभयसंबंधेनान्वयः । तेन परस्य सुखाय
ते इति न प्रयोगः । भृशायते सुमनायते दुर्मनायते इत्यादौ प्रकृत्यर्थैकदेश गुण उपचय सौमनस्य वैमनस्यादयः
क्यङर्थः ॥ तत्तद्भावस्वरूपायामुत्पत्तौ आधेयतया प्रकृत्यर्थस्य व च्छेदकतया न्वयः । एवं लोहितायति
लोहितायते पटपटायति पटपटायते इत्यादौ लोहितगुणस्य पटपटानुकार्यस्य वादेः क्यष्यर्थ उत्पत्तावन्
न्वयः । यत्तु । लोहितादिडाज्भ्यः क्यषिति सूत्रे आदिपदश्रवणाल्लोहित श्याम दुःखानि हर्ष गर्व सुखानि
च । मूर्छा निद्रा कृपा धूमा करुणा नित्य चर्मणी इति परिगणनं । तल्लोहित डाज्भ्यः क्यष्वचनं । भृशादिष्वितरा
णीति वार्त्तिक विरुद्धं तेन हि वार्त्तिकेन लोहित शब्दस्य डाच्प्रत्ययांतस्य च क्यष् । श्यामादेस्तु भृशादिमध्य
पाठेन क्यङ् वसा धुरिति बोध्यते । तेन श्यामीयतीति न प्रमाणं वाक्यपदीयमनेन क्यषो विभाषा परस्मैपदवि
धानात् । उत्पुच्छयते विपुच्छयते परिपुच्छयते इत्यादौ णिजर्थे सूत्रोक्त विविधक्षेपपरित्तः क्षेपेषु पुच्छस्य संसो

उपतेसंचीवस्यते इत्यत्र राशीकरणे। भा उस्यार्जने परिधाने च चीवरस्य। अनुलोमयतीत्यत्र णिजर्थे नुमार्जने लो
म्नः। विपाशयतीत्यत्र विमोचते पाशस्य संबस्त्रयतीत्यत्र संछादने वस्त्रस्य वितस्तयतीत्यत्र विधाने हस्तपद
र्थस्य जटाभस्तकेशस्य। कर्मत्तया। उपवीणयतीत्यत्रोपगाने। वीणायाः। अतिहस्तयतीत्यत्रातिक्रमे
हस्तिनः। अभिषेणयतीत्यत्राभियाने सेनायाः। उपश्लोकयतीत्यत्रोपस्तवे श्लोकस्य। अनुकूलयतीत्य
त्रानुघट्टने तूलस्य करणत्तयान्वयः। अत एव धात्वर्थान्तर्गतकर्मकाणामुपवीणयतीत्यादीनां सकर्म
कत्वं तेन उपवीणयंति येन गुणान् पविमति हस्तयंति तेन शिवं। य उपश्लोकयति त्वां कृतांतमत्तिषण
यसे षः। हंत कामं विरामायं विषये पुसजेत्तकः। सज्वरच्छेदमन्विच्छन्नूनं कोनु तूलयेदित्यादौ हि शिवये
ते गुणं वीणयोपगायंति। ते हस्तिना सागरमतिक्रामति। यस्त्वां श्लोकेरूपस्तौति स सेनया कृतांतमभिया
तीति अनलं तूलेनानुघट्टयेदिति च वाक्यार्थं निष्पन्नये भवंति कर्मप्रत्ययाः। वर्मणा संनह्यतीति संवर्मय ४४

ति। इत्यादौ संनह्यिपर्यायस्य। णिचो ऽकर्मकत्वात्। करणत्तयैवान्वयः। कर्मप्रकृतिकाः यङ्णिजंता धातवस्त्वकर्मकाः स्वा
श्वः संचीवरयिष्यमाणबटुकव्याधूतमुष्य सचवदसत्र प्रयान च्युप्रत्ययः कर्त्तरि बटुकसमानाधिकरणः। नतु कर्मणि
त्वकसमानाधिकरणः। उपवर्णितानां कुञ्जादीनां णिचां स्वतन्तदुपसर्गपूर्वकं प्रातिपदिकमेव प्रकृतिः। न तु कृत्
पुष्पादिः। तस्ताहि घातेसंछादवस्त्रात् सुच्छादितस्तथा। उपसर्गपादो कर्मणि णिस्तत्तदव्ययपूर्वकात्। उपगाने तु वी
णायाः हस्तिनोतिक्रमे तथा। सेनात्तश्चाभियाने णिः श्लोकाद्रूपस्तवे इष्टुताविति भागुरिस्मृतेः। हलिंग्रहणेति ह
लयति। कलिं गृह्णातिकलयति। कृतं गृह्णातिकृतयति। इत्यादौ णिजुर्थग्रहणे हलिपदार्थमाहलादेः सत्यापय
सत्यापयति वेदापयतीत्यत्रायुकृसमाप्ति व्याहृत्तणिजर्थकरणे आख्याने च सत्यार्थवेदानां। मुंडयति मिश्रयति श्ल
क्ष्णयति लवणयति व्रतीयतीत्यादौ णिजर्थकरणे मुंडादेः। हस्तयतपादयतेत्यादौ णिजर्थनिरसनंगविशेष
णां कर्मत्वेनान्वयः। मुंडादेस्तु करोत्यर्थे गृह्णात्यर्थेक ताहितः। वक्तीस्यर्थे च सत्यादेरंगेभ्यस्तन्निरस्यतीति भागुरि

प०वा०र० भाषितात्त। श्रावयतिप्रदयतिद्रढयतिस्थवयतिदवयतिसाधयतित्तापयतिप्रापयतिस्थापयतिस्फावयतित्र
४५ घयतिवृंदयत्तीत्यादौणिजर्थेकरणेकृचाम्रदुदृढस्थूलदूरोत्तिकाबाढक्रद्रप्रियस्थिरस्फिरदीर्घवृदानांकर्मत
यान्वयः।संकल्पितंभोजनमभोजनंवाव्रतपदार्थः।पयःश्रद्धान्नंवाव्रतयतीत्यत्रणिजर्थेव्यापारेनुकूलतयाभोज
नाभोजनयोर्भोजनद्वयेयथासंख्यंपयःश्रद्धान्नकर्मकत्वयोरन्वयः।क्वचिच्चप्रातिपदिकार्थस्याख्यातार्थएवा
न्वयः।पाणिनीनिप्रयोजनविशेषार्थमपेक्षितस्यनियमश्रयमभाषास्यापाणिन्यादेरिवक्वचिदपिसादबोधकस्य
व्याकरणेराबादेरिवारोपितशक्तेःक्विपःपदसंस्कारप्रयोजनस्यसार्थकत्वायोगात्।अन्यथानुबंधानामपिसार्थ
कत्वप्रसंगः।व्याकरणंतुस्वार्थेसदृशाचारलाक्षणिकस्यप्रातिपदिकतुल्यानुपूर्वीकस्यशब्दस्यधातुसंज्ञामुपदिशति
अतएवक्वचिद्व्याकरणेक्विप्क्वचित्क्यङ्क्वचिद्विप्एवलोपोनुशिष्यते।तत्रसंज्ञिकेभ्यःप्रातिपदिकेभ्यस्तदंतस्य राम
रस्यानुदात्तानुबंधत्वादात्मनेपदंयथा।वैश्वंत्तक्लीबतेहोडत्तइत्यादावेंगल्भक्लीबहोडपोर्थश्चनपुंसकभावसद ४५
गल्भ ब दार्थो

शोभावआख्यातार्थआश्रयेत्वन्वेति।अवगल्भायतइत्यादिक्यङ्।तत्तदर्थेसादृश्येनप्रातिपदिकलक्ष्यःस्वार्थान्व
यः।अन्येभ्यस्तुप्रातिपदिकधातुभ्यःपरस्मैपदमेवप्रमाणं।घटइवमालेयकाविरिवग्रामणीरिवविधुरिवचधरि
वापितेवराइवगौरिवक्षौरिवभवतीतिविग्रहेघटतिमालतिकवयतिग्रामणयतिविधवतिवधवतिपितरतिराय
ति।गवयतिगम्लावयतीतिप्रयोगदर्शनात्।राजेवराज्ञेवपंथाइवभवतीतिविग्रहेराजति।राजानति।पथीनतीति
प्रयोगे।अनुनासिकांतस्योपधादीर्घआनुशासनिकः।अन्येतु।राजपुरुषादिसमासेराजपदार्थःस्वस्वामिभावेन
पुरुषेन्वेतीतिप्रातिपदिकयोरपिस्वार्थेसंदोपयोगिन्याकांक्षा।एवंजेष्ठामध्येत्यादौस्त्रीप्रत्ययार्थपरिणीतस्त्रियां
पुंसोज्येष्ठमध्यमादेरन्वयइतिस्त्रीप्रत्ययेपिप्रातिपदिकेनसहत्तथाविधाकांक्षास्तीत्याहुः।तच्चिंत्यं।नामव्यपेक्ष
त्वेलिंगप्रत्ययेनतिङासुपा।तद्धितेननिपातेनकृतिधातुलवेनच।अजाएडकाश्वाचटकाइत्यादौपंसुविशेषेषुप्रा
तिपादिकार्थेषुयोन्यवयवकस्वरूपस्यस्त्रीत्वस्यशाकस्य।खट्वेत्यादौशब्दधर्मेणावक्ष्यमाणेनस्त्रीत्वेनावच्छीदवत्

पदवाच्यत्वस्य लक्ष्यस्य पांडवभार्या सुमध्यमासु भद्रेत्यत्र मध्यमपदार्थे मध्यमपुरुषपरिणीतस्त्रीत्वस्यान्वये
टापप्रत्ययः। कुटुंबस्याकामं दक्षीत्यत्र बहुदर्शनशाकत्वस्त्रीत्वस्य। सीमायामस्येत्यादौ सीम्निस्त्रीशब्दस्वरू
पवाच्यत्वस्यान्वये डाप्प्रत्ययो ङित्त्वादिलोपप्रयोजनकतया टापः पृथङ्निर्दिष्ट आचार्येण वाशब्दः। पञ्चवंती भार्या
दंडिनी। पलिक्नी पलिक्नीमित्रा इत्यादौ चाकारस्य स्त्रीत्वस्य। प्राची अवाची इत्यादौ। प्रागादौ स्त्रीशब्दप्रतिपाद्यत्व
स्य लक्ष्यस्यान्वये ङीप्प्रत्ययः। अन्तोदात्तत्वप्रयोजनः। घटोध्नी गौरित्यादौ घटपरिमितो धः संबंधिगविशाकस्य
घ स्त्रीत्वस्य। इंद्राणी वरुणानीत्यादाविंद्राद्यभिन्नेन पुंसा संयुक्तादौ प्रातिपदिकार्थे प्रकृतिविशेषसमभिव्याहृ
तस्य स्वस्वार्थे वा स्त्रीत्वस्य हिमानीत्यादौ हिमसंहतित्वस्य। अरण्यानीत्यादावरण्यादिषु महत्त्वस्य। यवानीत्य
त्र यवे दोषस्य। यवनानीत्यत्र यवनकर्तृके प्रातिपदिकलक्ष्ये लिपित्वस्य। आचार्याणीत्यत्राचार्यपुंयुक्ते। आर्याणीत्य राम
त्र वैश्यजातीयस्त्रीत्वस्य। अल्पलिप्ती शौरित्यत्रालेपे ऽल्पत्वस्य। पाणिगृहीतीत्यत्र पाणिग्रहणकर्मणि भार्यात्वस्य ४६

धो पि२

उलूकपक्षी शाला उलूकपुच्छी सेनेत्यादौ उलूकपक्षसदृशापार्श्वभागे। तत्सदृशपश्चाद्भागे च स्त्रीशब्दप्रतिपा
द्यत्वस्यान्वये। ङीप्प्रत्यय आद्युदात्तस्वरप्रयोजनकतया पृथगुद्दिष्टत्वेनैव वाचकः। भद्रबाहुरित्यत्र प्रकृतिरूप
४५३ र्थव्यक्तौ। श्वश्रूरित्यत्र भार्याजनकत्वे परपदार्थे। करभोरूरित्यत्र करभसदृशोर्वस्यविनि। संहतोरूरित्यत्रातिव्यक्तो
रुद्वयसंबंधिनि। कद्रूरित्यत्र नागमातरि स्त्रीत्वस्यान्वये। ऊङ् प्रत्ययः। शार्ङ्गरवीत्यत्र शार्ङ्गरवत्वजातिमति स्त्री
त्वस्यान्वये ङीन्प्रत्ययो निःस्वरप्रयोजनः। औपगवसादौ अपत्यजातेः स्त्रीत्वस्यान्वये चाप्प्रत्ययः। स्वरभेदनप्रयोजन
इत्येवं प्रातिपदिकस्यार्थे स्वार्थस्यान्वये समर्थाः स्त्रीप्रत्ययाः प्रातिपदिकं व्यपेक्षन्ते। युवतिरित्यादौ तिरिति तद्धि
तोपि यूनि स्त्रीत्वान्वययोग्यः। एवं प्रथमादिसुपविभक्तिरपि प्रातिपदिकार्थान्वितं लिंगमभिधत्ते। प्रातिपदिकार्थलिं
गपरिमाणवचनमात्रे प्रथमेति सूत्रे प्रथमायां कर्तृत्वे द्वितीयादौ मात्रग्रहणसामर्थ्येन लिंगवाचकतावगमात्। तच्च लिंगं
त्रिविधं। सत्वरजस्तमसां गुणानामुपचयः पुंस्त्वं। साम्यं च क्लीबत्वं सुपां वाच्यं। अत एवोपचयापचययोरवि वक्षयास्त्र

वि

प०वा०स० सामान्येनपुंसकमितिप्रवादोघटते। तत्रितयमपिकेवलान्यपि। अर्थोप्याकृतिर्वास्त्वितिसर्वत्रप्रयोगदर्शनात्। इतिप
४७ तंजलिः। त्रिस्रोजातयएवैताः केषांचित्समवस्थिताः। अविरुद्धाविरुद्धाभिर्गोमहिष्यादिजातिभिरितिवाक्यपदी
येभर्तृहरिः। शेफस्यावयवेसमवेतप्राणित्वंपुंस्त्वं। भगसमवेतप्राणित्वंस्त्रीत्वं। तदुभयोरेकत्राप्यसमवेतप्राणित्वं
यथा४ क्लीबत्वं। यथंसुपांस्त्रीप्रत्ययानांचशक्यं। यत्रबाधस्तत्रशब्दवृत्तिपरिभाषाविशेषविषयत्वरूपेस्त्रीपुंस्त्वादिशब्द
संस्कारप्रयोजनकंनिरुक्तमबाधितमेवसुपामर्थः। यत्रतुतद्बाधस्तत्रदारादुत्यादौबहुवचनवत्साधुत्वमात्रार्थ
स्तल्लिंगाभिधायिप्रयोगोननुशब्दधर्मशाब्दबोधगोचरइति वस्तुगतिः। स्वरविशेषइवस्त्रीत्वपुंस्त्वादिकेशब्दध
र्मः सन्सुपाभिव्यक्तोर्थस्यनिर्णायकइत्यपिवदन्ति। एवंचैत्रः पचतिपच्यतेतंदुलइत्यादौतिङर्थः कर्तृत्वकर्मत्वादि
प्रथमांतार्थेन्वेति। तथासुपास्युपात्तासंख्याअंगकानीत्यादौतद्धितेनोपात्तेमन्यते। घटः पटश्चेत्यादौनिपातेनो राम
पात्तेसमुच्चितत्वे। भोक्तुंकालइत्यादौतुमुनकृदुपात्तेभोजनार्हत्वंप्रातिपदिकार्थेन्वेतीति। तत्तदाकांक्षाःस्वयमू ४७

६३

हनीयाः इतिपरिभाषाप्रकरणं॥ ३॥ ननुपाकविशेषासादितरसविशेषैर्दुग्धावयवैरारब्धेद्व्यणुकादौद्रव्येवर्तमान
स्यदधित्वसामान्यस्यतद्वाचोवाचकत्वे। किमिकारांते किंयकारांतेकिंनकारांतेकिमनंतेदधिशब्दे वर्तते। दधिप
य३ स्यदध्यानयदधीक्रीडेदध्निरमस्वेतिसर्वविधप्रयोगदर्शनेनसर्वत्रैवबालानामाप्युत्पत्तिसंभवात्। नचमकारांता
दिप्रयोगानामिकारांतस्मरणद्वारकपदार्थबोधकत्वसंभवाद्दधीत्येववाचकं। ननुदध्यदध्नावितिसांप्रतं। वैपरी
त्यस्यापिसंभवात्। नापिदधीतिप्रकृतिमंगीकृत्यव्याकरणेननानाविधविकारप्रतिपादनाद्विनिगमनाशंका। व्याकर
णस्यप्रवृत्तिलाघवोपेक्षितप्रकृतिप्रत्ययादिप्रपंचशिक्षावत्सहस्रव्युत्पादितनिष्पन्नसाधुपदस्यपारमार्थिकपदप
दार्थसंबंधानांप्रतिपादकत्वात्। अन्यथानानाविधानांअनुबंधानामागमानांनित्यमश्रूयमाणानांद्विवादिप्रत्ययाना
माणादिकानांचप्रकृतिप्रत्ययविभागानांतत्तदर्थेशक्तिकल्पनप्रसंगात्। यदाहहरिः। उपायाःशिक्षमाणानांबालानामु
पलालनाः। असत्येवर्त्मनिस्थित्वाततःसत्यंसमीहते इति। यत्रतुकर्मप्रयोगार्हनिष्पन्नशब्दव्युत्पादनार्थमाम्नायस्यचर

प०बा०र० स्त्रोहागमलब्धसंदेहप्रयोजनायप्रवृत्तंव्याकरणंदध्यमेवप्रकृतिंकल्पयित्वा।नचिपरेसंप्रसारणविधिनाद
४८ क्ष धिपश्येत्यादिसाधयितुंक्षमते।नचफलेविसंवदति।एवंदेवोवर्नेपित्तानदीत्यादौविसर्गमकाराकारलोपाना
मेकत्ववाचकत्वं।उक्ततैःस्मारितसोःविपरीतंचात्रविनिगमकं।कुत्रापिसाधुशब्देऽप्रयुज्यमानस्यसुकारस्यवा
चकत्तायाःग्रहीतुमशक्यत्वात्।नचादेशानांनानाविधत्वादेकस्यादेशिनोवाचकत्वमितिप्रयुज्यते।व्याक
रणभेदेनसुसिरुप्रभृतीनामादेशिनामपिबहुविधत्वात्।उपेयप्रतिपत्त्यार्थाःउपायाअव्यवस्थिताइति
न्यायात्।किंच।विसर्गोवासुकारस्तेनैकत्वंस्मरणीयमितिपरंपराकल्पनेगौरवात्।विसर्गस्यस्मारकतोयात्तद
नुभावकल्पनमुचितं।तस्मात्।साधुनिपदेप्रयुज्यमानाविकाराएववाचकास्तदाकुरप्रियुक्ताः।साधुशब्देंत
र्गताहिबोधकानतुतत्स्मृताः।अव्यवस्थितैर्व्यवहितैस्तद्धेतुन्यायत्तस्त्वयेति।।आदेशाविसर्गादयस्तावच्छ्रूयमा राम
णत्वेनान्यथाकर्तुमशक्यतयाव्यवस्थिताः।व्यवहारबलेनबालैर्गृहीतसंगतिकाःपरैरपिपदार्थबोधकस्यादे ४८

शिनःस्मारकतयाचुप्तपदार्थबोधकप्रयोजकभावाः।आदेशिनस्तु।व्याकरणभेदेननानाविधा[illegible]नःस्मा
अव्यवहार्याः॥पदार्थागमपूर्वमारिबिलैरनभ्युपगन्तप्रतिसंधयश्चेति।वर्णस्फोटवादिनः।अत्रोच्यते।पाणि
न्यादिभिरुत्प्रेक्ष्यय आदेशीतिकल्पितः।तस्यचाजविषाणस्यलक्षिबोदकत्वाकृत्वा।येकेचिद्बोधकाःसाधो
तां र्केचिच्चव्यक्तिगताः।तएववाचकानेतदादेशाःशाब्दिकसमत्तेः।व्यवहारलाघवार्थपाणिन्यादिभिरुत्प्रेक्ष्यप्र
कृत्याधातुनासमारोपितसमभिव्याहारावस्तुतःप्रकृतिसमभिव्याहारेणसाधुशब्देषुप्रयुज्यमानतयात्
रगम्यंगसदृशाल्लकारक्विचादयोनकस्याप्यर्थस्यवाचकाः।परिनिष्ठितातिवाद्यादेशनिष्ठांशक्तिमादेशिनु
पचयंचैव्याकरणाव्यवहरति।अएवपरिनिष्ठितराजपुरुषादिसमासमासस्यार्थवत्तामलौकिकेराजन्ङस् उ॰स
पुरुषसुइत्याकारकेविग्रहवाक्येआरोप्यप्रातिपादिकसंज्ञा।प्राचीनसुवानिवृत्तिपरतदुत्सर्गादिकार्यनिवर्तयति
एकार्थीभावसामर्थ्यवादिनःअतएवलकारस्यावाचकतयातदादेशानांविशेषेप्याख्यातस्यकर्तृत्वेशानुःकर्तरिक्विरिति
रौ२ श

प०वा०र० वैषम्यमुपपद्यते। तथाहि। वाचकत्वानवच्छेदकेन कृत्परिभाषागोचरत्वेनोपलक्ष्यते। शास्त्रीकवादिना वाचकेप्र
४१ त्ययेकर्त्तरि कृदिति वाचकताग्राहकत्वातिदेशवाक्यप्रवृत्तिस्तथा। तिबाद्यादेशित्वविशिष्टे लकारे कर्त्तृवाचकता
विधिर्विशेषणमुपसंक्रामति विशेष्ये बाधात्। विशेषणमुपलक्षणीकृत्य विशेष्ये विशेष्यमुपलक्षणीकृत्य विशे
षणे व्याप्तवाक्यप्रवृत्तिरिति वाचकाएवौत्सर्गिकलकारादयः। तिबादिषु पकृतिसमभिव्याहारज्ञानं लकारजनिता
च पदार्थोपस्थितिः परस्परसहकृत्य फलं जनयतीति यस्यास्य संक्षवदुत्तिककत्वात्। यादृशपदत्वसामानाधिकरण्येन
समभिव्याहारबुद्धिस्तद्धर्मावच्छिन्नजनितपदार्थोपस्थितेः शाब्दांगत्वात्। अन्यथा पचतिल इति वाक्याल्लकारेणापि
त्वि समभिव्याहृतास्तिपूर्ववाचकइतिज्ञानकालेपि तत्पात्शाब्दप्रसंगात्। यदादेशत्वावच्छेदेन समभिव्याहारबुद्धिस्त
त जनितापदार्थोपस्थितिः शाब्दांगमित्यापि न। आदेशत्वाद्यनुपस्थितावपि शाब्दबोधोदयात्। न चतिपोवाचकत्वे यत्र राम.
तिपि समभिव्याहृतबुद्धिस्तत्रावाचकत्वनिश्चये तिवंतरजनितायां पदार्थोपस्थितौ तथाविधान्वयप्रसंगात्तादवस्थ्यं। नहि ४१

शब्दव्यक्तिभेदेन पदार्थोपस्थितेः कारणताभेदे आनंत्यप्रसंगादिति वाच्यं। तित्वसामानाधिकरण्येन पचिसमभि
व्याहारग्रहस्य लित्वावच्छेदेन वाचकताग्रहजनितायाः कर्त्त्राद्युपस्थितेश्च परस्परसहकारित्वोपगमात्। तित्वसा
मानाधिकरण्येन वाचकताग्रहेण तत्संस्कारेण चाजनितायाः पदार्थोपस्थितेरंगत्वे पचिसमभिव्याहृतं पदमिति प्यं ३
विशिष्टज्ञानस्वरूपोद्बोधकजनितत्वमेव तत्र प्रवेशनीयं। येन चटाउसिउसाद्याम नसामनस इत्यादौ श्रूयमाणा अपि बो
धकास्तेषां घटेन घटात् घटस्येत्यादौ विनाशस्य स्वरूपो विकारो न वाचकः। अनेकशक्तिकल्पनापत्तेः। विनिगमिका तु शब्द
स्मृतिरेवा दधिशब्देपि काशादिरध्यवसा च वाचकत्वेपि दधिशब्दवाचकत्वावच्छेदकंभावेन विकृतानां स्मारकत्वमेवस्य वउपयो ४
गकल्पनायामन्याय्यत्वात्। प्रथमैकवचनं तु सकार एव देवस्तत्र गतः सइत्यादौ श्रूयमाणस्य सकारस्य वाचकताध्रौव्ये तदु ३
सुपस्थापकत्वयैव विसर्गादेरुपयोगात्। पाणिनिस्मृतेरेव विनिगमकत्वात्। अनुबंधास्तु काल्पनिका एवेति न तेषां वाचकताकु
क्षौ प्रवेश इति दिक्। एवं क्वचिच्छ्रूयमाणानां आदेशिनां वाचकत्वे ध्रुवे। तदादेशानां तत्स्मरणद्वारैवोपयोगसंभवे केषां

प॰ वा॰ र॰ निष्ठशक्तिभ्रमेणापभ्रंशादिव वर्णविकारादप्यन्वयबोधोपपत्तौ पदस्फोटवादिनो निरस्ताः। तथाहि। तेषां मतं।
५० सुबंततिङंतात्मकं पदं। तच्चविशिष्टार्थवाचकं। घटेनेत्यादिपदं हि करणताविशिष्टैकघटैकघटकरणता
यांतत्कार्यतायांवाशक्तं। नतुप्रकृतिप्रत्यययोःपृथक्शक्तिः। पदेकियतीप्रकृतिः कियान्प्रत्ययइत्यविभागेन
घटेतिइप्रकृतिः नेतिप्रत्ययोवाघाइतिप्रकृतिरेवेतिप्रत्ययोवेत्यनिश्चयात्। नहिघटौप्रभृतयः स्मृताः प्रच ८४
तान्वयबुद्धौप्रभवंति। तेषामश्रवणात्तद्ज्ञानेपिसमुदायशक्तिज्ञानेनशाब्दोदयात्। तस्यप्रमात्वेबाधकाभावा
त्। घटस्तादृशस्ततःशाब्दानुदयेनघोत्तरटकारोत्तरनकारज्ञानत्वेनकारणतावश्यकत्वेतज्ज्ञानितपदार्थोपस्थितेर
वसहकारित्वौचित्यात्। अन्यथेनादौटादेशज्ञानतः टजनितपदार्थोपस्थितिसहकारेणघटेनेत्यतःकलत्रा
कारणताशाब्दप्रसंगात्। घटेनेत्यानुपूर्वीविशिष्टपदत्वावच्छेदेनघटकारणताशाब्दजनकताज्ञानस्यापिकार राम
णत्वेनततएवोपपत्तौकिमादेशिटाप्रभृतिजनितयापदार्थोपस्थित्याकांक्षेतःपरमितराशक्तिविशिष्टज्ञानकारण ५०

तात्। वस्तुनस्तादृशप्रकृतिप्रत्ययविभागस्यशास्त्रीयस्याप्यभावेनतन्त्रोक्तायाएवगतेरवश्याभ्युपेयत्वेसर्वत्रपदेतथैवस्वीक
र्तुमुचितत्वाच्च। तदाहुरभियुक्ताः। अर्थोदेशावाचकाश्चेत्पदस्फोटस्ततःस्फुटः। घटेनेत्यादिपुनहिप्रकृत्यादिभिद
स्फुटा। वस्तुनस्तादृविवेकहापिसंभ्रमोविदृश्यतइति। अत्रेदंतत्त्वं। घटेनेत्यानुपूर्वीविशेषविशिष्टघटकरणकत्वान्वय
बुद्धिव्यतिरेकप्रयोजकव्यतिरेकप्रतियोगित्वरूपाकांक्षाज्ञानस्यघटपदजनिताघटस्मृतिरिवपदस्मारिततापदज
निताकरणतास्मृतिश्चेत्युभयंसहकारि। अनन्वीतयाकांक्षयास्वार्थस्मारयित्वावाक्यार्थोनुभाव्यते। अपितुसाक्षादि
तिनास्यांशक्तिव्यपदेशोयुज्यते। नचास्यामाकांक्षायांवाक्यार्थस्यापिप्रवेशोऽपितुघटत्वावच्छिन्नप्रकारतानिरूपितक रू
रणताविशेष्यताशालिन्याबुद्धेःप्रमात्वमसाधारण्यात्। नापितद्बुद्धिजनकतामात्रे। तच्छक्तिरसंसर्गाग्रहादावपिवा
व्य२ चकत्वव्यवहारप्रसंगात्। अपितुसंकेतविशेषइतिप्रतिपादितंप्राक्। तदिदमुच्यते। आनुपूर्वीविशेषेणसुप्तिङंतात्म
कंपदे। आकांक्षाग्रहेतेततत्पदार्थान्वययोग्यता। शक्तिस्तुतस्याभिन्नैवप्रकृतिप्रत्ययादिषु। ययावत्वास्मारिता

प॰ बा॰ र॰ नामर्थानामन्वयोमिथः। वाक्यस्फोटवादिनस्तु। साधुशब्दान्तर्गतानामिव वाचकत्वमुक्तयुक्त्याप्रतिपाद्यमानाहरेवाविशे
५१ षेत्यादिवाक्यानामेव हरिसंबोध्यत्वतत्कर्तृकप्रशंसाविषयावनाक्रियादिप्रातिवाचकत्वमभ्युपगच्छन्ति। तथाहि। हरेवेत्या
दौ न हरिशब्दानवासंबोधनप्रथमानावचिधातुर्नसिः श्रूयमाणा इतिन वाचकैः प्रकृतिप्रत्यया द्यौरूपपत्तिः। नापि
प्रत्येकपदस्फोटः। अवपदस्यास्फुटत्वादितिवाक्यस्यैव विशिष्टार्थवाचकत्वमभ्युपेयं। आद्याच व्युत्पत्तिर्वाक्यार्थवाक्ये
रेव बालानामिति तद्ध्यत एव परास्तमिति समुन्नीयते। वर्णःस्फोटः पदस्फोटो वाक्यस्फोट इतित्रिधा। शाब्दिकानांम
तंतत्राकांक्षाशक्तिरिति भिन्नमतः। घटेनेत्यानुपूर्वीज्ञानस्य घटत्वावच्छिन्नप्रकारतानिरूपितकरणतात्वावच्छिन्नविशेष्य
ताकान्वयबुद्धित्वंतर्धर्मविशेषो वा कार्यतावच्छेदकः। सत्यामपि घटपदजनितायां कलशकरणत्वस्मृतौ ठघेटत्यादितो
व्युत्क्रमानुपूर्वीकादिनपटेत्यादितश्च तथाविधशाब्दानुदयात्। नन्वेवं विपरीतव्युत्पन्नानामपि नघटइत्यादितःशाब्दबुद्धेर्घटे
नेत्यादितश्चाप्रतिपत्तेरनुपपत्तिरितिचेत्। अत एव घटेनेत्यानुपूर्वीविशेषावच्छेदेनाकांक्षाज्ञानमपि कारणं। तदव्युत्प राम ५१

तिरिक्तेच्यते। आकांक्षा तु घटपदज्ञानत्वावच्छिन्नकरणतानिरूपितस्मरणवृत्तिकार्यतायाः प्रकारितावच्छेदको यो धर्मस्त
द्धर्मावच्छिन्नप्रकारतानिरूपितायाः घटपदज्ञानत्वावच्छिन्नकारणतानिरूपितकार्यतावत्ती घटस्मरणप्रकारीभूतधर्मावच्छि
न्नविशेष्यतानुन्निष्ठानवच्छिन्नप्रतियोगितावच्छेदकताकाभावत्वावच्छिन्नंप्रतियोजकस्याभावस्य प्रतियोगित्वं। त
वि॰४ त्रयादृशानुपूर्वीविशिष्टशब्दत्वावच्छेदेन तज्ज्ञानत्वावच्छेदेन चागत्यतेता दृशानुपूर्वीविशिष्टपदज्ञानात्घटीयाकरणत्वे
तिशाब्दबुद्धिरुत्पद्यते। भवति च घटो घटपदवाच्य इति संस्कारसहकृतस्य घटपदज्ञानस्य ताद्रूप्येण जनकताया घ
ट इति स्मरणत्वस्य जन्यतावच्छेदकस्य घटकत्तया घटत्वमपि प्रकारितया जन्यतावच्छेदके। एवं टापदस्यापि घटत्वा
वच्छिन्नप्रकारतानिरूपितकरणत्वावच्छिन्नविशेष्यताव्यक्तिः स्वरूपेणायस्याभावस्य प्रतियोगितावच्छेदिकातद्विशे
ष्यताविशिष्टानुभवत्वावच्छिन्नाभावो घटेनेत्यानुपूर्वीज्ञानत्वावच्छिन्नप्रतियोगिताकाभावेन प्रयोज्यते। करणतावच्छे
दकधर्मावच्छिन्नाभावस्य कार्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभावंप्रतिप्रयोजकत्वात्। घटत्वावच्छिन्नप्रकारता

५२

प० वा० र० निरूपितकरणत्वत्वावच्छिन्नविशेष्यताविशेषः पुनरखंडोपाधिज्ञानविषयनेदंतत्त्वेनदमानाभावात्। अखंडधर्मस्य
५२ रूपतयावच्छेदकोऽनविषयनिरूपकत्वेतभावेन गौरवात्। यच्चिसाविशेष्यताविशेष्यादिसिदंनक्षिपते। कथ
मन्यथा करणतात्वेन जगदवगाहित्वो भ्रमात्करणतासामान्यावगाहिन्याः प्रमितेर्वायत्किंचित्करणतावगाहिनी घ
टीयाकरणतेतिग्रहणे वैचित्र्यं॥ सर्वत्रैवतानेतादृशविशेष्यतायाः जगन्निरूपितत्वात्॥ घटीयत्वाभाववन्निष्ठघटी
यत्वप्रकारतावच्छिन्नविशेष्यताकत्वेन सर्वत्रभ्रमत्वप्रसंगात्। घटेनेत्यानुपूर्वीज्ञानस्य घटप्रकारतानिरूपितक
रणताविशेष्यतात्वेनैवसाजन्यतावच्छेदिका। आनुपूर्वीज्ञानाभावप्रयोज्याभावप्रतियोगितावच्छेदिकाज्ञा
नतोघटत्वादेर्विशिष्याप्रवेशेआकांक्षाशरीरप्रविष्टप्रयोज्यासाचप्रतियोगितावच्छेदकोधर्मो न दुर्वचः।
घटपदजन्यस्मृतिप्रकारत्वादेर्व्यावर्त्तकत्वात्। जन्यताप्रतियोगित्वयोरवच्छेदककुक्षावप्रवेशात्। नचघटप
जन्यस्मरणप्रकारावलीढप्रकारितानिरूपितटपदजन्यस्मरणप्रकारावलीढविशेष्यताकान्वयबुद्धित्वेन राम
५२

समंसामानाधिकरण्यमेवप्रयोज्याभावप्रतियोगितायांप्रवेशनीयं। ननुतदवच्छिन्नत्वमितिवाच्यं। घटेनेति
घटकर्मत्वं घटेइतिघटकरणत्वं बोधयतीतिविपरीतव्युत्पन्नस्यघटेनघटेइतिपदद्वयजनितस्यघटीय
कर्मताकरणतात्वेनचेतिबोधस्याभावंप्रतिघटेनेत्यानुपूर्वीज्ञानाभावस्यप्रयोजकत्वाचगमेव्यस्तदाघ
टादिपदजनितपदार्थोपस्थितिसहकारेणघटकरणताशाब्दबोधप्रसंगादितिविभाव्यते। तदाघ
टपदजन्योपस्थितिप्रकारत्वोपलक्षितधर्मेऽवच्छेदकतांप्रकारविधयावगाहमानमुपलक्षणधर्मेषुन्वांत
दनवगाहमानमाकांक्षाज्ञानंहेतुरितिवक्तव्यं। प्रकारीकृतावच्छेदकतायांगस्यमाणायांउदासीनधर्मेसा
मानाधिकरण्यग्रहयोवाधकाभावात्। तथाचघटपदजन्यस्मरणप्रकारधर्मत्वस्यवच्छेदकतानिरूप
कावच्छिन्नत्वकृतवच्छेदकतानिरूपकप्रकारतावत्सवच्छेदकटाप्रतियोगिनीभावटपदजन्योपस्थितिप्रका
रत्वसवच्छेदकतानिरूपकावच्छिन्नत्वकृत्यवच्छेदकताप्रतियोगिनीविशेष्यतात्वस्यावच्छेदकतन्निरू

॥.

प॰ वा॰ र॰ प्रकानुभवत्वावच्छिन्नप्रतियोगिताकाभावो घटेनेत्यानुपूर्वीज्ञानत्वावच्छिन्नप्रतियोगिताकाभावप्रयोज्य
५३ इति व्युत्पत्तिः घटपदजनिताकलशोपस्थितिरादेशस्मारितशाब्दप्रभृतिजनिताकरणतापदार्थोपस्थिति
श्च घटीयाकरणत्वेसन्वयबोधकारणं। सर्वनाम्नश्च बुद्धिस्थप्रकारत्वोपलक्षितेधर्मप्रवृत्तिनिमित्तत्वमिव
पदजन्यस्मरणप्रकारत्वोपलक्षितेषाकांक्षानिरूपकत्वमपि सुग्रहं। भवतु चाघटपदज्ञानत्वावच्छिन्नकारणतानिरू
पिताकार्यतावच्छेदकविषयतानिरूपिता या टापदज्ञानत्वावच्छिन्नकारणतानिरूपितकारणतावच्छेदकावि
षयता तद्विशिष्टानुभवत्वाभावप्रयोजकीभूताभावप्रतियोगित्वमाकांक्षा। न तु तादृशानुभवत्वावच्छिन्नका
र्यतानिरूपितकारणत्वमेव प्रवेश्यतामलमभावयोः प्रयोज्यप्रयोजकभावांतर्भावेनेति चेत्। स्यादेवं यदि
घटेनेत्यानुपूर्वीज्ञानस्य घटकरणतानुभवत्वजन्यतावच्छेदकं न स्यात्। व्यभिचारात्। किंतु घटेनेत्यानु राम
पूर्वीज्ञानाव्यवहितोत्तरोत्पत्तिकज्ञानत्वं। घटकरणतान्वयबुद्धित्वावच्छिन्नाभावस्तु घटेत्यानुपूर्वीज्ञाना ५३

भावेन प्रयोज्यते। यद्धर्मावच्छेदेनसत्ति प्रयोजकसामग्रीकुक्षौ यद्धर्मावच्छिन्नस्य कारणस्यानुप्रवेशस्तदवच्छि
न्नाभावयोः प्रयोज्यप्रयोजकभावाभ्युपगमात्। घटीयाकारणत्वेसन्वयबुद्धेरुत्पत्तौ च घटेत्यानुपूर्वीज्ञानं घ
टपदेन टापदेन च जनिता कलशाकरणत्वयोरुपस्थितिः। घटेनेत्यानुपूर्वीविशिष्टेन निरुक्ताकांक्षाज्ञानं चेति संभू
य प्रयोजकमतो भवत्यसंसर्गाग्रहादिजन्यतावच्छेदकघटकरणतागोचरान्वयबुद्धित्वावच्छिन्नप्रतियोगि
ताकाभावत्वं प्रति घटेनेत्यानुपूर्वीज्ञानाभावः प्रयोजकः। भवति च घटपदज्ञानत्वेन टापदज्ञानत्वेन च
भेपदार्थोपस्थितिद्वाराजनकतायां कलशत्वावच्छिन्नकरणतात्वावच्छिन्नविषयताकानुभवत्वं जन्यतावच्छे
दकं। अथवा तत्रापि घटपदज्ञानाभावप्रयुक्ताभावप्रतियोगितावच्छेदकत्वादिकमेव विषयतायां निवेश्यं। इत्थं च घटपदव्य
तिरेकप्रयोज्यव्यतिरेकप्रयोज्यव्यतिरेकप्रतियोगितावच्छेदकविषयतानिरूपितेन टापदव्यतिरेकप्रयोज्याभावप्रतियो
गितावच्छेदकेन विषयत्वेनावच्छिन्नप्रतियोगिताकस्यान्वयबुद्ध्यभावस्य प्रयोजको घटेनेत्यानुपूर्वीज्ञानाभावस्तेनमा
काराकांक्षाबुद्धेः कारणत्वमक्षतं। एतादृश्याकांक्षायादिसुधियः तानां वृत्तिरितिशाब्दिकानां मतं तत्राप्रमम्मूलकमेव।

स्थ
प०वा०र० नखस्यामाकांक्षायां तादृश्येपापदार्थानामभिनिवेशः। घटत्तृतीयादीनां चाकलख्यार्थसहस्रभेदेन कारणताबाहुल्य
५४ प्रसंगात्। स्यादेतत्। घटेनेत्यानुपूर्वीविशिष्टघटपदार्थान्वयबोधजनकज्ञानविषयत्वस्वरूपायामाकांक्षायां गृ
हीतायामपि न विशेषणविशेष्यभावप्रतिनियमसंभवः। तथाहि। यत्रेत्यादावाख्यातेन प्रकृत्यर्थविशेषणात्तयावि
धेयत्वद्विशेष्यत्वया भावनायाः एवं घटेनेत्यादौ तृतीययापि प्रकृत्यर्थं प्रति विशेषणात्तया संख्याया विशेष्यत्वया च क
रणत्वस्य बोधो जन्यते। तत्र करणत्वाविशेषणकघटाविशेष्यकान्वयबोधं को वारयेत्। नहि घटेनेत्यानुपूर्व्याः
स्तृतीयार्थविशेषणबुद्धौ न सामर्थ्यं। संख्यायाऽप्यविशेषणत्वप्रसंगात्। न चार्थभेदादाकांक्षाभेदमनुमन्यते भ
वान्। न चासंसर्गाग्रहजन्यतावच्छेदकघटप्रकारककरणत्वविशेष्यकानुभवत्वावच्छिन्नोत्पत्तिप्रयोजकसा
मग्र्यामेव घटेनेत्यानुपूर्वीज्ञानस्यानुप्रवेशो न तु तथाविधकरणत्वप्रकारकघटविशेष्यकानुभवत्वाव
च्छिन्नोत्पत्तिप्रयोजिकायामिति वाच्यं कस्यचिदन्यथाव्युत्पन्नस्य घटेन सत्तोऽपि करणं घट इति बोधोत् राम
त्पाघटेनेत्यानुपूर्वीज्ञानस्य तथा सामग्र्यामनुप्रवेशावश्यकत्वात्। एवं घट एकः इति रीतिमेकत्वमिति बुद्धिद्वयेऽपि घ ५४

टेनेत्यानुपूर्वीज्ञानस्य प्रयोजकत्वमावश्यकमिति पदार्थविशेषांतर्भावेन घटेनेत्यानुपूर्वीविशिष्टघटविशेषितकरणता
बोधे सामर्थ्यमेव शक्तिः। सैव च ज्ञाताघटीयाकरणते त्यन्वयबुद्धावुपयुज्यत इति पदस्फोटवादे निगर्व इति चेत् उच्य
ते। सामान्येन प्रकृत्यर्थः प्रत्ययार्थो विशेष्यतः। आकांक्षामां निविशतेतत्तद्रूपतया द्वयं। घटेने त्यानुपूर्वीज्ञानत्वावच्छे
देन घटपदज्ञानजन्यतावच्छेदकावच्छिन्नप्रकारतानिरूपितकारणतात्वावच्छिन्नविशेष्यताशालिबुद्धिजनकताग्रहए
वस्वाव्यवहितोत्तरोत्पत्तिकज्ञानत्वावच्छेदेन कारणं। एवमपि घटपदार्थसहस्रभेदेन कारणताबाहुल्याभावप्रयुक्त
लाघवसंभवात्। एतादृशाकांक्षाग्रहेणाशाब्दबोधे जननीये टापदज्ञन्या काचिद्भिन्नपदशक्तिभ्रमजन्या करणतो
पस्थितिः सहकारिणी। न तयोराकांक्षासेवः। एतादृशाकांक्षाबुद्धिसहकृतानुपूर्वीसविशेषज्ञानं घटप्रकारिकां कार
णताविशेष्यिकां विलोमाकांक्षाज्ञानसहकृतं तु करणत्वप्रकारिकां घटविशेष्यिकां बुद्धिं जनयति॥ यस्तु द्विविधामप्या
कांक्षां प्रतिसंधत्ते स घटीयाकरणतेति घटः करणमिति द्विधापि बुध्यत एव॥ यत्तु तृतीयार्थकर्तृत्वकरणत्वादिभेदेना
ग

प०वा०र० कांक्षासेदोगौरवान्॥ किंतुवाचकतावच्छेदकभेदेनटापदस्यैसंख्यायामेकवचनत्वेन करणत्वादौतुत्ततीया
५५ त्वेनवाचकता॥ तथा चघटेनेत्यानुपूर्वीज्ञानत्वावच्छेदेनटापदत्वविशिष्टज्ञानप्रयोज्यप्रकारत्तावच्छिन्नतृती
यात्वविशिष्टज्ञानप्रयोज्यविशेष्यताकानुभवजननसामर्थ्यस्वरूपा कांक्षागत्यमाणासत्तीततीयात्वविशिष्ट
स्मारितकर्तृकरणत्वाविशेष्यकमनुभवंजनयति। यस्तुविलोमाकांक्षामनुसंधत्तेसकरणत्वकर्तृत्वादिविशे
षणतयैवप्रतियद्यते। एवंघटपदार्थविशेष्यतानिरूपितैकवचनत्वविशिष्टार्थप्रकारताकबुद्धिसामर्थ्यंघटेने
त्यत्रगृहीतंघटविशेषणतयैकत्वंभासयति। तथयज्ञेतस्वादौलिङ्नविधौलत्वेनभावनायांशक्तिरितिशक्तता
वच्छेदकभेदाद्विव्युत्पत्तिभेदेनतुतद्भेदेकुत्रापीतिमन्तंताद्वित्सो। ननुघटपदार्थान्वितटापदार्थबोधकेघ
टेनेतिपदेमिसाकांक्षायांगत्यतायामपिघटान्वितकरणत्वाबोधकत्वासाचवत्घटेनेतिपदमित्य राम
सामर्थ्यविशेषनिश्चयसंभवात्तदाघटीमाकरणत्वेसन्वयबुद्धिप्रसंगइति। घटेनेत्यानुपूर्वीविशे ५५

षावच्छेदेनघटान्वितकरणबोधकत्वज्ञानमेवकारणंवाच्यं विशिष्टबोधकत्वमेवविशिष्टेशक्तिः॥ नचभवतुविशिष्टबोधकत्वज्ञानं
कारणंवाच्यं। नचैवंवृत्तेरैक्येन ज्ञानस्यपदार्थस्मरणद्वाराकारणत्वाभावादितिवाच्यं। एतज्ज्ञानकारणत्वावश्यकत्वेस्मारक
या०३ वृत्तीनामेतद्ग्राहकत्वेनैवोपक्षयात्। प्रकारांतरेणपदानामनुभावकत्वग्रहेनपेक्षणीयसंबंधिनांवृत्तिज्ञानजनितपदार्थोप
स्थितीनामन्यथासिद्धत्वात्। एवंचप्रत्ययप्रकृतिसमुदायविशिष्टानुभावकत्वमेवशक्तिरूलङ्गहः॥ साक्षादन्वयबोधोपियो
गिनपुनरर्थस्मरणमपेक्ष्यते वाक्यार्थस्यापूर्वत्वेनतदुपस्थितेरस्मरणात्। प्रकृत्यर्थान्वितप्रत्ययार्थस्यपूर्वत्वेपिघटप्रकार
तानिरूपितकरणताविशेष्यताकबुद्धित्वावच्छेदेनपदजन्यत्वस्यसुग्रहत्वेनमेशक्तिग्रहानुपपत्तिः। वाक्यार्थमगृहीत्वापि
तज्ज्ञानसंभवादितिपदस्फोटवादोदुरपवादइतिचेत्। आस्तांतावदाप्ततत्तोविशिष्टार्थबोधजननसामर्थ्यमेवशब्दस्यविशि
ष्टशक्तिस्तथापिवाक्यार्थइववाक्यार्थबुद्धिश्चेन्नानुभूयते। नथातत्करणत्वस्याज्ञानेप्यन्वयधीर्भवायस्यपुंसोघटान्वितकर
णत्वंतज्ज्ञानंवानानुभूतंतस्यापिघटेनेत्यादिवाक्यान्वितकरणत्वानुभवस्यपूर्वानुभवासिद्धतयानविशिष्टशक्तिर्वाचकसमुदा

न्यं२

८

प.शा.र. मेगृह्यमाणविशिष्टानुपूर्वीकायत्रचघटटापंजनितघटकरणत्वबोधरूपस्थितीयघटेनेत्यादिसमुदायत्वावच्छेदेनघटपदार्था
५६ न्वितटापदार्थबोधकत्वप्रतिसंधानंचविघटते। तदासत्यपिसमुदायघटकरणताबोधकत्वबाधबुद्धिर्नप्रतिरुणद्धि जनयत्येव
घटेनेतिपदंघटकरणताबुद्धिं तदाहुः॥ नत्वाविदिनसामर्थ्योग्निर्नदहतिपचतिवेति। भवतुवाघटेनेतिपदत्वावच्छेदेनघट
करणताबोधकत्वाभावबुद्धिविरहोनिरुक्तसामग्रीघटकः। एतादृशबुद्धियदन्यबुद्धौनास्याबुद्धेः प्रतिबंधकत्वात्।स
त्यांघटेनेतिपदेघटकरणबोधकत्वा—भावबुद्धौघटेनकलशेनेत्युभयविधानुपूर्वीसत्वेघटकरणताबुद्धिसाम
ग्र्यंतरादेव। नतुप्रथमांतस्यघटपदस्यतृतीयांतस्यघटपदस्यचविषयेसामान्यतोव्युत्पन्नस्यपुंसोघटेनेतिपदंश्रुत्वा
घटकरणत्वाप्रमितिरनुभवसिद्धा। नन्वतत्रघटेनेत्यानुपूर्वीज्ञानत्वावच्छेदेनघटपदार्थान्वितपदार्थबोधकत्वंप्रतीतिच
म रमितितुल्योनुयोगः। अथादंतात्प्रातिपदिकाट्टाकास्यनमादित्वातशब्दानुशासनेनादंतप्रातिपदिकांतरितत्वावच्छेदे राम
नादंतप्रातिपदिकार्थान्वितटापदार्थबोधकत्वंबोध्यते। सचयादृशानुपूर्विकादंतप्रातिपदिकोत्तरमिनपदंतादृशानु ५६

पूर्वीकपदार्थतावच्छेदकविशिष्टान्वितटापदार्थतावच्छेदकधर्मविशिष्टबोधकमित्याकारोपलब्धस्याभाव्यादंतप्रातिप
दिकवृत्तिनिखिलानानुपूर्वीविशेषानखिलांश्चपदार्थतावच्छेदकधर्मानबुद्धिविशेषयत्वाविषमत्वावच्छेदकत्वादिकमुप
लक्षणीकृत्यविषयीकरोति। तज्जनितस्मृतिसहकृताविशिष्यपदार्थोपस्थितिर्घटेनेत्यानुपूर्वीविशेषावच्छेदेनघटान्वितक
रणताबोधकत्वमपिबोधयति। एवमेवतत्तदादिशब्दानांप्रयोगजनकविषयेलुटांवर्तमानत्वेचस्मारकशक्तिः सुग्रहा। तत्र
प्रयोगकारणबुद्धिविषमत्वोपलक्षितधर्मवतितत्तच्छब्दस्यतल्लुटप्रयोगाधिकरणतावच्छेदकत्ववत्वावांतरतत्तच्छब्दत्वा
दिधर्मवतितल्लुटः शक्तिरतएवपटंबुध्वाप्रयुक्तोपितच्छब्दोनघटस्य। नचैतस्मिन्कालेप्रयुक्तंकटपदंकालांतरस्यवाचकं॥
नवातत्कालीनोघटबोधःशक्तिभ्रमाजन्यःशक्तिग्रहस्तुसामान्योपलक्षितविशेषावगाहिसर्वोपसंहारेण। तथाहि। तत्त
पदत्वद्रूवाघटांतरतत्तात्वोपलक्षितास्तत्तत्पदत्वव्यक्तिधर्मितावच्छेदकीकृत्यतत्पदप्रयोगोपधायकबुद्धिविषयत्वड
धिकरणत्ववत्वावांतरत्तेतात्वोपलक्षितधर्मविशिष्टबोधकत्वावगाहिवृत्तिग्रहः फलतस्तत्तत्पदत्वावच्छेदेनतत्तद्धर्मवि

प॰वा॰र॰ शिष्टवाचकतामेवावगाहतेऽसौ संकेतशक्तिपक्षेप्ययमेव प्रकारः कर्त्तव्यः। इत्थमवगते सामान्योपलक्षिते विशेषेषु वाच्य
५७ वाचकभावे प्रत्यक्षादिना चोपस्थिते तत्तद्व्यक्तिं तद्व्यक्तित्वादिना वाच्यवाचकेऽचोपलक्षणधर्मापहारेण तत्पदव्यक्तौ मनसा तत्पदे तत्पदार्थ
वाचकत्वं प्रतिसंधीयते। वाचकत्वोपनायिकायाः स्मृतेः सत्वात्। सामान्यसंकेतग्रहस्य वाच्यवाचकभावसंदेहापनायकत्वे
वोपयोगः। बुद्धिविषयत्वावच्छेदेन तत्पदप्रवृत्तिनिमित्तत्वे घटत्वावच्छेदेन बुद्धिविषयत्वे च गृहीते घटत्वं तत्पदप्रवृत्तिनि
मित्तं न वेत्यादिशंकापनयात्। यदि च तत्पदव्यक्तिर्घटत्वविशिष्टबुद्धिजनिकेति शक्तिग्रहोऽभिमतः। तत्र चाविरोधिनि तद्व्यक्ति
र्घटत्वविशिष्टबोधिका न वा। घटत्वं तद्व्यक्तिजन्यप्रतिपत्तिप्रकारो न वेत्यादिशंकानसामान्यसंकेतग्रहापनेया। सामान्यध
र्मानवच्छादितविशेषयुक्ते संदेहे तथाविधनिर्णयस्यैव विरोधित्वादित्युच्यते। तदुभवतु बुद्धिविषयत्वाद्युपलक्षणधर्मभोष
पात्तत्पदव्यक्तिः घटत्वाद्यवगाहिनी सामान्यशक्तिग्रहप्रभवा शक्तिस्मृतिरेवांगं। तच्छब्दत्वावांतरतत्तात्वस्य न तच्छब्दप्रयो राम
गजनकस्य बुद्धिविषयत्वस्य च वाचकतावाच्यतावच्छेदकयोरुद्बोधकाभावात्स्मरणेन वच्छिन्नतत्पदव्यक्तित्वघटत्व ५७

॰च्छिन्नप्रकारताकादनुभवादनव॰

यो वाऽवगाहनेन मनसा घटव्यक्तिर्घटं बोधिकेति स्मरणसंभवादिति चेत्। हंतैवं। घटेनेत्यानुपूर्वीविशेषावच्छेदेन घटका
रणताबोधकत्वमपि मनसासुग्रहमित्यनुभाविकाशक्तिः स्मारकसमुदायवृत्तिरन्वयबोधांगं। स्मारकशक्तिरनु
भावकशक्त्यनुपेक्षणेतिपक्ष एव साधीयानिति चेत्। अत्राहुः। अनुभवस्मरणयोस्तुल्यप्रकारताकत्वेन कार्यकारणभावादव
च्छिन्नप्रकारताकं स्मरणमनुपपन्नं॥ न चानुपूर्वीप्रभृतिविशिष्टवस्तु सामान्येन प्रतीयते प्रतीतं वा विशिष्टत्वेन स्मर्यते।
मनस्त्वसति विशेषदर्शने प्रायेण बाह्यार्थसंशायकमेवेति सामान्येनादंतप्रातिपदिकार्थान्यतरपदार्थबोधकत्वमेवा
कांक्षा। सा च प्रथमतोऽनुशासनेनादंतप्रातिपदिकप्रवृत्तिकेनत्वावच्छेदेन प्रतिपाद्यते यदा तु घटेने स्मृतचरसम
भिव्याहारं शृणोति तदा तत्रादंतप्रातिपदिकसमभिव्याहृते नपदत्वे प्रतीत्यानुशासनातिदेशाद्वाक्यार्थं स्मरति घटे
नेत्यादिपदत्वावच्छेदेन निरुक्ताकांक्षामुपमिमीते मनसा वा निश्चिनुते। विशेषदर्शनसत्वात्। अदंतप्रातिपदिका
र्थत्वं तु। अत्वावच्छिन्नमुख्यविशेष्यताशालिपदज्ञानजन्यस्मरणप्रकारीभूतलीढत्वादशारामशरादश्यादोपदार्थस्मर

रा

प॰वा॰र॰ ५८ णायोगाच्चरमवर्णासुखमविशेष्यकोविच्छिद्यपदस्यहृदएवार्थस्मारकः। नन्वेवंघटेनेतिपदंप्रातिपदिकान्वितटापदार्थबो
धकमितिबुद्धावपिघटपदंवादंतंप्रातिपदिकमितिनिर्णयेघटेनेतिपदेघटपदार्थान्वितटापदार्थबोधकमित्यवधार
णेवा। सत्यांघटपदटापदजनितायांघटकरणत्वयोरुपस्थितौघटीयाकारणतेसन्वयबुद्धिप्रसंगइतिचेत्। नघटप
दंअदंतंप्रातिपदिकमितिबुद्धावपिसहकारित्वानभ्युपगमात्। अन्यथाघटपदोत्तरेत्वावच्छेदेनादंतप्रातिपदिकानं
तरितेनत्वादिस्वरूपावच्छेदकधर्मदर्शनाभावादाकांक्षायाएवदुरवधारत्वापत्तेः। एतादृशाकांक्षायांप्रातिपदिकत्वे
नोपस्थितेनघटपदेनजनितांघटपदार्थोपस्थितिंटापदजनितांकरणतोपस्थितिंचासाद्यजननीयशाब्दबोधंघटे
नेतिपदस्यघटपदार्थान्वितटापदार्थबोधकत्वादिबाधबुद्धिर्नविरुणद्धि। इदंपदमिदानींशाब्दबुद्धिजनकमिति
प्रतीतिवत्। फलकारणयोरेकतरस्याप्यघटनात्। परंतुप्रातिपदिकत्वाद्यनुपस्थितिदशायामपिघटेनेत्यानुपू राम
र्वीविशिष्टज्ञानाच्छाब्दबोधदर्शनादपरमप्यस्तिसामग्रीद्वयंयत्रघटपदार्थान्वितटापदार्थबोधकत्वस्वरूपांघटा ५८

न्वितकरणताबोधकत्वस्वरूपांचाकांक्षांयथाक्रममवगाहमानाभ्यांघटितंतयोरेवक्रमान्निरुक्तबाधद्वयंपरिपंथि एकवि
धौलिंगे+ एवं+। नन्वयित्यपिव्यतिरेकिनानाविधव्यासीनामिवतुल्यानुपूर्वीकेपिपदेनेकविधाकांक्षाणामज्ञानंहेतुः।
व्यतिरेकव्याप्तिग्रहविरोधित्वेनानुपसंहार्यत्वाकांक्षाविशेषपरिपंथित्तयाविशेषबोधकताववबोधोप्याभासतया
व्यवह्रियते। स्यादेतत्॥ भवतुसामग्रीत्रयंप्रयोजकंतथापिपदजनितपदार्थोपस्थितीनांघटकरणताबोधकत्वस्व
रूपाकांक्षाघटितायांसामान्यानांनुप्रवेशोनहिविशिष्टबोधकत्वेज्ञानेपदार्थस्मरणविलंबोमानाभावादतएववक्ष्य
सादावविदितप्रकृतिप्रत्ययविभागेपियुष्मदादिसंबंधबोधकत्वमनुसंधायतथाप्रमिमीते। इतिचेदभिनवोयमं
शिकस्फोटवादः॥ घटेनेत्यानुपूर्वीविशेषावच्छेदेनघटत्वावच्छिन्नप्रकारतानिरूपितकरणतात्वावच्छिन्नविशेष्य
ताकबुद्धिजनकत्वग्रहेपदजन्यपदार्थोपस्थितेरभावेघटकरणतायाःपूर्वानुभूतत्वेस्मरणमेवनत्वनुभवः। पू
र्वमननुभवेतुपदस्यमूकीभावएवनहितादृशासाम्यधर्मज्ञानघटिताभिन्नासामग्रीकल्प्यते। गौरवादितिवस्तुगतिः॥
त्प्य

व

प.वा.र. अखंडस्फोटवादिनस्तु। कत्वखत्वादिनोपलभ्यमानवामवोध्वनयोवातदभिव्यक्तः स्फोटस्तुवाचकः। सचावयवशब्दे
५९ रारब्धोद्रव्यविशेषः। शब्दस्वरूपएकमिदंपदमेकंवाक्यमेकोग्रंथइत्येकोवेदइत्यनुभवसाक्षिकोवश्यमभ्युपेयः। त
न्निशएवजातयः पदत्ववाक्यत्वग्रंथत्ववेदत्वादयः वर्णसमुदायत्वेनैवपदार्थादिव्यवहारोपपादनेतंतुमात्रातिरि
क्तपटस्याप्यस्वीकारप्रसंगः॥ सचस्फोटोवर्णानांनित्यत्वादाश्रयविनाशाभावान्नित्यएव। समवेतद्रव्याणांविना
शित्वनियमेमानाभावात्। कादिशब्दानांवायुविशेषःस्फोटस्यचधर्मैवर्णप्रत्यक्षमभिव्यंजकमपेक्ष्यतेचपदस्फो
टाभिव्यंजनोघटादिवर्णमालायामर्थसंगतेर्वाक्यस्फोटाभिव्यंजनेपदमालायाकांक्षा। ग्रंथस्फोटाभिव्यंजनादौ
वाक्यानामेकवाक्यतापन्नत्वस्यचग्रहः। पदस्फोटस्तुपर्यायभेदेननभिद्यते। समवायिभेदोपंद्रव्याभेददर्शनात्।
तथाषड्भिरूपैरारब्धस्यचित्रस्यावयवस्यनीलपीताभ्यांरक्तश्वेताभ्यामन्यतमस्याभिव्यंजनंतथा। एकस्यघ राम
टप्रातिपदिकस्यक्वचिद्घटवर्णमालयाक्वचित्कलशवर्णमालयानविरुध्यते। तदुक्तंवाक्यपदीये। यथामणिकृ ५९

पा२ पाणादौरूपमेकमनेकधा। तथैवध्वनिषुस्फोटएकएवहिविवर्तत इति॥ यद्वाभगितिपर्यायभिन्नएवस्फोटः। अतएवघटकल
शयोरेकंपदमितिनव्यवहारः। अस्तुवाप्रत्येकपर्यायाभिव्यंजनीयोवर्णमालायाः समवेतएवस्फोटः। तेनवर्णानामस्थि
रत्वपक्षेयोगपद्यासंभवात्। स्फोटारंभस्यनानुपपत्तिः। भवतुवाबोधयेदेवोक्तानुगतव्यवहारस्तुकाःपदत्ववाक्यत्व
महावाक्यत्वादयोजातयएव। घटपटत्वादिजातेर्वाविकायामिवघाव्यतायामपिएकत्वादिलाघवसंभवात्। तदा
हुः॥ शक्यत्वस्वशक्तत्वेजातेर्लाघवमीक्षतामिति। वर्णव्यक्तयस्तुवाचकजातेरभिव्यंजकतयैववाक्यार्थबुद्धा
वुपयुज्यंते। ननुसाक्षात्। अवाचकशब्दत्वेननध्वनयइतिव्यवह्रियंते। तदुक्तमभियुक्तैः॥ अनेकव्यक्त्यभिव्यक्त्या
इतिस्फोटगतिःस्मृता। कैश्चिद्व्यक्तयएवास्यध्वनित्वेनप्रकीर्तिताइति। नचैवंस्फोटस्यजातिमत्वेतस्यब्रह्मत्ववाद
विरोधः। जातेर्ब्रह्मातिरेक्यानभ्युपगमात्। सत्यासत्यौतुयोभागौप्रतिभागंव्यवस्थितौ। सायंयत्रतुजातिरसत्या
वक्तयोमताइति। वाक्यापदीयेतुसंबंधिभेदात्सत्तैवभिद्यमानागवादिषु जातिरित्युच्यते तस्मात्सर्वेशब्दाःव्यवस्थि

प॰बा॰ए॰ ६ ता॥ तांप्रातिपदिकार्थंच धात्वर्थंच प्रचक्षते। सा नित्या सा महानात्मा तामाहुस्त्वतलादय इति वदंति। तद्व्यवहारदशायामु
पेक्षणीयं। इति स्फोटनिरासः। तत्र वाचकशब्देषु प्रकृतिः प्रत्ययः पाणिनेः परिभाषा। प्रकृतिर्द्विधा। प्रातिपदिकं धातुश्च। सु
पः स्त्रीप्रत्ययस्तद्धितमिति प्रातिपदिकप्रकृतिकाः प्रत्ययाः। तिङः कृदिति द्विविधा धातुप्रकृतिकाः। तत्र सुपः किंलक्षणाः कति
विधाः। किमर्थाश्चेति प्रस्तूयन्ते। स्वौजस्सूत्रेण विहिताः प्रत्ययाः सप्तधा सुपः। त्रिभिस्त्रिभिर्विर्वा तेषामन्वर्था प्रथमादयः
स्वौजसमौट्छस इत्यादिसूत्रेण प्रातिपदिकात्परे विहिता एकविंशतिः प्रत्ययाः। आद्यंतवर्णग्रहणेन सुप् इति संज्ञायं
ते। तेषां सप्तसमुदायापन्नानां लब्धविभक्तिसंज्ञानां प्रथमा द्वितीयादिरखंडलयोग्यात् प्रथमा विभक्तिरिति क्रमेण सप्तधा व्यवह्रि
त्रयो॰३ यंते। एकैकस्य च लब्धस्यावयवास्त्रिंशो भवंति। एकत्वद्वित्वबहुत्वानां क्रमेण प्रतिपादकाः। विभक्तीनामवयवाः प्रत्येकस्य
त्रयः त्रयः। एकैकस्या विभक्तेस्त्रीणि त्रीणि वचनानि। तत्राद्यमेकत्वं। द्वितीयं द्वित्वं। तृतीयं बहुत्वमभिधत्ते। सप्तकानुग राम॰
ताधर्मास्तु न लभ्यंते यतस्त्रयः। अतः सुत्वादिनैतेषां संख्यावाचकत्वमिष्यते। तेषां वचनानामेकत्वादिविशेषवाचकत्वं सु ६

त्वादिना। ननु खंमटाप्रभृति सप्तकानुगतधर्मेण। तस्यानुगतस्यानतिप्रसक्तस्य लघोर्नियमेनाज्ञायमानस्य दुर्लभत्वात्।
एकवचनादिपरिभाषाविशेषविषयत्वादेरज्ञानेपि स्वादिश्रवणमात्रादेवतत्त्वावगमात्। एकधर्मं पुरस्कृत्यैवांचक वी॰२
त्वग्रहं प्रति। अन्यधर्मावलीढस्यानाकांक्षासहकारिणी। प्रकृतेः स्वादिसप्तकतिनादिषट्कसाधारणैकवचनत्वावच्छिन्न
स्यैकत्ववाचकत्वग्रहजनितेन पदार्थस्मरणेन जन्यमानान्वयबुद्धिं न। सुत्वाद्यवच्छेदेन प्रातिपदिकसाकांक्षबुद्धिर्ज
नयितुमर्हति। यद्धर्मसामानाधिकरण्येनाकांक्षा प्रतिसंधानं तद्धर्मावच्छिन्नवृत्तिज्ञानजनितपदार्थोपस्थितेरेव शाब्द
बोधांगत्वात्। अन्यथा सुत्वाद्यवच्छेदेनैकत्ववाचकत्वाभावग्रहदशायामपि सुवंतरजनितएकत्वस्मरणे घट एक इति
शाब्दजननप्रसंगात्। सुत्वावच्छेदेनैकवचनत्वादेर्ग्रहस्यापि कारणत्वाभ्युपगमे गौरवात्। ननु व्याकरणे न सुत्वाद्यवच्छेदे व्या॰३
नैकवचनत्वं गृहीतमिति स्मृत्योपस्थितेन सुत्वेन सुबेकवचनत्वं गृह्यते। तत्सामानाधिकरण्येन घटपदाकांक्षा। त
दवच्छिन्नवृत्तिज्ञानेनैवैकत्वं स्मार्यत इति स्वपदोपस्थिते एकेन्वयबोध इति चेत्। एवं सत्यमरस्मारस्यदेवतापर्यंतं को
न

प॰वा॰र॰ शपठितानीनाम्नांतन्त्रणपठितानुगतधर्मपुरस्कारेण देवत वाचकत्वसंभवात॥ पर्यायाणांप्रत्येकवाचकतानुपपत्तिः।को
६९ शकारपुरुषपठितत्वादिर्नितिसंकेतविषयोभवितुमर्हतीति। चेत।पाणिनिपरिभाषितत्वादिरपि नतथास्यात।नन्वस
स्रादौसंकेतग्राहकेणकेशेनषड्विंशतिवृत्ति धर्मोनोपस्थापितोपदवछेदेनदेवतावाचकत्वंप्रतीयते।ड्येकयोर्द्विवचनैक
वचनइतिसूत्रंतु एकवचनपरिभाषाप्रवृत्तिनिमित्तानुगतधर्मावच्छेदेनैकत्वसंबोधयतीति चेत्स्यादेवंयदिपाणिनिपरिभाषा
मनुगतेनप्रवृत्तिःस्यात्तत्वेवं।तथाहि।प्रत्याहारास्तावद्वक्ष्यमाणप्रत्येकवर्णवृत्तिभिरकारादिषुप्रवर्त्ततेनतावदन्यतमत्वा
पु॰४ दिभिरतएव।अविकम्प्रभृतिभिःशब्देरुपस्थिता अकोदीर्घइत्यत्रापिबोधयति। तेनकुमारीआस्तइत्यादावचिपरेइको
३ विकारोयुज्यते।तथाहि।इक्शब्देनइत्वेन ह्रस्वमात्रवृत्तिनाधर्मेणोपस्थितइकारस्तेनाष्टादशभेदभिन्नस्वरसाधारणजा
त्यवछिन्नवाचकेनदीर्घादयोपिस्मर्यते।द्विरेफपदस्मारितेनभ्रमरपदेनैव षड्पोइक्पदेनैकवाचकवाच्यस्वरूपाज्ञह राम॰
त्स्वार्थलक्षणयाअष्टादशभेदाउपस्थाप्यंते।इक्पदस्यन्हस्वभिन्नेपरिभाषितत्वाभावात।आदिरंतेनसहेत्यनेनसूत्रेणमा ६८

हेश्वरसूत्रपरिपठितन्हस्वानामेवप्रत्याहारप्रत्याय्यत्वमुत्पादनात।अणुदित्सवर्णस्यचाप्रत्ययइत्यनेनापिप्रत्याय्यसाधा
रणधर्मैरणांसवर्णग्राहकत्वमुच्यते।अन्यथान्हस्वशब्दोपात्तानामणामपितथात्वप्रसंगात।नचश्रोत्रोपस्थितानामणामे
पु॰ वसवर्णग्राहकत्वेनतुशब्दांतरस्मृतानामितिवाच्यं।इक्पदोपात्तानामप्यतथात्वप्रसंगात।नचेकारोपस्थितिकालेअष्टादशा
साधारणजातेरप्युपस्थितत्वात्तयासामान्यलक्षणयाष्टादशानामुपस्थितिर्नतुन्हस्वानामष्टादशस्वरशक्तिरित्यत्राणुदि
त्सूत्रतात्पर्यमितिवाच्यं।एवंसतिवृत्तापदादनुपस्थितेषुतिषुषष्ठ्यर्थानन्वयप्रसंगात।इक्प्रभृतिनाप्रत्याहारेण न्हस्वमात्र
वृत्तिधर्मावछिन्नशक्तेनाष्टादशासाधारणधर्मावछिन्नोपस्थित्यसंभवात।ननुमाहेश्वरसूत्रपठितेषुन्हस्वेषुदीर्घादिसाधारण्या
अपिजातेःश्रोत्रोपस्थितत्वात्तस्याएवप्रत्येकवर्णानामिगादिप्रत्याहाराणांचप्रवृत्तिनिमित्तत्वबोधकाणुदित्सवर्णस्येतिसूत्रं
नियमार्थंनानाजातीनांश्रोत्रोपस्थिततयातदेकतरपरिछेदकत्वादितिचेदेवमपिश्रोत्रानुपस्थितानिनावदन्यतरत्वादीन्यादा
यपरिभाषाप्रवृत्तेरसंभवात।एवंसुप्रत्याहारोपि सुत्वादिनैवबोधकोनतुनिमित्तांतरेण।नितरांश्रोत्रोपस्थितानवर्णान्सुप्शब्देन

प्र॰वा॰र॰ परामृश्यन्तान्येकवचनद्विवचनबहुवचनान्येकश इत्यधिकृत्य सुप इति सूत्रप्रत्येकधर्मावच्छिन्नानामेकवचनादिपदवाच्यतां व्या
६२ ख्यति। येनरूपेणैकवचनपरिभाषाविषयत्वंग्रहस्तादृप्येणैकवचनशब्दानुपस्थितौसौत्रमेकत्ववाचकताग्राहकत्वं। द्व्येकयो
र्द्विवचनैकवचनेइतिसूत्रंकदाचिदेकवचनपरिभाषाप्रवृत्तिनिमित्तत्वेनस्वरूपसत्तोपलक्षणेननानुगतेनकह्तेषु। सुबन्ता
दिषुयुगपदेकवाचकतावच्छेदकत्वंग्राह्ययेदितिनवाक्यभेदः। वस्तुतोद्व्येकयोरित्यनिर्देशाद्वाक्यमेकवचनपरिभाषितत्वोपल
क्षितधर्मिण्येकत्ववाचकतांबोधयेदेकवचनपरिभाषाविषयसुरिति। सुत्वावच्छेदेनोपलक्षणधर्मवत्ताग्रहसहकारेणसुत्वाव
च्छेदेनैकत्ववाचकतामुपस्थापयति। ननुसाक्षाच्छक्यतावच्छेदकधर्मपरिच्छेदकमतएकवचनादिपरिभाषाणामननुगतप्रवृत्ति
वि३ निमित्तकत्वेपिनक्षतिः। एकत्वमेकवचनैः सङ्ख्यान्तरैर्वर्जितं। आख्यापनेनद्विद्वाभ्यांपशुभ्यामिज्यतेशिवः। पशुनारुद्रंयजतइ
त्यादौकर्मार्थेकृतीययाएकवचनेनसजातीयनिष्ठान्योन्याभावप्रतियोगितानवच्छेदकैकत्वमुच्यते। साजात्यंचयागव्य राम
क्तिकर्मपशुत्वेनतथाचयस्यांयागव्यक्तौपशुकर्मत्वस्यान्वयस्तत्रपशौतद्यागव्यक्तिकर्मपशुनिष्ठान्योन्याभावप्रतियोगि ६२

तानवच्छेदकैकत्वमेकवचनार्थः तेनद्विपशुकर्मकोरुद्रसंप्रदानकोयागः यागव्यक्तिकर्मपशुत्वव्यापकैकत्वव्यक्तिनिरूपितस
मवायसंसर्गेणैकत्वंपशौप्रकारइतितत्त्वं। एवंद्वित्वंसजातीयान्तरशून्यंविभक्तितः। प्रतीयतेसरस्वत्यानमेषैर्यजनंत्रिभिः। द्वि
वचनैरपिसजातीयान्योन्याभावप्रतियोगितानवच्छेदकमेवद्वित्वंप्रज्ञाप्यते। अन्यथासारस्वतौमेषौभवतइत्यत्रत्रिभिर्मेषै
रपिस्वरत्तिदेवतत्वंयागस्यविध्यर्थावाधेक्रतुवैगुण्यानापत्तेः। सिद्धान्ततुमेषकर्तृकभावनाक्षिप्तायांयस्यांभावनायांसरस्वति
देवतकर्मणोर्मेषयोः कर्मत्वसमन्वयः। तद्भावनाकर्मपशुनिष्ठान्योन्याभावप्रतियोगितानवच्छेदकंद्वित्वंद्विवचनविधेयंबहुपशु
त कर्मकयागभावनायांविरुध्यतेइतिद्वाभ्यांक्रतुसाद्गुण्यंनतुत्रिभिः। जसादिभिस्तुत्रित्वादिबहुत्वेनबोध्यते। गच्छन्तिवाहा
इत्युक्तेकतीतिप्रश्नदर्शनात्। बहुवचनानांतुबहुत्वत्वजात्याप्रवृत्तिनिमित्तेनत्रित्वादौशक्तिः। नचत्रित्वत्वादिनानानार्थता
पत्तेः। त्रित्वादीनांताद्रूप्येणबहुवचनाद्बोधोपगमेवाहागच्छन्तीत्युक्तेकतीतिप्रश्नानुपपत्तेः। ज्ञाप्तिर्हिसंख्याविभाजकत्रित्व
त्वादिधर्मैःसंख्यात्वावान्तरधर्मजिज्ञासाविच्छेदात्। प्रयोक्तृपुरुषजिज्ञासाविषयसंख्यावान्तरधर्मवद्विशिष्टशक्तस्यकतिश
२

प॰वा॰र त्वस्यनिर्विषयकत्वेनाबोधकत्वात्। प्रायेणापकृतेरर्थेसुबर्थवचनान्वयः। क्वचित्तदेकदेशेपितात्पर्यादनुशासनात्। द्रव्या
६३ णिगुणाःकर्माणीत्यादौबहुत्वस्यसौमित्रिवासुदेवौइत्यादौद्वित्वस्य। गगनंभगवानित्यादावेकत्वस्यसुपास्मारितस्य
संख्यायाःप्रकृतिमुख्यार्थएवान्वयः। नतुतदेकदेशेद्रव्यत्वादौबहुत्वस्य। सुमित्रापुत्रत्वादौद्वित्वस्यशब्दस्वरूपेगगनत्वे
समग्रैश्वर्यादिस्वरूपेभगवत्त्वेचैकत्वस्यान्वयायोग्यत्वात्॥ प्रायिकंचेदं। तत्रयदादिशंतिपूज्यपादाइत्यादौपूजायामनिर्द्धारितवि
शेषस्य। वामेबहून्कुशान्कृत्वादक्षिणेतुकुशत्रयमित्यादौबहुपदार्थैकदेशेबहुत्वावच्छिन्नत्रित्वेबहुत्वलेनत्रित्वपर्यवसि
तस्य। स्वरव्ययंस्वर्गनाकत्रिदिवत्रिदशालयाइत्यादौतत्पदवाच्यत्वलाक्षणिकस्वर्गादिपदार्थैकदेशेस्वर्गपदादौचतुर्थ्यादिपरि
णतस्य। बहुत्वस्यान्वयेपिनक्षतिः। अतएवनामकरेणनबहुसाधारणंकोशेचस्वर्गादिपदंनस्वरूपपरं। वाच्यवाचकभा
वस्यलेशेनाप्यप्राप्तेःकोशत्वासंभवात्। स्वःपदवाच्यंस्वर्गादिपदवाच्यैरभिन्नमितिबोधस्यैवाभ्युपेयत्वात्। अतएवश राम॰
ब्दानांपर्यायत्वमप्यर्थतःस्वर्गनाकादीनांतुभेदाभेदौदासीन्येनद्वंद्वःसमासः। अतएवभेदाख्यानायनद्वंद्वइतिप्राथमिकीप्रति ६३

ज्ञाप्येतादृशस्थलउपसृज्यते। स्वरूपपरतातुतत्रैवयत्रवाचकतावाचिशब्दांतरंश्रूयते मृगेकुरंगवातायुहरिणाजिनयोनयः
विनायकोविघ्नराजद्वैमातुरगणाधिपाः॥ ऐरावतोभ्रमातंगैरावणाभ्रमुवल्लभाः। इत्यादौ। उर्वश्यप्सरसःपरमाणुरापःसीतारा
मदाराइत्यादावनन्वितमेवबहुत्वं। पदानुपस्थितेषुगुणेषुतदन्वयइतिमतस्यासंभवदुक्तिकत्वात्। पुष्पवंतौनासत्यावित्यादौता
त्पर्यवशाद्यत्तयोर्जात्योश्चविभागाद्विधान्वयः। साधर्म्यवैधर्म्याभ्यांतत्त्वज्ञानमित्यत्रसाधर्म्यत्वयोनीलघटयोरभेदइत्यादौनी
लत्वघटत्वयोरेव। गावौयासौद्वौदेवावित्यादावनन्वितएवद्विवचनार्थः। नित्यद्विवचनांतत्वेनानुशिष्टस्यगोदपदस्यार्थेतदेक
देशेचद्वित्वविशिष्टेद्वित्वेचद्वित्वस्यान्वयायोगात्। पशुनारुद्रंयजेतवायव्यंश्वेतमालभेतइत्यादौपश्वादावेव। वेदाःप्रमाण
मित्यादौपदार्थैकदेशेप्रमाणत्वएवतात्पर्यवशादेकवचनस्यान्वयः। संपन्नोव्रीहिःसंपन्नाव्रीहयइत्यादौजात्याख्यायामेकस्मि
न्बहुवचनमन्यतरस्यामितिसूत्रेणानुशिष्टस्यैकवचनस्यबहुवचनस्यचार्थएकत्वंजातावेव। विंशत्याद्याःसदैकत्वेसर्वाःसं
ख्येयसंख्ययोरित्यादिकोशेनानुशिष्टस्यब्राह्मणाविंशतिरित्यादावेकवचनस्यार्थःसंख्यायामेवपदार्थैकदेशेन्वेति। यत्रतुविं

 शतित्वादिसंख्यायामेवबहुत्वान्वयोविवक्षितस्तत्रबहुवचनमपिप्रमाणं।असंख्यातासहस्राणियेरुद्राअधिभूम्यामित्या
६४ ६ म्नायेतिस्तःकोट्योर्धकोटिश्चतीर्थानांवासुरब्रवीदितिपुराणे॥किमेकयैवविंशत्याबाहुभिस्त्वंविकत्थसे।पश्यरावणनाराचैः
छिन्नत्रिंशतिविंशतिरितिलोकेचप्रयोगदर्शनात्।तेशतानिवर्षसंपंचेत्यत्रशतशब्दोनेकपर्यायःतदर्थैकदेशोऽनेकत्वदेशत्वादौब
हुत्वान्वयः॥अविवक्षानन्वयोवासंख्यायायत्रतादृशो।वाक्येनप्रातिपदिकाद्वातोर्वैकपदस्मृतम्।यत्रब्राह्मणेनहतःपतितिग्र
हंसमार्ष्टिस्यादावुद्देश्यगतासंख्याऽविवक्षिता।यत्रवाचैत्रेणसुप्तीयतइत्यादावाख्यातोपात्तसंख्यान्वययोग्यप्रथमांत
श्यते पदार्थोनसंभावनान्वयीदृश्यतेतत्रापिब्राह्मणग्रहादिप्रातिपदिकात्सुबादिधातोश्चैकवचनप्रयोगःप्रायेणयुज्यते।विभक्तिं
विनाकृतायाःप्रकृतेरसाधुतयाकरणकर्मभावान्यर्थानादायलडनीयादितीयातिङःप्रयोगस्यावश्यकत्वेप्रथमोपात्तस्यै
कवचनप्रथमपुरुषादेस्त्यागायोगात्।उष्ट्रासिकाआस्यंतेहतशायिकाइत्यादावपिभाष्याकारज्ञापितमेवबहुवचनानां राम
साधुत्वं।उष्ट्रासनसदृशमासनमुष्ट्रासिकाहननापनसदृशंशायनंहतशायिका।तयोस्तादात्म्येनधात्वर्थान्वितयोःसुचुपा ६४

लस्यत्वकारोपात्तयोः।कर्तृकर्मणोर्भावनान्वयिनाप्रथमांतार्थस्यबाधाभावेनतिङुपात्तस्यबहुत्वस्यानन्वितत्वात्।एकवचनमि
त्येवसूत्रं।नत्वेकस्मिन्नेकवचनमिति।तेनेकत्वाद्यविवक्षायामपिसामान्यतःप्राप्तमेकवचनं।द्व्येकयोर्द्विवचनबहुवचनेइतिवि हो२
शेषसूत्रेणद्वित्वबहुत्वविवक्षायांबाध्यतइतिकल्पयंति।ननुगगनपदार्थैकदेशस्यशब्दस्यबहुत्वविवक्षायांगगनानीतिप्र
योगप्रसंगः।यदिचसुबुपात्तंबहुत्वंनपदार्थैकदेशान्वयीतिमतंतदाकथंवामेबहून्कुशानकुलेत्यत्रबहुत्वेबहुत्वान्वयः।अ
र्थानवकुशाधारणानुपपत्तेः।धर्मिणिबहुत्वविशिष्टेनबहुत्वान्वयः।घटोघटइतिवन्निराकांक्षत्वात्।कथंवासहस्राणी
त्यादौसहस्रत्वे।पूज्यपादाइत्यत्रपूजाख्यावाबहुत्वान्वयः।कथंवाहंदूपदार्थैकदेशेषुस्वर्गादिष्विति।चेत्।उच्यते।उपसर्ज
नतांदैवात्पदार्थोयत्रगच्छति।तस्मिन्नर्थैकदेशेपिबहुत्वस्यान्वयःसुपोगगनपदस्यशब्दोनप्रधानमर्थः।बहुशब्दस्य
तुसंख्यैववाच्या।संख्येयेषुभक्तिरतएवबहुषुबहुवचनमितिसंख्यायामेवतत्प्रयोगः।बहुवचनस्यसंख्येयवाचकताया:सर्वतत्र
विरुद्धत्वात्।एवंविंशतिसहस्रशतादिशब्दाअपिसंख्यामेवप्राधान्येनाभिदधते।द्रव्यवाचिशब्दसमानाधिकरण्यात्सुब
१८

वकु२

क्री

प० वा०र० व्हाद्येोलक्ष्म्यार्थोपसर्जनीभूतेपिस्वरान्तर्यार्थेसुवर्थबहुत्वान्वयंबोधयितुमीशते। एवंद्वन्द्वेर्थोपसर्जनीभूतपूर्जिघाल्वर्थे। स्व
६५ रूपंशब्दस्याशब्दसंज्ञेत्यादिश्राहितसंगतिकेस्वर्गशब्दस्वरूपादौचनबहुवचनार्थान्वयः। गुरुत्वगुणयोरैक्यात्तादात्म्यं
दृश्यतेतस्मोः। गुणसौरभगंधानामभेदइतिदर्शनात्। द्वंद्वगर्भपदार्थैकदेशे युद्धिबहुत्वयोः। अन्वयोयुज्यतेकिंवासाधुत्वा
यविभक्तयः। गुणसौरभगंधानामभेदइत्यत्रनित्यमेवोपसर्जनीभूता सुजातिषुयद्बिबहुत्वान्वयस्तद्वाद्वंद्वेभिन्नेवव्युत्पत्तिः
नैवेदापोगृहाः सिक्तावर्षाः सुमनसोप्सरसोलाजा इत्यादावविवसाधुत्वार्थकमनन्वितमेवेहशास्त्रेबहुवचनं। एकत्वंद्वि
त्वमप्यर्थोजसादेरनुशासनात्। आहैकवचनंद्वित्वमाहद्विवचनंबहून्। यत्रतान्यन्वितमेकत्वंविवक्षितंतत्रबहुवचनमथा
नुशासनिकंसाधु। संपन्नोव्रीहिःसंपन्नाव्रीहयइत्युभयविधप्रयोगदर्शनात्। संपन्नशब्दादीनांतुबहुवचनंविशेष्यपार
तंत्र्यप्रयुक्तं। एवमहंब्रवीम्यावांब्रूवइत्यर्थेन्यतरस्यांवयंब्रूमइतिप्रयोगात्॥ अस्मदर्थान्वितमेकत्वंद्वित्वंचयुष्मदरवइत्य रास
त्रयुष्मदर्थान्वितमेकत्वंद्वित्वंचबहुवचनार्थः। पुनर्वसुःपुनर्वसूवाविशाखाविशाखेवानक्षत्रमितिछंदसि। द्वित्वमप्येकवच ६५

नार्थः लोकेतुपुनर्वसुविशाखाशब्दौद्वित्वद्विवचनांतौपुष्पवंतनासत्यपदवत्। तिष्यश्चपुनर्वसुचेत्यादिविग्रहेतिष्य
त्वस्यतिष्यपुनर्वसूसिध्यपुनर्वसूइत्यादिद्वंद्वस्यद्विवचनंबहुत्वमभिधत्ते। तिष्यपुनर्वस्वोर्नक्षत्रद्वंद्वेबहुवचनस्यद्विव
चनंनित्यमित्यनुशासनात्। अत्रबहुवचनस्येतिविशेष्योपादानेनाद्दशास्त्रेतिष्यपुनर्वस्वोरित्येकवचनांतःप्रयोगो
प्यस्तीत्यवगम्यते। येनत्वामंत्रेसर्वद्वंद्वोविभाषयैकवद्भवतीतितिष्यपुनर्वस्वित्येकवचनमेव। ननुतिष्यपुनर्वसुनीइतिद्वि
वचनमितिकाशिका॥ नचैकत्वविशिष्टघटादौप्रातिपदिकानामेवशक्तिरस्तु। संतुचव्यंजकान्येकवचनानीतिचेत्। उच्यते। गु
रुत्वादिलिंगम्यत्वशक्तिग्राहकविपूर्वैः। अप्रसिध्याचशास्त्रस्यनसंख्याव्यंजिकाःसुपः। सुप्प्रत्ययांतघटपदत्वादितिवाचक
ता त्वायांएकत्वविशिष्टघटत्वादिनावाच्यतायांचगौरवंशरीरतःघटपदोत्तरसुत्वादिनापिवाचकत्वसंभवेनैकतरपरिच्छेदकवि
निगमकाभावः। द्व्येकयोर्द्विवचनैकवचनइतिव्याकरणास्मवाक्यार्थबुद्धेः पूर्वमेकत्वादिविशिष्टघटाप्रसिध्यातत्रप्रमाणां
तरस्यचशक्तिग्राहकस्याकोपःसुतरांचगगनानिब्रह्मणीत्यादौबहुत्वविशिष्टगगनादेर्बहुवचनांतगगनादिपदशक्यस्या

प.वा.र. प्रसिद्धिरितिघटपदस्यघटोविभक्तीनामेकत्वाद्यर्थइत्येवोचितंनतुसुपोव्यंजकत्वमितिवचनार्थविवरणं। विभक्तिः प्रथमांतेषु
६९ स्वौजसः प्रत्ययमात्रयः। अभिमुख्यंतदर्थस्तदभीष्टप्रत्ययात्मकं। सुपांमध्येसुऔजस्इतित्रयःप्रत्ययाः। प्रथमाविभक्तिरि
त्यन्वर्थाः प्राचीनानांतदनुसारिणांपाणिनियानांचसंज्ञाः। शक्तिस्तुत्वादिनैव। उकारजकारयोरनुबंधयोःप्रयोगेनित्यम
श्रूयमाणयोः वाचकत्वानंतर्भावात्। तस्याःप्रथमायाः ब्रह्मनगणलयचंडसुंडोगच्छतदेवाःप्रसीदतेत्यादावाभिमुख्यम
र्थसाध्याभीष्टज्ञानस्वरूपं। तत्रसमवेतसमवायिभावेनप्रातिपदिकार्थस्याभीष्टज्ञानेतस्यचविषयतयाएककर्तृका
यामाशंसाविषयपालनक्रियायामाशंसाविषयपालनकर्तृत्वैकत्वेबाख्यातोपात्तैकत्वेरिक्तोवातादात्म्येनाधारा
धेयभावेनाध्यात्मत्वंपदार्थस्यविशेषणतयाविशेषत्वमावान्वयः। युष्मादिसमानाधिकरणेमध्यमपुरुषविधानात्।
संबोधनप्रथमांतार्थेनकर्तुरन्वयासंभवात्। तथाचब्रह्मसमवेताभीष्टज्ञानविषयएकत्वत्वकर्तृकाशंसाविषयपाल राम
नक्रियेति। आशंसाविषयपालनकर्तैकत्वमितिवा। ब्रह्मनपालयेत्यत्रवाक्यार्थबोधः। संबोधनप्रथमायास्तुज्ञान ६९

मिच्छाचरंडश्चोर्थः। ज्ञानंविशिष्टवाक्यार्थत्वावच्छिन्नविषयतयाक्रियायामिच्छाचप्रातिपदिकार्थसमवेतवाक्यार्थवि
षयकज्ञानत्वावच्छिन्नविषयतयाज्ञानेन्वेति। तेनवाक्यार्थविषयज्ञानसमवायित्वेनोद्देश्यत्वस्वरूपंसंबोध्यत्वमर्थः।
प्रतिपाद्यपुरुषेप्रतीयते। संबोध्यत्वंचैकवचनसहकृतप्रातिपदिकेनएकत्वविशिष्टस्वप्रवृत्तिनिमित्तधर्मावच्छेदेन
बोध्यते। यद्रूपावच्छेदेनचसंबोध्यत्वंप्रथमयाप्रत्याय्यतेतद्रूपविशिष्टमेवयुष्मदापरामृश्यते। संबोध्यतावच्छेद
कत्वोपलक्षितधर्मविशिष्टएवयुष्मत्पदवाच्यइतिएवहेब्राह्मणास्त्वंप्रसीदत्वांप्रणमामित्वयाभुज्यतामित्यादि
योनप्रयोगाः। बटुब्राह्मणत्वावच्छिन्नायाएवसंबोध्यतायाःप्रथमयोपात्तत्वेनतद्रूपावच्छिन्नस्यैवयुष्मदापराम
र्शात्रैकवचनस्यानन्वितार्थकत्वादसाधुत्वाच्च। एवंयत्पदगर्भवाक्येनयद्रूपविशिष्टस्योपस्थितिस्तद्रूपवि
शिष्टपरामर्शिनितच्छब्देपिवचनैक्यव्यवस्थाउद्देश्यमानमेलप्रयोगात्। यच्छब्दगर्भवाक्येबटुत्वविशिष्टपाकक
र्तृमनुष्यत्वविशिष्टस्योपस्थितत्वात्तद्रूपविशिष्टपरामर्शितच्छब्दार्थेएकवचनार्थस्यान्वयात्। हेचंडहेसं

दारि

प॰वा॰र॰ ६२ डबलैर्बकुलैः परीतो। तत्र गर्भत्वेन गतत्वाच्च सा समानीयतां लघु इत्यादावेकत्वविशिष्टचंडत्वाद्यवच्छेदेन प्रथमायाः संबो
ध्यत्वबोधनेपि तादृशरूपद्वयावच्छिन्नपरामर्शिनो पि यच्छब्दाद्द्विवचनं नानुपपन्नं। एकघटैकपटावित्यादि
द्वंद्वसमासस्थलप्रकृत्यर्थतावच्छेदकनानात्वेनावत्समानाधिकरण्यासंख्याया एव प्रतिपाद्यत्वात्। अत एव यश्च मृदुत्तमो
लोके यश्च बुद्धेः परंगतः। तावुभौ सुखमेधेते सीदत्यंतरितो जन इत्यादौ यद्गर्भवाक्येनैकत्वविशिष्टमृदुत्तमादेरु छब्द॰४
पस्थापितत्वेपि तदुभयपरामर्शिनस्तच्छब्दाद्द्विवचनमप्युपपन्नं। हे सौमित्रे सखे श्यामस्तेनिर्विशेषस्त्वया गुहः सु ख।
वांगत्वा नदीमेनां शीतमानयतां पयइत्यादौ यच्छब्दाकांक्षापरिपूरणाक्षमेण तच्छब्देन युष्मदएकशेषे स्मृते तच्छब्दा
र्थे युष्मच्छब्दसंवादाय द्विवचनोपपत्तिः। जानीहि नाथदीनोस्मीत्यादावप्रामाण्यशंकाशून्यनिश्चयोपि ज्ञाधातोरर्थः। अ
न्यथा मदीयदीनत्वभावस्वरूपवाक्यार्थे प्रथमार्थनाथसमवेतास्मीत्यज्ञानस्य विषयतयान्वयेनावश्यकिनार्थेनिष्पत्तौ राम॰
जानीहीत्यस्य पौनरुक्त्यप्रसंगात्, यत्तु। नाथ पालयेत्यादौ संबोधनप्रथमांतपदार्थ एव पालनकृत्यन्वय इति। तन्न॥ ६७

अभिमुखे ग्रणीभूते प्रथमांतार्थे आख्यातार्थान्वयायोगात्। अन्यथा नारायण द्रुव नरो गच्छतीत्यत्र नारायणेपि गम
नकर्तृत्वान्वयप्रसंगात्। युष्मदाख्यातयोराकांक्षारूपसामानाधिकरण्यं विना मध्यमपुरुषस्यासाधुत्वाच्च। न च यु
ष्मदिच्छानिन्यपि मध्यमपुरुषोनुशिष्यते। युष्मदच्छानिलंत्वं च युष्मत्पदपर्यायसंबोधनपदप्रयोगेप्युपपद्यत इति वा
च्यं। भवच्छब्दसामानाधिकरण्येपि तथात्वप्रसंगात्। यद्विसंबोध्यपुरुषो ज्ञाने समवेतत्वेन विशेषणविषयत्तमाच्चे
च्छात्र ज्ञानं वाक्येन प्रधानतया प्रतिपाद्यमाने भावनायां क्रियायां प्रथमांतार्थे वान्वेति। संबोध्यवृत्तिवाक्यार्थज्ञा
नस्य सिद्धत्वनिश्चयदशायां संबोध्यवृत्तिवाक्यार्थज्ञानस्य च वाक्याजन्यत्वनिश्चयदशायां च चैत्र त्वं गच्छेत्यादि
कारणपारवेनेत्यर्थः प्रयोगोपत्तिः। भाविभूतेतपुरुषांतरीयेच्छाविषयत्वस्य चैत्रीयवाक्यार्थज्ञाने बाधितत्वात्। अगृहीतपदसंकेतं भाविभूतयोः पुरुषांतरीयेच्छयोरित्यर्थः ३
म्लेच्छसुदीश्याचार्यैः प्रयुज्यमानस्य शृंगापसरेत्यादिवाक्यस्य शक्तिभ्रमाजनकत्वेनोपहासस्यत्वापाताच्च। तत्काली
नतत्पुरुषीयेच्छाविषयत्वस्य तद्वाक्यजन्यत्वस्य ज्ञानप्रवेशेसंबुद्धिपदशास्त्रमान्यं त्यदुर्ग्रहत्वं च स्यादिति चेत्। उच्यते। यथा
२ अगृहीतसंकेतोद्देश्यकतयोपहास्यत्वसंभवात्, न च शक्तिभ्रमजन्यत्वस्योपहास्यत्वप्रयोजकत्वमिति वाच्यं तथा सत्यपभ्रंशेऽप्युपहास्यत्वापत्तेरित्यर्थः २

२ तत्पदत्वावांतरतत्त्वालोपलक्षितानां तत्तत्पदानां तत्तत्पदत्वंधर्मिताावच्छेदे किंतु तत्पदप्रयोगोपधायकबुद्धिप्रकारत्वावांतरतत्त्वालोपलक्षितधर्म २
२ विशिष्टे शक्तिर्यथा तथा स्वघटितवाक्यप्रयोगोपधायकत्वोपलक्षितेच्छायां स्वघटितवाक्यजन्यत्वोपलक्षितेज्ञाने च संबोधनप्रथमायाः शक्तिः २

प॰वा॰र॰ युष्मत्पदादीनां कालपुंवाक्यभेदतः। प्रवृत्तयो न भिद्यंते प्रथमायां तथैवताः। कालपुरुषांतरीयेच्छाविषयप्रमाणांतरेजन्य
६८ वाक्यार्थबुद्धिसमवायित्वावच्छेदकधर्मवति त्वेच्छे युष्मच्छब्दस्याचार्यैः शक्तिभ्रमं विना। प्रयोगाद्यथा विशिष्यैतत्तत्पदानां
तत्तत्पदप्रयोगजनकेच्छाविषयतत्तत्पदजन्यवाक्यार्थबुद्धिसमवायित्वं तदवच्छेदकत्वं वा प्रवृत्तिनिमित्तं। तदनुग
मकं वा साधारणधर्मं पुरस्कारेण वक्ष्यमाणरीत्या गृह्यत इति नाननुगमस्तथा। संबुद्धिप्रथमाया अपि शक्तिः। का
लपुरुषवाक्यविशेषोपलक्षिताभीष्टज्ञाने पीति नाननुगमो भवतीति व्युत्पादयिष्यते। ननु तथापि अर्कोऽडुशक्ति
निर्भिन्नैव त्वं जहति चेत्तन्नाहतावारामकस्यार्थे दग्धं जीवितमिच्छसीत्यादौ चक्रारिसंबोध्यत्वमनुपपन्नं। तदाहितस्य
पुंसो वाक्यार्थज्ञानस्यासत्वे वाक्यप्रयोग एवानुपपन्नः सत्वे तु तत्र च सिद्धे विषये वाक्यजन्यो वाक्यार्थबोधश्च न
संभवतीति प्रथमार्थबाध इति चेत्। उच्यते। प्रमाणांतरनिष्पन्नवाक्यार्थज्ञानजन्मना। वाक्येन जन्याभीष्टा धीर्वे राम
त्कार्येपि न बाधिता। प्रमाणांतरजन्यायां वाक्यार्थबुद्धौ सत्यामपि वाक्यजन्यवाक्यार्थबुद्धित्वावच्छेदेनेच्छानानुप ६८
२ शक्तियहस्तु सामान्योपलक्षितविशेषावगाहिनी संपद्यते इति संबोधनप्रथमाया अपि प्रथमात्वावांतरतत्त्वालोपलक्षिततत्प्रथमात्वं शक्ततावच्छेदकमिति २

पन्ना। श्रवणसिद्धावपि मननेच्छावत्। सिद्धिस्तु शाब्दबुद्धिं प्रति न प्रतिबंधिका। प्रतिबंधिकापि चेदसत्यामेव शाब्दे
छायामिति वक्तुरपि स्ववाच्यजनकाभीष्टवाक्यार्थबुद्धिसमवायितया संबोध्यत्वमबाधितमिति। अचेतनेपि संबु
प्र द्धिप्रथमायाः स्युज्यते तस्या स्तुत्याग तिस्ते पुनिर्दिष्टे युष्मदादिभिः। जहीहि तरलां लक्ष्मीमेतां लज्जामरपादापां। हृदय
हतमार्कितेऽचिंतामणेरपि चिंतया। जठरदहनज्वालाशांत्यै वेदिस्युरिमीतदीस्वपि तु रुदध्वे रौरवं निर्वापयेरुर्वचु पु४
धां। इत्यादावचेतनस्य हृदयस्य संबोध्यत्वबाधेपि प्रयोगो युष्मच्छब्दप्रथमपुरुषादिप्रयोगेन तुल्ययोगक्षेमः।
चेतनक्षेत्रज्ञतादात्म्यारोपेण संबोध्यत्वभ्रमजनकतया गौण्या वृत्त्यार्थांतरप्रतिपादकतया वा संगमनीयः। अ
त एव तुल्ये प्रस्तुतेतुल्यस्याभिधानमित्यप्रस्तुतप्रशंसविशेषलक्षणमुदाहरता प्रकाशकारेण कस्त्वं भोः कथया
मि दैवहतकं मां विद्धि शाखोटकमित्यादावकिंचनस्य कस्यचिदनुपकुर्वतो मनस्विनः प्रस्तुतस्य तादात्म्यारोपेण यु
ष्मच्छब्दसंबुद्धिसच्छब्दोत्तमपुरुषाणामर्थे शाखोटकाभेदेनाध्यवसितः वस्तुतोऽर्थः संबध्यत इत्युक्तं। प्रस्तुतार्थ
त्मे

प॰ वा॰ र॰ स्यव्यंजकतयालक्षणयावोपस्थितिरित्यन्यदेतत्। यत्रतुव्यंजनयालभ्योर्थः प्रकृतवाक्यार्थेतादात्म्येनाध्यवसितः
६९ सन्नन्वयाबाधेनिर्विशतितत्रगुणीभूतव्यंग्यमेवनत्वप्रस्तुतप्रसंसा। यथा। आगत्यसंप्रतिवियोगविसुष्टुलांगीमंभोजीनींक्वचिदपिक्षपितत्रियामः। एतांप्रसादयतिपश्यशनैःप्रभातेतन्वंगिपादपतनेनसहस्ररश्मिः। अत्रव्यंजन
यावृत्त्याप्रतीतिपथमवतरन्नायकयोर्वृत्तांतोरविकमलिनीवृत्तांततादात्म्येनगुणीभूतसमासनेनतुप्राधान्येनदर्शि शि॰
कर्मत्वानुपपत्तेः। नापिध्वनिविधयोदीच्यवाक्यार्थबोधे। पश्यत्वंचाम्भपहायतथासतिखंडितामानमपनिनिष
तःसागसप्रियस्यार्थांसांप्रतिपादयतोलोटोनुपपन्नत्वप्रसंगात्। नहितन्नतस्यमानापनोदनोपायादन्यदाशास्यं
नचरविकमलिनीवृत्तांतदर्शनंतदुपायः। रविकिरणपतनजनितकमलिनीकुसुमव्याकोचतादर्शनस्यकयापिवि
धयाखंडितायाःमनित्यागाध्यवसायाजनकत्वात्। नायकप्रणिपातजनकमानिनीप्रसादाभेदेनावगतस्यदर्शनं राम
तुप्रियप्रणामंतोमानइतिनिश्चयद्वाराप्रभवतितस्याःप्रणयकोपभंगायेतिविस्तरोरसमहार्णवेऽनुसंधेयः। एक ६९

तिङ्वाक्यमित्युक्तंकात्यायनमहर्षिणा। संबोध्यत्वंक्रियाविशेषस्तदर्थ इतिशाब्दिकाः समर्थसूत्रेएकतिङ्वाक्य
मितिकात्यायनवाक्येतत्रभाष्यकारेणब्रूहिदेवदत्तेतिवाक्यमुदाहृतम्। तस्यायमभिप्रायदिक्रियासहसंबोध्य
स्यान्वयेआख्यातसंबोधनांतयोर्व्यपेक्षानस्यात्। तदानिघातोनामसर्वानुदात्तस्वरोदेवदत्तपदआमंत्रितेनप्र
युज्येत। आमंत्रितस्यचेतिसूत्रेणासंत्रितप्रत्ययांतानांपदात्पराणामेवनिघातविधानात्। पदयोस्तुव्यपेक्षारूप
सामर्थ्यविरहेपदसंबंधिनोविधेरप्रवृत्तेः। समर्थःपदविधिरितिव्यवस्थापनात्। अतएवसमानवाक्येनिघातयु
ष्मदस्मदादेशाइतिपठंति। तयोर्व्यपेक्षातुसंबोधनपदार्थस्यप्रधानीभूतानांक्रियायामन्वयेसत्युपपद्यते। नचा
ख्यातएवकर्तरिसंबोधनपदांतार्थस्यतादात्म्येनसंबोधनार्थस्यवाआश्रयाश्रयिभावेनान्वयोस्त्वेतावतैकवा
क्यतानिर्वाहइतिसांप्रतं। मध्यमपुरुषार्थेयुष्मदर्थातिरिक्तस्यतादात्म्येनान्वयायोगात्। देवदत्तव्रजामीत्यादावा
ख्यातोपात्तेकर्तरिसंबोध्यत्वस्यबाधाच्च। यदुक्तंहरिणा। संबोधनपदंयच्चतत्क्रियायाविशेषणं। व्रजानिदेवदत्ते

प॰ वा॰ र॰ तिनिघोतोप्रतथासनीतिनसमास्संबोध्यत्वंप्रातिपदिकंप्रति विशेष्यंक्रियायांतु विशेषणं। क्रियाविनाकृतंवाक्यमेव
७॰ नास्तीतिकात्यायनानुयायिनोवैय्याकरणाः। एकतिङ्वाक्यविदेपि महाभाष्यानुसारिभिः। वाक्यबोधप्रधानार्थसंबो
ध्यत्वान्वयोयतः। महाभाष्यकृतैस्ताकदेकतिङ्वाक्यमितिकात्यायनवाक्यंनानुमन्यंतेतेहिपश्यमृगोधावतिजानी
हिजगज्जगन्नाथज्ञायतेइत्यादौध्यावनदर्शनयोर्जनिज्ञानयोश्चकर्मकर्मभावेनास्तिसाधवः सीदंतिभवतिदुर्ज
नामोदंतइत्यादौसाधुसादसत्तयोर्मोदप्रभवनयोश्चकर्तृक्रियाभावेनानुभवसिस्मरिष्यसियजसेअंगमोक्ष्यसइत्या
दौसिद्धसाध्यसमभिव्याहारस्थलेत्वकर्तृकयोरनुभवस्मरणयोर्यागस्वर्गभोगयोश्चकरणकार्यभावेनान्वय
मभ्युपगच्छंतोमइ॰ तिङ॰ तमप्येकंवाक्यमभ्युपगच्छंतिस्मरंतिच। सुबंतंहिप्रधानेकंसुबंतस्यविशेषणं। तथाति
ङं॰ तमप्याङ्क्तिङंतस्यविशेषणमिति। अतएवतिङं॰ तभिन्नात्परं तिङं॰ तेनिहन्यतइत्यर्थकं तिङ इतिसूत्रेअग्नि राम॰
मीडइत्यादावाख्यातेडेशब्दस्यनिघातस्वरंविदधते। पचतिपश्येतिवाक्येपश्येत्यस्यतद्धारणार्थपूर्वपदेतिङ॰ पर्यु ७॰

५

दासायातिङ् इतिपर्युक्तं। अन्यथाख्यातयोः। सामर्थ्याभावादेवपदविधेरप्रसक्तौतदानर्थक्यंस्यात्। नन्वसुप्सतिङ्वा
क्यमित्यपियुज्यते। शशीदिवसधूसरोविगतयौवनाकामिनीसरोविगतवारिजंमुखमनक्षरंस्वाकृतेः। प्रभुर्धनपरायणः
सततदुर्गतस्सज्जनोनृपांगणगतः खलोमनसिसप्तशल्यानिमेइत्यादौसुवंतचयस्यपश्यपचतीत्यत्रतिङं॰ तत्वयस्यकेव
लस्यापिवाक्यत्वदर्शनादाख्यातपदंविनापदांतरमाहितसकलपरिकरमपिमूकतयाऽवतिष्ठतइतिकात्यायनप्रलापस्तु स॰
ज्ञामात्रं। व्युत्पत्तिभेदेनकस्यचिदाख्यातार्थः कस्यचित्प्रथमांतार्थएववाक्येनप्रधानतयाबोध्यते। तत्रतन्नैवचसंबोधन
परार्थस्याभीष्टज्ञानस्यतावद्विशिष्टविषयत्वसंसर्गेणान्वयइतिव्यर्थः क्रियान्वयाभिनिवेशः। अतएवदेवदत्तकोयश
दत्तइत्यादौजिज्ञासाविषयजातिगोत्रादिगुणविशिष्टयज्ञदत्तत्वावच्छिन्नविषयतयाद्देवदत्तसमवेतत्वेनाभीष्टज्ञानम
न्वेत्युपपद्यतइतिसर्वदर्शनसमंजसः पंथाः। एतेनक्रियामात्रसाकांक्षपदगणनिसंबोधनांतस्योल्लेखः प्रमादमूलकएवे
तिध्येयं। अन्यमात्रामंत्रणाल्लिंगवचनेप्राहकेवलं विभक्तिः प्रथमाकर्माद्याधिक्येन्याविभक्तयः। आमंत्रणप्रथमाभिन्ना

प॰बा॰र॰ प्रथमा नर इत्यादौ पुंस्त्वं। लक्ष्मीरित्यादौ स्त्रीत्वं। बृहन्नलमित्यादौ नपुंसकत्वमेकत्वादिसंख्या रूपं वचनं चाभिधत्ते। द्वि
७१ तीयाद्या विभक्तयः कर्माद्यधिकमभिदधाना एव लिंगवचने प्रतिपादयंतीति न तु केवल्येन। ननु प्रातिपदिकार्थे लिंगपरि
माणवचनमात्रे प्रथमेत्यनुशासनाज्जातिवाचिनो गवादिपदाद्व्यक्तिलाभार्थं प्रथमा या व्यक्तौ द्रोणो व्रीहिरित्यादौ द्रो
णादिपरिमाणस्य व्रीहौ अभेदान्वयाय गुरुत्वस्वरूपे तथैवार्तिः कुडमित्यादौ परिमाणस्वरूपे पि शक्तिरावश्यकी। अ
न्यथा व्यक्तेरलाभात्। प्रातिपदिकार्थयोश्चाभेदेनान्वयायोगादिति चेदुच्यते। अन्यलभ्यतया जातिमतो गुणानस्त
था। निरर्थः प्रातिपदिकार्थेषु प्रथमाविधिः॥ गवादिप्रातिपदिकाद्वाक्षेपाल्लक्षणया या शक्त्या वा व्यक्तेः द्रोणादेस्त्वोः
प्रातिपदिकाच्च तद्धितलोपेन भक्त्या वा गुरुत्वपरिमाणवतोर्लाभसंभवे व्यर्थः प्रातिपदिकार्थादौ प्रथमावाच्यत्वविधि
रिति व्याख्यायां भः। सूत्रेण प्रातिपदिकार्थः सत्ता व्यक्तिरेव सा। आकृतिः परिमायां तद्व्यक्तिधर्मोपलक्षणं। प्रसिद्धे राम
लिंगवचने तावन्मात्रे विवक्षिते। प्रथमांतप्रयोगस्य साधुत्वमनुशिष्यते। प्रातिपदिकार्थः सत्ता तस्मात् तथैव व्याख्या ७१

६

नात्। सत्ता च व्यक्तिरेव। सत्त्वप्रधानानि नामानीति निरुक्ते व्यक्तौ सत्त्वपदप्रयोगात्। लिंगं स्त्रीपुंनपुंसकं च। वचनान्येकत्व
द्वित्वबहुत्वसंख्या परिमाणमाकृतिरवमवसंस्थानस्वरूपा। तया प्रवृत्तिनिमित्तधर्मसामान्यमुपलक्ष्यते। तावत्सु
परस्परमस्खलितविषयताकेषु विवक्षितेषु धर्मत्वादौ वा विवक्षिते प्रथमांतपदप्रयोगो न पश्यत्तमानादित्वेनाभ्यु
दयविशेषसाधनत्वेन जातिविशेषणवासाधुरित्येव प्रातिपदिकेत्यादिसूत्रार्थः। ननु प्रातिपदिकार्थादिवाचिकाप्रथ
मेत्यनुशासनमिदं। अनपभ्रष्टानादिर्यद्वाभ्युदयसाधनं। व्याक्रियाव्यंजनीया वा जातिः कापीह साधुता त्यनेन लक्षि
७२ तस्य साधुत्वस्यानुशासनाय व्याकरणप्रवृत्तिरित्याकरेषु साधुत्वज्ञानविषया सैषा व्याकरणस्मृतिरिति वाक्यपदी
ये व्यक्तत्वात्। प्रधानप्रत्ययार्थवचनमर्थस्यान्यप्रामाणिकत्वादिति सूत्रेर्थस्य पदपदार्थयोर्वाच्यवाचकभावस्य प्र
धानोपसर्जनभावस्य च प्रमाणांतरसिद्धत्वेन व्याकरणास्प्रतिपाद्यत्वमिति पाणिनिनैवाभिहितत्वात्। सिद्धे शब्दा
र्थसंबंधे समानायामर्थावगतौ साधुभिश्चागम्यागम्येतिवन्नियमः क्रियत इति भाष्यस्वरसाच्च व्याकरणस्य शक्ति

प॰ वा॰ र॰ मध्येपरिगणनंतुप्रातिपदिकार्थेस्वादिसूत्रेणलिंगप्रवृत्तिनिमित्तसंख्याबोधकंप्रथमांतंसाधितिकंठतउक्तेबोधकत्वा
७२ न्यथानुपपत्त्यावृत्तौकल्प्यमानायांप्रातिपदिकाप्राप्ययोर्लिंगसंख्ययोः सुपांसुचप्राप्ययोर्व्यक्तिप्रवृत्तिनिमित्तयोश्चप्रा
तिपदिकानांशक्तिःकल्प्यतइतिप्रमाणांतरोत्थापकत्वेनानतुसाक्षात्।अभेदत्वेननामार्थेसुपांवृत्तिरितिभ्रमः।व्यक्तिसं
व्यु॰ ४ तः प्रतीयंतेसाधुत्वार्थासुपोयतः।यच्चप्राक्शुसादितंस्वरूपभेदाभावत्वेनप्रातिपदिकार्थव्यक्तयोविशेषणविभक्ती
नामसाधुत्वमात्रार्थकत्वंव्याकरणसिद्धत्वात्।तथाहि।लुपियुक्तवद्व्यक्तिवचनेइत्येकंलुपशब्देनलुप्तप्रत्ययप्रकृ
तिलिंगवचनएवप्रयोक्तव्येनतुलवणादिपदवद्विशेष्यनिघ्नतयालिंगवचनांतत्वप्रयोगः।यथापंचालीनांक्षत्रिया
नियतबहुवचनपुंलिंगविषयास्तेषांनिवासेजनपदेतद्धितः।लुपिकृतेपंचालानामजनपदइति।यथाविदेहाःकुरवा
मगधामत्स्याअंगावंगाःकलिंगाःसुंह्मापुंड्राइत्यादावसर्थकमपरंतुविशेषणानांवाजातेरितितद्विशेषणानांतद्व्य
क्तिवचनेस्यातां।जातिवाचकंपदंवर्जयित्वा।यथापंचालारमणीया।जातौतुपंचलाजनपदः।एवंगोदयोर्निवासोग्रामेपि राम॰ ७२

गोदौबहुक्षीरघृतौजातौतुगोदौग्रामइत्यर्थकमेतत्सूत्रद्वितयं।प्राचीनवैय्याकरणानामनूद्यतदशिष्यंसंज्ञाप्रमाणत्वा
दितिपाणिनिरसूत्रयत्।पंचालादीनांनियतलिंगवचनत्वंतद्विशेषणानांवातत्तुल्ययोगक्षेममशिष्यं।संज्ञानियतौव्यव
हारस्यास्मादेवप्रमाणादनर्थकानांपंचालादिविशेषणपदेषु।तत्तल्लिंगवचनवाचितुल्यानुपूर्वीकानांसुपांप्रतिनिय
मनस्यसिद्धत्वादापोदशावदितितदर्थः।सुबर्थाएवनामार्थाःसुपामल्पत्वलाघवात्।व्यंजकंप्रातिपदिकंमतमित्यप्यसंगतं।
यत्तुघटादीनपिप्रातिपदिकार्थीवाचकसंख्यालाघवेनसुपामेववाच्यानाहुस्तेषांमतेयदिघटाद्यंतरसुत्वनवाचकता
यांप्रविष्टत्वमेवप्रातिपदिकस्यव्यंजकत्वं।तदाकलाघवावकाशः।अथसुत्वेनैववाचकत्वंतत्रचप्रातिपदिसमभिव्या
हारोविवरणादेरवाचकस्योपसंदानमिवोपयुज्यतइतिमतंतदापिसमासेसुब्भिनात्कृतादन्वयबोधोनस्यात्।तस्मा
द्यार्थवत्त्वाभावेप्रातिपदिकसंज्ञेतिदिक्।कालाभ्यास्तचैत्रःपचति।ओदनःपच्यतेछेत्तुंसांप्रतंवृक्षइत्यादौतिङ्निपा
ताभिहितंकारकंप्रथमार्थः।तथाचचैत्रःपचतीत्यादौचैत्रभिन्नैकर्त्तरिपाककर्त्ताचैत्रीपकर्त्तृत्वेवापाककर्तृत्वंतदास्ते

प॰वा॰र॰ नान्वेति। प्रतिपाद्यतेवासुबाख्याताभ्यांकर्तृत्वेनैकैवव्यक्तिः। एकत्वत्वेनचैवैकासंख्या। अन्यथाब्राह्मणस्यपाकक
७३ र्तृत्वसंप्रदानत्वोभयविवक्षायांपचतिब्राह्मणायदेहीतिप्रयोगप्रसंगात्। सिद्धांतेतुतिङुपात्तकारकाणांप्रथमोपात्ते
कारकएवतादात्म्येनान्वयात्। चतुर्थ्याश्चसंप्रदानत्वाभिधायित्वात्तदर्थेकर्तृत्वतादात्म्यबाधादेवनतथाप्रयो
गः। पचतिचैत्रेणेत्यादौतृतीयोपात्तकारकेनतादात्म्येनान्वयः। तृतीयायास्तिङादिभिरनभिहितकारकएवसा
धुत्वात्। साक्षाद्धात्वर्थान्वयिकर्तृत्वंतृतीयार्थोनतुतिङर्थान्वयद्वारेत्यनभिहितसूत्रार्थः। अथवातिङांस्वार्थे
स्यप्रातिपदिकार्थेन्वयबुद्ध्यजननीयाभ्यांतदर्थबोधकसुपोपिसहकारित्वमतएवचैत्रःपचतीतिनप्रयोगः। आ
ख्यातोपात्तद्वित्वान्वयेसुबजनितद्वित्वोपस्थितेरपिसहकारित्वात्। उभाभ्यांप्रत्ययाभ्यामुपस्थितस्यैवद्वित्वस्यान्वय
बोधोपगमात्। तथाचकर्तृत्वमपिसुपानुपस्थितंस्याख्यातेनबोधयितुमशक्यमितितस्यप्रथमार्थतासिद्धिः। ए राम
तेनप्रथमासमानाधिकरणेलटःशत्राद्यादेशनियमात्। पचतेदेवदत्तायेतिप्रमाणं। नतुपचतिदेवदत्तायदेहीतिवा ७३

क्यमतोव्यर्थस्तदुपपादनायप्रथमायाअभिहितकारकाभिधायित्वकथनप्रयासइत्यपास्तं। संख्यांशेएवकार
कांशेपिसुपतिङोस्तुल्यार्थत्वावश्यकत्वाद्समाक्षीदेवदत्तायदेहीतिप्रयोगस्यतथाप्यप्रत्ययाख्यानाच्चनतरानु
रप्रवृत्तेः। यत्रचकृत्तद्धितसमासैःकारकाभिधानंयाचकश्चैत्रइत्यादौतत्राप्यध्याहृतास्तिक्रियाकर्तृत्वमेवप्रथमा
र्थः। अतएवास्तिर्भवंतिपरःप्रथमपुरुषेप्रयुज्यमानोप्यस्तीतिकात्यायनः। प्रथमपुरुषइत्युपलक्षणं। देवदत्तस्त्वंमहे
हंब्राह्मणइत्यादावस्यस्मीत्यादेरप्यध्याहारोध्येयः। द्वितीयादिविभक्तयस्तुतिङ्कृत्तद्धितसमासनिपातैरनभिहिते
कारकेभवंतीतिसर्वदर्शनसम्मानमितिवदंति। नान्येत्वन्यंते। उक्तार्थानामप्रयोगइतिभक्त्यंतरबाधनः। अर्थतःप्र
थमोपात्ताप्रथमैवप्रयुज्यते। पार्थएवघटोनास्तिहस्तीवाविमलंजलं। कल्कीम्लिंछानकःकालास्त्रयइत्यादिदर्शना
त्। चैत्रःपचतीत्यादावाख्यातेनकर्तृत्वेभिहितेनभिहिताधिकारीयात्तृतीयानसंभवत्येव। अनभिहिताधिकारश्च
उक्तार्थानामप्रयोगइतिन्यायस्यैवज्ञापकः। अतएववृद्धरित्यादौबडुचउक्तार्थत्वाद्यैकल्प्यवाद्यनुसत्ताबडुवडुक

प॰ बा॰ र॰ त्यइत्याद्याः प्रयोगा न भवंति। न केवला प्रकृतिः प्रयोक्तव्येति चैत्रपदानंतरं सुप्प्रयोगावश्यकत्वात्। प्रथमोपात्तस्य त्या
७४ गे बीजाभावाच्च प्रथमैव साधुः। पचति चैत्राय इति प्रयोगप्रसंगस्तु वापि दुरुद्धरः अथाख्यातार्थकर्तृत्वादेः प्रातिपदिका
र्थेन सह न कुत्राप्यन्वयो येन तथाविधप्रयोगः प्रसज्येत। अपि तु प्रथमार्थेनेति चेत्। संबुद्धिप्रथमार्थेन तथाप्यन्वयप्रसं
भवेन चैत्र पचतीति प्रयोगप्रसंगात्। संबोधनप्रथमाया अपि प्रथमात्वेन कर्तृत्वाद्येकत्वासंभवात्। अथ प्रकृत्यर्थवि
शेषितस्वार्थबोधकभिन्नया प्रथमया सहैवाख्यातस्य तादात्म्येनान्वयबोधोपयिका कांक्षाभ्युपेतव्या। अत एव ध
तिस्वाहेत्यादौ छंदसि व्यत्ययानुशासनबलेन संप्रदानार्थिकापि प्रथमा नाख्यातसव्यपेक्षेति चेत्। तर्हि प्रकृत्यर्थ
विशेषितकर्तृत्वादिबोधिका प्रथमापि कथं तथा स्यात्। चैत्रकर्तृत्वं पाककर्तृत्वाभिन्नमिति बोधे चैत्रस्य कर्तृत्ववि
शेषणत्वात्। यदि च पाककर्तृत्वाभिन्नकर्तृत्ववांश्चैत्र इति बोधोभ्युपेयते तदा शुद्धकर्तृत्वावच्छेदेन पाककर्तृत्वान्व रम
यबोधजनने कृतिः पाककृतिरिति वाक्यस्येवासामर्थ्यं दुरुद्धरं। तादात्म्यसंसर्गावच्छिन्नतद्धर्मविशिष्टप्रकारतानिरू ७४

पितविशेष्यतायां निरवच्छिन्नावच्छेदकतासंसर्गेण वाक्यार्थबुद्धिस्तद्धर्मभेदप्रयोज्यत्वात्। चैत्रकृतिः पाककृतिरित्यादौ
कृतित्वनिष्ठविशेष्यतावच्छेदकतासामानाधिकरण्येन चैत्रत्वावच्छिन्नैव तद्विशेष्यविशेषणतया भासमानस्यापि
तन्निष्ठावच्छेदकतायां सामानाधिकरण्येनावच्छेदकत्वात्। निर्वचनीयतां वा विशेष्यतायामेवावच्छेदकताद्रूपानिरूपितत्वं।
अवच्छेदकतायां वा स्वनिरूपकविशेष्यतानिरूपकत्वसंबंधेनावच्छेदकताविशिष्टभिन्नत्वं। न च स्वं स्वविशिष्टमन्यत्रा
स्वाश्रयसहनशीलविशेषणत्वादिसंबंधेन्यः। अथ प्रथमाया निरर्थकत्वे वचनादिमात्रवाचकत्वे वा आख्यातोपा
त्तं कारकं न प्रथमांतप्रातिपदिकेन्वियात्। सुबाख्यातोभयोपस्थितव्यक्तेरेव प्रातिपदिकार्थविशेषणतया भान
व्युत्पत्तेर्वचनवदिति चेत्। एवं सत्येकवचनतिङ्तं न तथाविधप्रथमांतयोराकांक्षाभ्युपगमस्यावश्यकत्वे किमत्र प्रथ
मायाः कर्तृत्वाद्यर्थत्वेनोपकर्तव्यमकारकत्वाभिधायित्वेपि प्रथमोपात्तत्यागायोगेनैव प्रथमाप्रयोगसंभवात्। अन्य
थापार्थ एव धनुर्धर इत्यत्रान्यविशेषणतापन्नेयार्थे घटो नास्तीत्यत्रात्यंताभावविशेषणतापन्नेस्तीत्वाभावविशे

ष्येवाघटे। हंसीवधवलाकीर्त्तिरित्यत्रसादृश्यविशेषणेहंस्यांचकर्तृत्वबाधेनप्रथमाप्रयोगोनुपपन्नःस्यात्। ननुपा
र्थएवेत्यादावप्यस्तिर्भवंतिपरोध्याहर्त्तव्यस्तत्कर्तृत्वंचविशेषणविशेष्ययोरव्याकृतमितिपार्थेधनुर्धरेच्चप्रथमा॥
घटोनास्तीत्यत्रकर्तृत्वाभावएवाख्यातप्रथमयोरर्थः। नञ्पदंतुव्यंजकमेवान्यथातिङ्सुबंतयोर्निरपेक्षत्वेघटोघ
टावानास्तीतिप्रयोगस्याप्रामाण्यप्रसंगात्। हंसीवधवलाकीर्त्तिरित्यत्रकीर्त्तिवस्तिनाप्रथमयाहंस्यामिवनिपातेनप्रथ
मयाचभवनकर्तृत्वमुच्यते। यादृशमुपमेयेकारकलिंगवचनादिबोध्यंतेनादृशमेवोपमानेइवनिपातेनप्रत्याय्यते।
अतएवमुक्तामालेवनक्षत्रैर्भूषिताचैत्रशर्वरीहंसीवधवलश्चंद्रः। सरांसीवामलंनभइत्यादावुपमानोपमेययोःकारक
लिंगवचनवैरूप्यमुपमादोषइतिचेन्न। एवंसतिशरैरुस्रैरिवोदीच्यानुद्धरिष्यन्रसानिवेत्यादाविवनिपातेनाभिहिते
करणत्वकर्मत्वादावुस्ररसयोःप्रथमाप्रसंगनादवस्थ्यात्। तृतीयानुपपत्तेश्च। दृश्यतेचविमलंजलंनद्याइवेतिक्रिया
निरपेक्षंवाक्यं। अस्त्यत्रास्तिर्भवंतिपरइति चेत्। कल्कीम्लेच्छांतकइत्यादौभविष्यतित्वस्ययोगासंभवात्। भवंतिपरइ

त्युपलक्षणंभविष्यतीत्यस्यापीतिचेत्। कालत्रयःअतीतंतदात्वमायतिरित्यादिविभाजकवाक्येषुआसीदस्ति
भविष्यतीत्येकतमस्यापिप्रयोगस्यासंभवादितिदिक्। इतिप्रथमाविवरणम्॥ द्वितीयामौदवास्तत्रानुबंधाव
क्षवेट्शौ। तस्मादौर्वदतिद्वित्वंबहुत्वंब्रुवतेत्वसः। अम्औट्शस्द्वितीयासंपदमुत्रानसंग्लावमित्यादौश्रूयमाणा
स्तदीयाभागाअम्औअस्इत्येववाचकःशावनुबंधौवाचिकानंतर्भूतोअतएवप्रथमाद्वितीयासाधारण्येनऽत्वे
नद्वित्ववाचकत्वमस्तेनबहुत्ववाचकत्वमित्यनुगमोऽपिसंभवति। सस्जस्ङसिङसामप्यनुगमकंलिंगाभिधानोप
पिकंमभ्युपेयं। फलव्यापारयोःसर्वधातूनांवृत्तिरिष्यते। द्वितीयार्थोधिकरणंफलगामीतिशाब्दिकाः। सर्वधातू
नांफलव्यापारेचपुष्पवंतपदवन्नानार्थवत्वाशक्तिःएकपदोपात्तयोरपिपरस्परमन्वयोर्नविरुद्धः परेषामाख्याता
र्थेकृतोवर्त्तमानत्वस्यवैय्याकरणानांकर्त्तरिसंख्ययाश्चान्वयबोधदर्शनात्फलंतुसंयोगविक्लित्यादितादृश्येणैव
गम्यपच्यादिवाच्यं। व्यापारास्तु। रथोगच्छतीत्यत्रस्पंदविशेषत्वेनतुरगोगच्छतीत्यत्रप्रयत्नत्वेन। वह्निःपचतीत्य

प॰वा॰र॰ ७६ त्रोज्वालत्वेनशरीरंपचतीत्यत्राधिश्रयणावतारणफूत्कारत्वादिना। पुरुषःपचतीत्यत्रप्रयत्नत्वेनानुगम्यमानाः
सकलव्यापारानुगम्यमानाः सकलव्यापारानुगतधर्मविरहादननुगतानांप्रवृत्तिनिमित्तानांस्वरूपसत्तामनुगमके
नबुद्धिविशेषविषयत्वेनसर्वनाम्नामिवधातूनांशक्याः। भवतुफलजनकतावच्छेदकत्वमेवप्रयत्नत्वादीनांस्वरूप
सदनुगमकं। अतएवयत्नधर्मावच्छिन्नमेवादिनविक्लित्त्यादिफलजनकताग्रहस्तद्धर्मावच्छिन्नमेवपच्यादिनोपस्थाप्य
ते। धात्वर्थव्यापारएवभावनासाधनाक्रियेतिव्यपदिश्यतेतत्रैवप्रधानतयाभासमानेनुकूलत्वसंसर्गेणफलस्या
श्रयत्वेनवर्त्तमानत्वादेराधेयत्वेनविभक्त्युपस्थाप्यस्यकर्त्तुरन्वयः। कर्त्तरिचाख्यातोपस्थिततदर्थसंख्याया आधा
रत्वेनप्रथमान्तार्थस्यतादात्म्येनप्रथमान्तार्थेप्रथमोपात्तसंख्यादेरपिसंबंधः। फलेन्वकर्मविभक्त्युपस्थाप्यस्याधेय
त्वेनाधिकरणेचद्वितीयान्तार्थादेरभेदेनद्वितीयान्तार्थेषुद्वितीयोपात्तसंख्यायाविशेषणत्वं। तेनचैत्रओदनंपचती राम ७६
त्यत्रएकचैत्राभिन्नकर्तृवृत्तिरेकौदनाधिकरणवृत्तिविक्लित्तिजनिकावर्त्तमानक्रियेत्यन्वयबोधः। युज्यतेचक्रिया

याःप्राधान्यं। तत्रगुणीभावःकारकाणांमतएवभावप्रधानमाख्यातमितिनिरुक्तस्मृतिः। आख्यातान्तपदानामर्थे
षुभावस्यक्रियायाएवप्राधान्यमभिधत्ते। धात्वर्थःकेवलःशुद्धोभावइत्यभिधीयतइतिपरिभाषणात्। अतएवप
चतिकल्पंचैत्रदेवदत्ताद्यत्यादौसाधुत्वार्थेनियतंक्लीबैकवचनंक्रियायालिंगसंख्यान्वयायोग्यत्वेनपुंबहुवचनादेर
संसमवेतार्थत्वात्। कर्त्तुःप्राधान्येतुतत्रलिंगसंख्यान्वययोग्येतिङ्नेवसुबुपात्तासंख्यान्वयादितिबहुवचनप्रसंगः
आचार्यकल्पाद्यतिवत्। किंचपश्यधावतिमृगइत्यादावेकवाक्यत्वेतिङ् तिङः इतिसूत्रस्वरससिद्धं। तत्रयदिधाव
नकर्त्तामृगोदर्शनक्रियायांकर्मतत्तयान्वेतितदामृगात्कर्मणिद्वितीयाप्रसंगः। अथप्रथमासमानाधिकरणस्यलटः
स्थानेशतृशानचौनित्यत्वननादृत्याप्रयोगएववानसाधुःस्यात्। सिद्धान्तेतुमृगकर्त्तृकधावनक्रियायाःकर्मतयादर्शिक्रियाया
मन्वयइतिधातोःप्रातिपदिकसंज्ञाविरहान्नद्वितीयाप्रसंगइति। सर्वथाभावस्याभ्युपेतंक्रियाप्राधान्यमेवश्रेयः।
तथाचौदनंपचतिचैत्रइत्यत्रचएकौदनाधिकरणकविक्लित्त्यनुकूलेव्यापारएकचैत्राभिन्नकर्तृकेप्रतीयमानेओद

प॰ व्या॰ र॰ नादेरन्यलभ्यत्वादधिकरणमात्रं द्वितीयार्थः। अधिकरणत्वं चाखंडोपाधिर्गगनभावादिस्वरूपातिरिक्तो वा स्वरूपेण
७७ वजातिवद्द्वितीयायाः प्रवृत्तिनिमित्तं। अत एवाधिकरणत्वमाधेयत्वं वा द्वितीयार्थो न त्वधिकरणमिति दार्शनिकमतं
मयास्तं। अधिकरणतात्वस्य शक्यतावच्छेदकत्वे गौरवात्। कालं पचतीति प्रयोगप्रसंगात्। विक्लित्तौ कालवृत्त्यधि
करणतानिरूपकत्वस्याबाधात्। तत्तत्संसर्गावच्छिन्नाधिकरणतानां तत्तद्धातुसव्यपेक्ष्य द्वितीयाशक्यत्वेनानाच्छा
क्तिकल्पनप्रसंगः। अधिकरणस्य द्वितीयार्थता च देतुनतद्धा। स्वर्थफलसंसर्गविशेषेण द्वितीयार्थाधिकरणान्वय इति
व्युत्पत्तिरेव विचित्रा। नतु शक्तिः। अत एव कर्मलकारपर्यायत्वमपि द्वितीयाया उपपद्यते। चैत्रेणौदनः। पच्यत इ
त्यादौ हि एकौदनाभिन्नैकाधिकरणकविक्लित्तिजनिका एका चैत्राभिन्नकर्तृका पचिक्रिया प्रतीयते। तत्रौदना
देरन्यलभ्यत्वादाश्रयमात्रं वकारार्थः न त्वाश्रयत्वं। प्रातिपदिकसामानाधिकरण्यानुपपत्तेः। ननु तथापि। यत्तु क
र्तृकर्मोभयगामिसंयोगादिफलं तत्र चैत्रश्चैत्रं गच्छतीति प्रयोगप्रसंगः। चैत्राधिकरणसंयोगजनकस्य गमनस्य। राम॰
७७

बाधितत्वाबाधितत्वादिति चेन्न। परस्याकर्तृसंज्ञया बाधितत्वेन द्वितीयायाः प्रवृत्तेरभावात्। कर्मसंज्ञैव हि द्वितीया
निमित्तं। अत एवापादानसंप्रदानकरणाधारकर्मणां कर्तुश्चोभयसंप्राप्तौ परमेव प्रवर्त्तत इति पठंति। तच्च द्वितीयो
पात्तमधिकरणं फलगामि धात्वर्थफलेन्वेति। तथा हि। पच्यर्थो विक्लित्त्यावघटितपरंपरया गर्म्यसंयोगे सज्यर्थविभा
गे न्वसमवेतत्वेन द्वितीयार्थाधिकरणस्यान्वयः। जानातेरेव यथाभंगः शाकधंवा फलभाव यत्वविद्याज्ञानमिति न्यपदि
श्यमानोभावविशेष औपनिषदानां प्रसिद्धः। अतीतानामपि सूक्ष्मरूपेणावस्थितानामदानींतने नज्ञाने न फलं ज
न्यते। तेनातीतमनागतं वा जानातीतीति नानुपपन्नं। यदाह हरिः। तिरोभावाभ्युपगमे भावानां सर्वनास्तिता। लब्ध
क्रमे तिरोभावे नश्यतीति प्रतीयत इति। जानातीच्छति द्वेष्टि करोति पश्यतीत्यादौ ज्ञानेच्छाद्वेषप्रयत्नदर्शनादीनि फ
लानि। तदनुकूलामनोयोगादयो व्यापाराएव क्रिया। अत एव चक्षुः पश्यतीति कार्विकः प्रयोगः। तत्र विषयित्वाद्वेस्पि
स्वद्विष्टित्वसाधिलसाक्षात्कारित्वैः संबंधैर्द्वितीयार्थाधिकरणस्य ज्ञानादौ फलेन्वय इति केचित् वस्तुतस्तु धातुन्य

प॰वा॰र॰ ७८ प्राधान्येनबोध्यमानोधात्वर्थः। क्रियात्वविशेषणतयाभासमानोधात्वर्थः फलमितिपरिभाष्यते। क्रियायाः साक्षा
दधिकरणंकर्त्ता। फलस्याधिकरणंकर्म। अतएवफलस्यैवप्राधान्यविवक्षायांतंडुलः पच्यतेस्वयमेवेत्यादौविक्लित्ति
वत्तिमातदधिकरणेकर्त्तरिलकारः। तथाचजानातेर्विषयताज्ञप्तिश्च इच्छतेरुद्देश्यताकामश्च। करोतेः साध्यतायत्नश्च। द्वि
षेर्द्वेष्यताद्वेषश्च। दृशेर्लौकिकीविषयतासाक्षात्कारश्च। अनुमिनोतेर्विधेयतानुमितिश्चेत्येवंफलव्यापारौक्रमात्त्वतिपा
द्यौ। तत्रफलेविषयताबोधाराधाराधेयभावेनद्वितीयार्थाधिकरणान्वयइति। वैयाकरणाः। ननुतन्मतेकरणाधिक
रणादिनिष्ठव्यापाराणामपिधातुनाप्राधान्येनाभिधानसंभवाद्धात्रूपात्तव्यापाराश्रयत्वेनस्वतंत्रतेतिकर्तृत्वंस्यादि
तिचेत्। सत्यमेव। असिः छिनत्तिपचतिस्थाल्यपैतिधाराधरः। ददातिद्विजइत्यादौकर्तृताकारकांतरे। साध्वसिः छिनत्तीत्य
त्रावयवद्वयारंभकसंयोगप्रतिद्वंद्विविभागः छिनत्तेरर्थः फलं। यदवयवविनाद्वितीयार्थाधिकरणेनसमानाधिकरणतया
व्यपेक्षतेनत्वाधाराधेयभावेन। तत्रैवतत्रछिनत्तीतिप्रयोगोनतुदलद्वयेसिति। पचतिस्थालीत्यत्रपचतिफलानुकूल राम ७८

व्यापारः संतापनादिः। गिरिरपसरतीत्यत्रापादानस्यापसरतिफलविभागानुकूलः कर्माभिमुख्यादिः। द्विजोददातीत्य
त्रफलस्यस्वत्वध्वंसस्यस्वत्वांतरस्यवानुकूलोनुमत्यादेः संभवतीतिविवक्षावशात्सर्वस्यकारकांतरस्यकर्तृत्वमवसे
यं। ननुतथापिकर्मवृत्तिव्यापारप्रतिपाद्यकर्मणामपिकर्तृत्वंस्यादितिचेत्। अधिगच्छतिशास्त्रार्थः स्मरतिश्रद्दधातिच।
इत्यादिदर्शनात्कर्मण्यपिकर्तृत्वमिष्यते। अधिगमविषयत्वंस्मरणविषयत्वंश्रद्धाविषयत्वंधातुनाव्यापारफलयोः विशे
षणविशेष्यव्यत्यासेनप्रत्याय्यतेप्राधान्यवशात्क्रियाभावंप्राप्तस्यफलस्याधिकरणंशास्त्रार्थोभवत्यधिगम्यादिकर्ता।
यत्तुएकदेशेसमूहेवाव्यापाराणांपचादयः। स्वभावतः प्रवर्त्तंतेतुल्यरूपंसमाश्रिताइतिवाक्यपदीयवाक्यस्यएक
देशेफलमात्रेवाधातवः प्रवर्त्तंते। तेनव्यापाराविवक्षायांफलमात्रे। फलाविवक्षायांव्यापारमात्रेचधातुप्रयोगः। यथा
पच्यतेओदनः स्वयमेव। पचतिचैत्रइत्यादावित्यर्थव्याकुर्वाणा अधिगच्छतिशास्त्रार्थइत्यादौविषयतास्वरूपंफलमात्र
माधिगमिर्वदत्यतएवाप्यकर्मकोधातुरितिवदंति। तथासतिअधिगच्छतिस्मरतिश्रद्दधातिधातूनांपर्यायताप्रसंगात्॥

प.वा.र. तस्मादधिगमव्यापारे विशेषितावि षयिताधात्वर्थ इति सारं। नन्वेवमधिगमादेः फलत्वप्रसक्त्यात्तदधिगम्यत्वात्कर्मत्वं स्यादि
७९ ति शिष्यमधिगच्छति शास्त्रार्थ इति प्रयोगप्रसंगः। नच बुभुक्षितं न प्रतिभाति किंचिदिति दर्शनादिष्टापत्तिः। तत्र कर्मप्रवचनीयत्वेन
प्रतिनाद्वितीया अकर्मण्येव साधुत्वादिति चेदुच्यते। विशिष्टवृत्तिस्वीकारादेकदेशान्वयन चमात्। कर्मस्थभावको धातुर्नेद्वितीयां
व्यपेक्षते। स्मरति शास्त्रार्थ इत्यत्र स्मृतिधातोः स्मरणविषयतायां विशिष्टायां लक्षणा स्वरूपा वृत्तिर्न तु विशेषणविशेष्यभाव
व्यत्यासमात्रेण कृप्ताभ्यां खंडशक्तिभ्यां निर्वाहः। खंडशक्तिजनितपदार्थोपस्थितेः फलव्यापार विशेष्यकशाब्दबुद्धिप्रयो
जिकाभ्यां स्मृधातुत्वावच्छेदेन तादृशशाब्दबुध्यभावप्रयोजिकीभूताभावप्रतियोगित्वबुद्धावेव सहकारित्वाभ्युपगमात्। व्या
पारप्रकारकफलविशेष्यकबुध्यप्रयोगित्वमुत्पत्स्यतेतरां। तत्र खंडशक्तिग्रहजनितखंडोपस्थितेः सहकारित्वकल्पनं चापेक्ष्य विशि
ष्टोपस्थितिजनिका विशिष्टवृत्तिरेव कल्पयितुमुचिता। तथा च विशिष्टपदार्थैकदेशेन द्वितीयार्थान्वयो युज्यत इति कर्मस्थभा राम.
वकानां प्रायेण अकर्मत्वमन्यत्र भाव देशकालाध्वभ्यः स्मरति शास्त्रार्थ इत्यादौ विषयताफलमुद्बोधकादिः। स्मरणीयमात्मवृत्ति ७९

व्यापार इति फलव्यापारयोर्वैयधिकरण्याभावादकर्मकः। कर्मस्थभावको धातुरित्यपि वदंति। नन्वेवं पचत्योदन इत्यपि स्यात्।
कर्मव्यापारविवक्षायां कर्मणओदनादेः कर्तृत्वसंभवादिति चेदुच्यते। निवर्त्ये च विकार्ये च कर्मवद्भाव इष्यते। तस्मात्कर्तृत्व
कारोपि भातोः स्युर्यक्चिणादयः। यत्नानिर्वर्त्ये विकार्ये च कर्मत्वाभिष्ठभावविवक्षायामकर्मकाद्धातोः कर्तृलकारेपि कर्मवद्भा
वोनुशासनसिद्धः। तथा च सूत्रं कर्मवत्कर्मणातुल्यक्रियइति। कर्मवृत्तिक्रियाश्रयः कर्ता। कर्मवद्भवतीति तदर्थः। तदप्यनुशास
नं कर्मातिदेशात्साद्यक्चिणात्मनेपदादीनि कर्माणि विधत्ते। तेन पच्यते पाचि वा ओदन इत्येव प्रमाणं न तु पचत्यपाक्षीदिति नन्वे
वं यत्र भावेलकारस्तत्र कर्मकार्ये द्वितीया स्यादिति तंडुलं पच्यत इति प्रयोगप्रसंग इति चेदुच्यते। कर्मवत्कर्मणातुल्यक्रियइत्य
नुशासने। द्विलकारकनिर्देशात्सूत्रादिस्यनुवर्त्तते लिङः इति सूत्रद्वौ लकारौ संयुक्तौ निर्दिष्टौ तयोराद्यं लकारमनुवृत्तलकाराभि
हितः कर्ता कर्मवत्साद्यदि कर्मवृत्तिक्रियो भवतीति कर्मवत्सूत्रशरीरं पर्यवस्यति। अतो लकारेण कर्तुरनभिधाने कर्मकार्यं न प्रस
ज्यते अत एव कृत्यक्तखलर्थप्रत्यया अपि कर्मकर्तरि न भवंति कर्तुर्लकारेणानभिधानात् कर्मत्वातिदेशाप्रवृत्तेः। अत एव स्व

यमेवभेत्तव्यंभित्त्वंसुभिदंवाकुशूलेनेत्यादौभावार्थानांतव्यक्तकरत्वलानांयागेकर्जरिन्तीयेवमभमाणं। ननुकोऽयंनिवर्त्त्यंवि
कार्यःप्राप्याणांकर्मणांविशेषइतिप्राभेकथ्यते। यदुत्पत्तिस्वरूपेणफलेनव्यतिषज्यते। तन्निर्वर्त्यंविकार्यंविकारैः प्राप्यम
तोऽन्यथा। यत्कर्मोत्पत्तिस्वरूपेणक्रियाजन्यफलेनसंसर्ज्यतेतन्निर्वर्त्यंनाम। यथाकटंकरोतीत्यत्रउत्पादनार्थककरोत्यर्थफली
भूतोत्पत्तिसंसृष्टःकटः। यत्तुविकारैर्धात्वर्थफलैःसंसृज्यतेतद्विकार्यं विकारस्तुकश्चिन्नाशस्वरूपः। यथाशंभुंहिनस्तीत्य
शंभुः। कश्चिन्नाशानुकूलोऽवयवविघटनादिः। यथातृणंछिनत्तिकुशूलंभिनत्तीत्यादौतृणकुशूलादिःउत्पत्तिविकारभिन्ने
नसंसृष्टंकर्मप्राप्यं। यथाग्रामंगच्छति। रूपंपश्यतीत्यादौसंयोगविषयत्वाधिकरणग्रामरूपादि। हरिस्तुसतीवाविद्यमाना
प्रकृतिःपरिणामिनी। यस्यनाश्रीयतेतस्यनिर्वर्त्यत्वंप्रचक्षते। प्रकृतेस्तुविवक्षायांविकार्यंमितिकथ्यतेपक्षमुदाजहार। यस्यक
र्मणःप्रकृतिःसमवायिकारणपरिणामितयाउपादानतयानोपादीयतेतत्क्रियाफलोत्पत्तिमन्निर्वर्त्यंकर्म। यथाकटंकरोती
त्यत्रकटः। नह्यत्रसदपिकटोपादानंविवरणंतद्धात्वेनविवक्ष्यते। यत्रचप्रकृतिसत्त्यादीयतेतद्विकार्यं। यथाकनकंकुंडलंकरो

तीत्यत्रकुंडलस्यान्वयस्तथाचकनकोपादानकुंडलसाध्यकःप्रयत्नोवाक्यार्थः। विकार्येकर्मणिप्रकृतिर्द्वेधाकाचित्सती।
उपादेयतुल्यकालिकीयथाविवरणंकरोति। कनकंकुंडलंकरोति। वेणुदलंकटकंकरोतीत्यादौ। क्वचिदविद्यमानाकार्यासहवृ
त्तिः। यथाकाष्ठंभस्मकरोतितंडुलानोदनंपचतीत्यादौ। अत्रध्वंसउत्पत्तिश्चफलद्वयाकर्त्रोर्थः। काष्ठध्वंसस्यभस्मोत्पत्ते
श्चानुकूलोव्यापारोवाक्यार्थः। पचेरपिविक्लित्तिरुत्पत्तिश्चपदार्थः। तंडुलविक्लित्तिकाओदनोत्पादिकाक्रियावाक्यार्थः। प्रकृति
त्वंतुकाष्ठस्यपरंपरसाध्यव्यावहारिकमितितदर्थः। पक्षांतरमप्याहहरिरेव। कैश्चिदन्यथानिर्वर्त्यंचविकार्यंकर्मत्रगस्त्रैप्रदर्शि
तः। यदसज्जायतेयद्वायंजन्मनायप्रकाशयतो तन्निर्वर्त्यंविकार्यंतुद्वेधाकर्मव्यवस्थितं। प्रकृत्युच्छेदसंभूतंकिंचित्काष्ठादिभस्म
वत्। किंचिद्गुणांतरोत्पत्त्यासुवर्णादिविकारवदितिपूर्वमसतएवसत्त्वमध्वस्तसमयसंबंधस्यसमयसंबंधउत्पत्तिरितिवि
शेषिकादयः। कालिकविशेषणतासामान्येनकापिकुत्रापिसमयेसंसृष्टः। दैशिकसंसर्गभेदेनकालिकविशेषणतानांभे
दावश्यकत्वादतएवगावावयवावच्छेदेनसंयोगसंसर्गावच्छिन्नकालिकसंसर्गेणावच्छिन्नप्रतियोगिताकोगवाभावोगोमत्स्यपिका

प॰चा॰ लेविद्यते। ननुसमवायसंसर्गावच्छिन्नकालिकविशेषणासंसर्गेण। इदानीमवयवेषुसमवायेनगोर्वतुसंयोगेनेतिप्रती
८९ त्याकालिकयवावच्छेदेनगवाभावस्यविषयीकरणात्। अवयवेसंयोगेनगवाभावस्यव्याप्यवृत्तितयाकालावच्छिन्नता
संभवात्। अतएवचिरांतरितस्याप्यनुभवयागादेर्भावनासुकृतादिसंसर्गावच्छिन्नकालिकविशेषणतयास्वर्गस्मरणा
द्यव्यवहितपूर्वक्षणवृत्तित्वेनतत्कारणत्वंसूपपदं। तथाचध्वंसप्रागभावादिस्वरूपदैशिकसंसर्गावच्छिन्नकालिके
नसर्वस्मिन्नपिकालेप्रत्यासीदत्येवसर्वोभावइतिनाभावोविद्यतेसतुजन्मतुप्रकारद्वाएवप्रकाराद्वासुसमवायतादा
त्म्यावच्छिन्नकालिकविशेषणतयाप्रथमःसंबंधइतिकापिलाः। तदाहहरिरेवाउत्पत्तेःप्रागसद्भावोबुध्यवस्थानिबंध
नः। अविशिष्टःसत्तान्येनकर्ताभवतिजन्मनः। कारणंकार्यभावेनयदवाप्यवतिष्ठते। कार्यशब्दंतदालब्ध्वाकार्यत्वेनो
पजायते। यदाहभाष्ये: कुटलीभावोव्ययाणांवासमयता। तथैवजन्मरूपत्वंसत्तामेकेप्रचक्षतइति। एवंचासतःसत्त्वंस राम
तःप्रकाशोवाभवत्युत्पत्तिधात्वर्थफलीभूतोत्पत्तिमन्निवर्त्यंकर्म यथाकटंकरोत्योदनंपचत्यादौघटोदनादिः। यथा ८९

वाकनकंकुंडलंकरोतीत्यत्रकुंडलादिधात्वर्थफलीभूतविकारसंस्पृष्टंकर्मविकार्यं। यथाशत्रुंहिनस्तिकाष्ठंछिनत्तीत्या
दौशत्रुकाष्ठादिः। यथावाकनकंकुंडलंकरोतितंडुलानोदनंपचतीत्यादौकनकतंडुलादिः। प्रकृत्युच्छेदेत्यादिकारिका
तुयदुच्छेदेनसंभूतंनिवर्त्यंकर्मसाप्रकृतिर्विकार्यंकर्म। यथाकाष्ठोच्छेदसंभूतंभस्मनिवर्त्यमित्यत्रकाष्ठंविकार्यं। सत्यामे
वयस्यांप्रकृतौगुणोत्पत्तिर्धातुनाप्रत्याय्यते। सापिद्वितीयंविकार्यंकर्म। यथासदेवशलाकास्वरूपंकनकं। अवयवाना
रंभकसंयोगमात्रविरोधिनाकर्मणाभुग्नत्वगुणोत्पत्तौ। विकार्यं। कुंडलपदस्यहिभुग्नंद्रव्यमर्थः। धात्वर्थोपपत्तिस्तु
भुग्नत्वएवार्थतोन्वेतीत्यर्थिका। प्राप्यलक्षणमप्याह। हरिरेव। क्रियाकृतविशेषाणांसिद्धिर्यत्रनगम्यते। दर्शनादनु
मानाद्वातत्प्राप्यमितिकथ्यते। तत्रक्रियाकृताविशेषाउत्पत्तिसंयोगपचयादयोभावविकाराएवगणनीयाः। तदेवंवैयाकर
णस्यमतंपरिष्कृत्यनैयायिकानांमतमुत्थाप्यते। कर्मत्वंपरकाभिमर्शालभ्यतेपरतोमतः। द्वितीयार्थोन्वतोभेदसंबंधावि
तितार्किकाः। परसमवेतक्रियाविशेषणधात्वर्थफलसमवायित्वंकर्मत्वं। भवतिचग्रामंगच्छतीत्यत्रग्रामभिन्नसमवे

प्र॰वा॰र॰ ८२ तायांक्रियायांविशेषणीभूतेनसंयोगावच्छिन्नस्पंदवाचकस्यगमेरर्थेनसंयोगेनसंसृष्टोग्रामः।कर्मत्वघटकपदार्थो
स्तुयाम्क्रियाफलानि।नामधातुभ्यामेवलभ्यंते।प्रतियोग्यनुयोगिभावादयस्तुसंसर्गतयाभासंतइतिनवाचकंपदम
पेक्षंते।कर्मफलयोःसंबंधः।परत्वस्वरूपोभेदश्चनान्यलभ्यत्वाद्द्वितीयार्थः।प्रातिपदिकार्थविशेषितःसंबंधःफलेभेदश्च
सामानाधिकरण्येनक्रियायामन्वेति।प्रातिपदिकार्थस्तुभेदे।तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगितयान्वेति।नञ्पदान्यप
दप्रतिपाद्यभेदप्रतियोग्यविशेषणधर्मावच्छिन्नस्यापिप्रतियोगित्वस्यसंसर्गत्वेविरोधाभावात्।भवतुवाप्रातिपदि
कार्थआधाराधेयभावेनभेदे।भेदस्तुप्रतियोगितावच्छेदकतासंसर्गेणक्रियायांविशेषणं।विद्यतेचगमनवद्भेदोग्रा
मे।नन्वेवंभेदांशेशक्तिर्निरर्थिका।तदनुभवस्यविवादग्रस्तत्वात्।चैत्रश्चैत्रंगच्छतीतिप्रयोगप्रसंगस्तुपरत्वात्कर्तृसंज्ञ
याकर्मसंज्ञायाबाधादेवप्रतिहतः।संज्ञैवहिद्वितीयायाःप्रयोजिका।ननुवस्तु।अधिशीङोऽधिकरणादपिद्वितीयादर्श राम ८२
नादितिचेत्।उच्यते।भूमिंप्रयातिविहगोविजहातिमहीरुहंनतुस्वमितिनिर्देशाद्भेदएवनिषिध्यते।भवतितावत्सर्वजानी

नःखगोभुवंगच्छतिनतुस्वमितिप्रयोगः।तत्रखगेऽकर्मकगमनकर्तृत्वंस्वकर्मकगमनकर्तृत्वाभावश्चेत्युभयमप्यवा
खगकर्मककर्तृकेगमनेऽकर्मकत्वंसकर्मत्वाभावश्चनिह्नुयं।तुकारेणतुनञर्थएवानूद्यते।ननुमैत्रोभुंक्ते चैत्रस्तुपच
तीत्यत्रैवपूर्ववाक्यविधेयव्यवच्छेदार्थकस्तुकारः।पौनरुक्त्यप्रसंगात्।स्वपदसमभिव्याहृताद्वितीयानुपदवृत्तित्वमा
त्रमभिधत्तेतदागम्यर्थेफलेद्वितीयांतार्थस्यस्ववृत्तित्वस्यगमनेवास्वसमवेतसंयोगजनकत्वस्यकथंनञानिषेधौयुज्य
ते।भेदस्यद्वितीयार्थतावादेतुविहगवृत्तिभेदप्रतियोगितावच्छेदकत्वमेवगमनेनिषिध्यते।एवंरूपंनगच्छतीत्यत्रगम्य
र्थसंयोगेरूपवृत्तित्वाभावएवनञाप्रतिपाद्यते।ननुतथापिचैत्रोग्रामंगच्छतिनमनुष्यमित्यादिप्रयोगोनुपपन्नः।गमिफ
लेमनुष्यसमवेतत्वस्यगमनेमनुष्यांतर्निष्ठान्योन्याभावप्रतियोगितावच्छेदकत्वस्यचनिषेधायोगात्।कथंवाचैत्रोमनुष्यं
गच्छतीत्यादिकोनप्रयोगइतिचेत्।उच्यते।फलान्वयिनिवृत्तित्वेभेदेव्यापारगामिनि।अन्वेतिव्यतिरेकैवतत्सामान्यंनिषि
ध्यते।याप्रातिपदिकार्थव्यक्तिर्द्वितीयार्थवृत्तित्वेऽन्वेतिसैवभेदेपिवृत्तित्वंफलान्वयिभेदप्रतियोगितावच्छेदकतयाव्यापा

प॰व्यु॰र॰ रान्वयीति चैत्रो मनुष्यं गच्छतीति न प्रयोगः। वृत्तित्वान्वितमनुष्यत्वव्यक्तिभेदान्वयायोग्यत्वात्। चैत्रो न मनुष्यं गच्छतीत्यत्र तु त
८३ न्मनुष्यवृत्तिसंयोगजनकत्वविशिष्टं यावत्तन्मनुष्यनिष्ठान्योन्याभावप्रतियोगितावच्छेदकं तावदभावकूट एव नञा प्र
तिपाद्यते। भवतु वा स्वसमवेतसंयोगजनकत्वस्वत्वस्वान्योन्याभावप्रतियोगितावच्छेदकत्वोभयसंसर्गावच्छिन्नप्रतियो
गिताको मनुष्यसामान्याभाव एव गमनेन आवो द्वितीयानुसंयोगेन घटो नास्तीत्यत्र संयोगादिपदमिव प्रतियोगितावच्छेद
कसंसर्गानुवादकत्वमात्रा साधुः। एवमेव चैत्रस्यैवायं भ्रातेत्यादौ चैत्रान्यनिरूपितावृत्तिभ्रातृत्वात् तत्वानिरूपितत्वसंसर्गेण चै
त्रान्यसामान्यस्य वा व्यवच्छेद एवकारप्रतिपाद्यः। भ्रातृत्वं तु स्वत्वस्वान्योन्याभावप्रतियोगितावच्छेदिका स्वजनकप्रयोज्य
तावच्छेदिका च या शरीरत्वावांतरजातिस्तद्रूपमिति बोद्धाधिकारविवरणे प्रपंचितमस्माभिः। स्यादेतत्। अधिकरणत्वं नि
रूपकतयाधेयत्वं वा स्वरूपेण फलान्वयिनी द्वितीयार्थः। कालं पचतीति प्रयोगप्रसंगात्। पचिफलस्य कालनिष्ठाधिकरण राम
तानिरूपकत्वात्। न च द्वातुसमभिव्याहृतद्वितीयायास्तत्तत्संसर्गावच्छिन्नाधिकरणत्ववाचकत्वे शक्त्यानंत्यप्रसंगात्। तद्ध ८३

रमधिकरणं द्वितीयार्थः। तस्य तत्तद्धातूपात्तफलेन तेन तेन संसर्गेणान्वय इति व्युत्पत्तिवैचित्र्यमिति चेत्। निमित्तमंतरा
शब्दाः प्रवृत्तौ सर्वकर्मसु। निमित्तैक्यासंभवाच्च न द्वितीयाश्रयार्थिका।। द्वितीयादिप्रत्ययानां विश्वस्मिन्नेवानवच्छिन्ना श
क्तिस्तथा रूपेण स्मारितवस्तुनि तादात्म्येन प्रातिपदिकार्थान्वय इति कल्पो न संभवति स्वरूपतस्तत्पदार्थविषयबुद्धित्वावच्छे
देन द्वितीयापदजन्यत्वावगाहिनो नित्यसंकेतस्य संभवेपि लोके तद्ग्रहणासंभवात्। स्वरूपेण विश्वस्यानुपस्थितेः। नापि वि
श्वत्वमुपलक्षणीकृत्य संकेतग्रहः तादृशोपग्रहणास्वरूपेण विश्वस्य स्मरणासंभवादेव न कोपि शब्दप्रवृत्तिनिमित्तविर
हितशक्तिमान्। अथ सर्वकर्मसाधारणं किमप्येकं निमित्तमाश्रयणीयं तत्राधिकरणत्वं नाम तत्तत्संसर्गानुयोगित्वस्व
रूपं संसर्गभेदाद्भिद्यत एव न तु सकलसंसर्गानुगतं संभवदपि गगनाभावादिभिरविनिगम्यत्वात् शक्त्यानंत्यादवरुद्ध्या
पादकं न च तत्स्वरूपेण भासितुमर्हति अजातित्वात्। तस्मात्कालत्वजातिरिवाखंडमाश्रयत्वनामकं स्याद्वाभावादिकं तत्स्व
रूपेणाभासने तस्मात्संसर्गभेदभिन्नमधिकरणत्वमाधेयत्वं वा द्वितीयार्थः। यत्तु अधिकरणत्वादेः शक्यत्वे तद्वृत्तिधर्मांत

प॰ षा॰ ९ ंशाक्यतावच्छेदकमावश्यकमित्यनुशासनगृहीतामधिकरणत्वस्वरूपविशिष्टवृत्तिमेवकिमितिनरोचयेद्इतितद्दर्शनसि
८४ द्धांतानभिज्ञत्वद्योतनमात्रं।ननुतथापिभावप्रधानमाख्यातमितिनिरुक्तस्मृत्याक्रियायाःप्राधान्यमवगम्यतेतत्कथंनैय्यायिका
भिमतःप्रथमांतार्थविशेष्यकोवाक्यार्थबोधोनविरुध्यतइतिचेत्।भावप्रधानमाख्यातमितिनिरुक्तस्मृतेः।आख्यातार्थेषु
भावस्यप्रधानप्रमनुशिष्यते।भावप्रधानमाख्यातमितिनिरुक्तस्मृतिराख्यातार्थेषुसंख्यावर्त्तमानत्वादिकेषुभावना
याएवधात्वर्थंप्रतिप्राधान्यमर्थः।भावपदेनभावनायाअभिधानात्।अथाचार्यकल्पाइतिवत्पचतिकल्पाःपुरुषा
इतिप्रयोगप्रसंगःप्रधानप्रकृत्यर्थस्येषदपरिसमाप्तपाककर्तुःसंख्यान्वययोग्यतयातिङुपात्तायाइवसुबुपात्ता
याअपिबहुत्वसंख्यायाअन्वयसंभवादितिचेत्।स्यादेवंकर्त्तुराख्यानवादिनांदोषःभावनानुधातूपात्तेतिङुपात्तापि
नसंख्यान्वयमर्हतीतिसाधुत्वार्थकमेकवचनं।पचतिकल्पंपुरुषायांतिरूपंजनाइतिशाब्दिकानामिवास्माकमप्य राम ८४
कवचनंध्रुवं।ननुपश्यमृगोधावतीत्यत्रमृगस्यधावनक्रियांप्रतिप्राधान्येनस्यैवकर्मतमादर्शनेऽन्वयःस्वीकर्त्तव्यः

धातुरन्वयवैधुर्यादाख्यातंनव्यपेक्षते।यत्रप्रकरणवशादुपस्थितोधात्वर्थःशाब्दोयाभावनाकरणकर्माणि।नचकेव
लस्यप्रत्ययस्यासाधुत्वादाख्यातप्रयोगमात्रप्रयोजनकोधातुरनुवादकः।ननुतर्ह्यर्थोवाक्यार्थेनिविशते।भावनायां
कर्मत्वकरणत्वान्यसंसर्गेणक्रियायाअन्वयेआकांक्षाविरहात्।इत्थंएवमप्राप्तधात्वर्थकेपदोपात्तकरणकर्मकेसो
मेनयजेतेत्यादौक्रियायाभावनान्वयोदुर्घटइतिचेन्न।सोमादिशब्देमत्वर्थलक्षणामवलंब्ययः।विशिष्टविधिस्तत्रापि
भावनाकरणंक्रिया।सोमेनयजेतेतिवाक्यंसोमगुणविशिष्टंयागमेवभावनाकरणतयाविधत्तेतदुपपादनायसोम
पदस्यसोमवतिलक्षणास्वीकार्या।तेनसोमवतायागेनस्वर्गंभावयेदितिवाक्यार्थः।नन्वेवमनुत्पत्स्यवच्छिन्नेव्यापारेभाव
नायामुत्पत्त्यंशोधिकरणतयान्वितंकरणंव्यापारांशोधिकरणत्वेनान्वितःकर्त्रेतिअधिकरणत्वमाधेयत्वंवा।करणत्वंका
र्यत्वंवात्वतीयादीनामर्थोस्तुकृतमखंडककर्तृत्वकर्मत्वादिस्वीकारेणेतिचेत्।उच्यते।भावनाकर्मणिस्वर्गेव्रीहौधात्वर्थ
कर्मणि।कर्मानुगतबुद्धेर्वाऽखंडंकर्मत्वमिष्यते।स्वर्गकामोयजेतेत्यत्रस्वर्गोभावनांशःव्रीहीनवहंतीत्यत्रव्रीहिर्धात्व
र्थावहननस्यकर्मत्वमनुगत्यप्रतीयतेव्यवह्रियतेच।तत्रधात्वर्थतावच्छेदकंकर्मत्वंतिङर्थतावच्छेदकंत्वकर्तृत्वंव्यासज्य

प॰वा॰र॰ मितियुच्यते॥ अध्वर्युयजमानौ वाचयन्तत इत्यत्राध्वर्युयजमानयोः कर्मत्वं। क्षौमे वसानावग्नीनादधीतामित्यत्र दंप
८५ त्योः कर्तृत्वमेकमेव द्वयोः पर्यायत इत्यधिकविधौ बोधयिष्यते। स्यादेतत्। मन्त्रेप्यपि घटं जानातीत्यादावावरणभंग
प्राकट्यं विषयतास्वरूपं वा धात्वर्थफलजन्यपि व्यापारविशेषणे धात्वर्थांतरे परिभाषामादाय कर्मसंज्ञाप्रवृत्तेः। अखंड
कर्मत्वपक्षे दर्शनांतराभिमतकर्मत्वव्यंग्यस्यैव तस्याभ्युपगमात्। एवमपि भगवान्भगवंतं जानात्यात्मानमात्मना वे
त्तीत्यादौ भगवतः क्षेत्रज्ञस्य वाभेदाद्व्यापारफलयोस्तुल्याधिकरणत्वात्परस्या कर्तृसंज्ञया कर्मसंज्ञायाः कुतो न बाधः।
कथं वा क्रियायाः परसमवेतत्वं। मन्नु। अवच्छेदकभेदादेकस्यापि कर्तृत्वकर्मत्वोपायं न विरुद्धमिति। तन्न। भेदाभेदवादा
पगमे चैत्रश्चैत्रं गच्छतीति प्रयोगापत्तेस्तथापि दुर्वारत्वात् इति चेत्सत्यं॥ आधेयत्वं च भेदं च युगपद्ब्रुवतो प्ययमः। जा
नासित्वां त्वमित्यादौ भेदहानिन लक्षणा। यद्यपि त्वमेव जानासीत्यादौ विषयतास्वरूपफलगाम्याधेयत्वमात्रमभि
धया प्रतिपादयितुमशक्यत्वात्तस्य पुष्पवंतपदादिवदेकयो त्तयाफलगाम्याधेयत्वं कर्त्रादिगामि भेदं चाभि धातु राम
मेव सामर्थ्यात् तथापि भेदांशापहारेणाधेयत्वमात्रे द्वितीयापा लक्षणा संभवत्येकवल्लवदनिष्टानुबंधित्वांशाप ८५

हारेणाविधेरिवश्येनादौ। तथा चात्र भेदहानेन वा कार्यार्थबुद्धिरितिनाकिंकरणिरेव श्रेयसी। ननु लोके विभक्तौ न लक्ष
णा। तथा च वार्तिकं। सुपां कर्मादयोप्यर्थाः संख्या चैव तथा तिङां। प्रसिद्धो नियमस्तत्र नियमः प्रकृतेषु वेति। सुपां तिङां
च यथानुशासनं कर्मत्वादिकारकमेकत्वादि संख्या चार्थः। तत्रानुशासना नियमपर्यवसायीनि। स च नियम एकवचन
मेवैकत्वं द्विवचनमेव द्वित्वं। द्वितीयैव कर्मत्वं प्रतिपादयतीत्याकारस्तेन। एकवचनेनतरस्य सुप एकत्वबोधकाभावः द्वितीयाभिन्न
स्य च कर्मबोधकत्वाभावः फलति। नन्वेवं द्वितीया कचित्कर्मापहाय गमनमपि बोधयेदुक्तनियमभेदप्रसंगविरहादित्यतः
पक्षांतरमाह। नियमः प्रकृतेषु वेति। तथा च द्वितीया कर्मण्येवेति नियमशरीरं। तथा च यावंतोनुशासनसिद्धा द्वितीयार्था
स्तस्मात्प्रकृताद्व्यमर्थं द्वितीया न प्रतिपादयतीत्यर्थतः फलितमिति तस्य वार्तिकस्य विवरणमतः कथमननुशिष्टे कर्मै
कदेशे द्वितीया साधुरिति चेत्। विभक्तिः प्रकृतेष्वेवेत्येवं नियमः स्यादिति। चतुर्थे चरणेनास्थां वाकारेणाह वार्तिकं। कथितवा
र्तिकचतुर्थचरणे नास्थायां वाकारः। विभक्तिः प्रकृतेष्वेवेति नियमशरीरस्यासंभवदुक्तिकत्वात्। तत्राहि विभक्तित्वाव
च्छेदेन प्रकृतभिन्नप्रतिपादकत्वाभावः प्रकृतप्रतिपादकत्वं चप्रतीयते ननु विभक्तसामानाधिकरण्येन विभक्तिकर्म

ण्यवशब्दोवाचकंएवेत्यप्रयोगात्। उद्देश्यतावच्छेदकावच्छेदेनोभयप्रागप्रयोग्यत्वएवैवकारस्यसाधुत्वात्। इत्थंचतेचनिर
प॰वा॰र॰ र्थका अपिनिपातसमभिव्याहृताः सुपः। अव्ययार्थानामसत्वस्वरूपेणसंख्यान्वयेप्ययोग्यत्वात्। प्रातिपदिकार्थसत्ता
८६ साचसुप्सामर्थ्येतिप्रागेवनिराकृतं। ननुभवतुतर्हिप्रकृतेषुविभक्तिरितिपरिसंख्याविभक्तिःप्रकृतेनतरंनप्रतिपाद्यतेती
तितस्याएवछंदसिप्राप्तिप्रसवः क्रियते। सुपांसुलुगिति। तेनस्वर्गकामोयजेतेत्यत्रप्रथमेचस्वर्गस्ययागकरणकभावना
कर्मत्वंलक्षणयाप्रतिपाद्यंत्यपिनाननुशिष्टविषयाप्रभक्तीर्णिमिदर्शनीयानि। सुंदराःपादाःसंपन्नाव्रीहयइत्यादौजाति
गतैकत्वाभिधायकंबहुवचनमपिजस्याख्यायामेकस्मिन्बहुवचनमन्यतरस्यामित्यनुशासनप्राप्तिप्रसक्तमेवेति
नास्त्यननुशिष्टेविभक्तीनांलक्षणायातिचेत्। तर्हिभेदाधेयत्वयोःशक्तिरमोनेकार्थमुद्रया। इयोरबाधेभेदस्यवाधे
यस्यसमन्वयः। कर्मणिद्वितीयेत्यनेनसूत्रेणकर्मघटकेषुक्रियाफलतदधिकरणानामन्यलभ्यतयाभेदआधाराधे
यभावश्चामीष्वासांशक्यइतिप्रतिपाद्यते। शक्तिर्नयौगपद्येनपुष्पवंतपदवत्कृत्रहकाभावात्। किंतुनानार्थरीत्या राम
कांक्षावैचित्र्याच्चैकपदोपात्तयोरपिभेदाधेयत्वयोर्यौगपद्येनान्वयबुद्ध्यनुप्रवेशश्चौत्सर्गिकः। यत्रकर्तृकत्वौरक ८६

अन्यथावाक्यभेदप्रसंगात्। तथाचप्रगाद्वितीयादुर्वारास्याद्धातोरिवपर्युदासाभावेनप्रातिपदिकत्वादितिचेत्सत्यं। वाक्येक
वाक्यतेयमत्रवाक्यार्थःकर्मत्वेनविवक्षितोननुवाक्यंप्रातिपदिकमितिकथंद्वितीयाप्रसज्यते। वाक्यंहिवृत्यार्थवत्वाभावात्। कृ
त्तद्धितसमासाश्चेतिनियमविधेर्वानप्रातिपदिकं। अतएवदेवाकर्णयसंग्रामेचापेनासादिताःशराः। मलिनेनेवपुःस्नायादिसा
दावेववाक्यता। संग्रामाधिकरणचापकर्तृकासादनकर्मणांशराणांविशिष्टविषयतारूपकर्मत्वसंसर्गेणदेवसंबोधिका
यामाकर्णनक्रियायांमलिनस्यवपुषोविशेषभागेपसंक्रांतविशिष्टहेतुतासंसर्गेणस्नानेचान्वयेपिनकर्मणिद्वितीया।
नवाहेतुपंचमी। वाक्यस्यप्रातिपदिकसंज्ञाविरहादेवंधावतोमृगस्यापिविशिष्टकर्मतयादर्शनान्वयेनततोद्वितीया। कालेपरिपू
र्वतेगावइत्यादौपरिपूर्वनकर्तृगवांकालेनकर्मतयान्वयादेकवाक्यत्वांननुतथापिकेनिगम्यकेनेदंपरिच्छिद्यतेतत्स्वप्रथमांतार्थए
वप्रधानमितिचेत्। उच्यतेपश्यातिपुरुषस्तस्यपदस्योरभिवादमःइत्यादौप्रथमांतार्थःप्राधान्यात्परामृश्यतेतदा। यदितिङंतप्रथमां
तयोःप्रथमांतार्थस्यप्राधान्यंनस्यात्तदाप्रमातिपुरुषइत्यादौपुरुषस्तच्छब्देनपरामृश्येत। गुणीभूतस्यार्थस्यतच्छब्देनपरा

फ॰वा॰र॰ मर्शासंभवात्। अन्यथादृश्यन्तेतु राजमातंगास्तथैवामीतुरंगमा इत्यत्र राज्ञस्तच्छब्देन परामर्शप्रसंगात्। अत एवानुमानं निरूप्यत
८० इत्युपक्रम्य तत्रानुमितिरिति तदा निरूपणाय परामर्शासंभवात्तत्र निरूपणीयेऽनुमान इति प्रमायामुपाध्यायाः। अत्र तत्त्वदानुसम
व्याहृत द्वितीयायाः संयोगविभागादिरर्थः। द्वितीयासाकांक्ष धातुत्वमेव सकर्मकत्वमित्येतन्मुख्यव्यापारस्य धात्वर्थतावादिनः। प
रे तु। धात्वर्थफलावच्छिन्नव्यापारे द्वितीयार्थफलान्वयमभ्युपगच्छंति। तदुभयमपि चिंत्यं। शाब्दिकतार्किकयोर्मतमुपदर्श्य भाट्ट
दर्शनसिद्धांतः प्रस्तूयते। आख्यातार्थे भावनायां प्रधानभूतायां कारकाणामन्वयो न तु धात्वर्थे तस्यापि भावनायामन्वया
त्। कारकतया परार्थानां कारकाणां परस्परमन्वयायोगात्। कारकं तु कर्मत्वकर्तृत्वादिकमखंड एव पदार्थः। अत एवाध्वर्यु
यजमानयोर्वाक्संयमनभावनाकर्मत्वं। दंपत्योः कर्तृत्वं च व्यासक्तमित्युपपद्यत इति भाट्टाः। नन्वाख्यातस्य फलव्यापारो
भयवाचित्वाभावात्सकर्मकत्वमाख्यातार्थभावनायामनुपपन्नमिति। मैवं। करोतिरुत्पादयतिसाधुर्भावयतिर्जनिः।। रम
विवृण्वते तिङंते नोत्पत्तिव्यापारयोरसौ। तिङ्प्रत्ययस्तावदुत्पत्तिं प्रत्यनुकूले व्यापारे उत्पत्तिर्व्यापारयोर्नावर्त्तेते। एकपदार्थ ८०

योर्बुध्या धावत्वनुकूलत्वस्य संसर्गत्वमेव लाभसंभवात्। अत एवोत्पत्तिपरिच्छिन्नव्यापारवाचिनः करोत्पादय आख्यानं विवृ
ण्वते। भावनान्वयोस्तत्तावधारत्वेन संगतं। कर्मतद्भूतेव क्वापि धातवः कुत्रचित् पिकः।। पचतीत्यत्र पाकं करोतीत्युत्पादयति
साधयति भावयति जनयति नील्यादि विक्रीयमाणस्याख्यातस्यार्थे उत्पादनीमामिकदेशीभूतायामुत्पत्तावाधाराधेयभावेनान्वि
तः पाको धात्वर्थ एव कर्म। अत एव विवरणवाक्ये पाकपदात्कर्मानुवादिका द्वितीया। यत्र चौदनं पचतीत्यर्थ आख्यातार्थभित्ता
यामुत्पत्तावन्वययोग्यमोदनादिवृत्तित्वं द्वितीययोपस्थापितं। तत्र पिकांपतिपादिकानामर्थ एव कर्म। धात्वर्थस्य तत्र करणत्वे
नोत्पत्तावन्वयः। अत एव पाके नौदनं भावयतीत्येव नादृशवाक्यविवरणं। अत एव भावनाकर्मीभूतस्य धात्वर्थस्य विशेषणे।
अग्निहोत्रं जुहोतीति द्वितीयाप्युपपद्यते। यत्र नित्यस्य होत्रेन फलांतरं भावनान्वययोग्यं तत्र नित्यतया भावककर्त्तव्यताको जुहोति धा
त्वर्थ एव भाव्यतया। अत एव जुहोतिसमानाधिकरणे कर्मनामधेयाग्निहोत्रपदे द्वितीया कर्मविशेषणपदत्वान्नीलं घटमानये
त्यत्र नीलपदवत्युपपद्यते। विनाभाव्यंतरं यत्र नोपपन्ना प्रवर्त्तना। श्रुतं वा कर्म करणीभूय तत्र क्रियान्वयः। यस्मां भावनायां स्व

गादिभाव्यंविनानिःफलत्वेनलिङुपात्तभवनत्वेनान्वयसंभवः धात्वर्थमात्रस्यकरणभाव्यत्वान्वयायोगात्।नत्रक्रियायात्वकर्म
त्वेनान्वयः।एककर्मावरुद्धेकर्मांतरस्यानाकांक्षितत्वात्।किंतुकरणत्वेन।अतएवसोमेनयजेतेत्यत्रस्वर्गरूपेष्टस्वर्गकामपदो
पात्तेनाक्षिप्तेनवाभाव्येनसकर्मिकायांभावनायांकरणतयायागोदेरन्वयः।तथाचस्वर्गकर्त्तृयागकरणिकाभावनेत्युक्त
लोव्यापारः प्रवर्त्तनागोचरइतियजेतेत्यत्रवाक्यार्थः। अतएवयजेतेत्यस्ययागेनस्वर्गंभावयेदितिविवरणं। यजेत्यर्थसमाना
धिकरणेहिविशेषणे। तृतीयाहृश्येनेनयागकरणत्वानुवादिका।ज्योतिष्टोमेनयजेतेत्यत्रकर्मनामधेयाज्ज्योतिष्टोमपदात्तृ
तीयाश्रूयते। साचयागभावनायाःसंसर्गतयालब्धस्यकरणत्वस्यानुवादकत्वएवसंघटते।करणपदसमानाधिकरणेना
म्नितृतीयायाःकुटिलेनदंडेनगांकालयेत्यादौदर्शनात्।नन्वेवंगोदोहेनपणयेत्पशुकामस्य।दध्नेंद्रियकामस्यजुहुयादि
त्यादौप्रणयनहवनादेर्धात्वर्थस्यनकरणतयाभावनान्वयः।दधिगोदोहनादिनाकरणेनावरुद्धायां करणांतराकांक्षानुत्था
नात्। नापिकर्मतयापश्विंद्रियादिभाव्यावरुद्धायाभाव्यांतरनिराकांक्षत्वादितिचेत्।कश्चित्करणोपात्तक्रियायाअनुवादकः। राम
८८

र्मात्रेवाफलंयदधिकरणभेदान्वययोग्यःकर्त्ता।यत्रतुफलस्यव्यापाराधिकरणमात्रांशगतत्वेनभेदान्वयबाधस्तत्राधेयत्वमात्रंद्वितीययात्वे
वप्रतिपाद्यते।नचानुशासनव्यत्ययइति।बाधसापेक्षवृत्तित्वेनात्राभिधायामिवलक्षणाव्यपदेशः।बाधःफलाधिकरणभिन्नव्यापारोनवर्त्तत
इतिसामान्याकारेणोपनिबद्धते।तेनद्व्यनियतवृत्तिकसंयोगादिफलकेधातोर्नियमेनोभयान्वयएवतेनचैत्रश्चैत्रंगच्छतीतिनप्रयोगः।यत्रचैक
मात्रवृत्तिविकृत्यादिफलंतत्रकर्मगतव्यापाराभिधायिनिधातौकर्मवत्कर्मणातुल्यक्रियइत्यनेनफलतोद्वितीयाप्रतिषिध्यते।कर्मवदितिस
सूत्रंतुनिर्वर्त्यविकार्यकर्ममात्रविषयकमित्यन्यत्रप्राप्यकर्मगतव्यापाराभिधायिनि।धातौजानातेर्बाधेयत्वमात्रार्थिकाद्वितीयानुपपन्ने
त्यधिकंसकर्मकलक्षणेनुसंधेयं।ज्ञाधातोर्बुद्धिःफलं।तदनुकूलोव्यापारःक्रियाबुद्ध्यन्वयिनिविषयत्वेद्वितीयालाक्षणिकीणिनकर्मसंज्ञा
मपेक्षतइति।स्वंजानातीत्यादौकर्त्तृसंज्ञावरुद्धेपिविषयेद्वितीयानानुपपन्नानियमःप्रकृतेषुवेत्तिवार्त्तिकंतुनिरूढलक्षणास्वरूपांवृत्तिमेव
प्रकृतेषुनियमयति।इयंतुस्वारसिकीविभक्तेर्विषयत्वादौलक्षणा।एवमेवस्वंहिनस्तीत्यत्रध्वंसंतदनुकूलंव्यापारंचाभिदधतोहिंसेर्यै
ध्वंसेफलेद्वितीयात्वस्यंप्रतियोगित्वमप्यन्वेति।नचापेक्ष्यतेप्रतियोगिनिकर्मसंज्ञा।आकडारादेकासंज्ञेतिकर्त्तरितदसंभवात्।अभिधेयमा
धाराधेयमात्रंतुद्वितीयानप्रभवति।प्रतिपादयितुं।भेदमारोप्यैवतस्थाःस्वाभिधेयत्वेद्वितीयाप्रतिपादकत्वादतोनचैत्रश्चैत्रंगच्छतीतिप्रयो

प॰वा॰र॰ गः।नन्वेवंस्वारसिकलक्षणयापिभट्टपादैरनियम्यत्वेद्वितीयांप्रतिपाद्यतेतिवाच्यं।स्वारसिकलक्षणायामपिभट्टपादैरप्रयोगस्यबोधकत्वा
८९ पत्त्यासात्।यदाहुः।क्रियेतेसांप्रतंकाश्चित्काश्चिन्नैवाप्रयोगतइत्युदाहरंति।रूपंवस्त्रमितिनेयार्थतापीपम्मैवयस्प्रयोगप्रतिहतालक्ष
णा।प्रयोजनराहित्यमपिनेयार्थताप्रयोजकमिति।प्रयोजनपरत्वयजननयोग्यतावच्छेदकलक्षणाविरहपरमितितत्रतत्रद्रष्टव्यमित्य
पिवदंति।अकथितंचेतिसूत्रेणविषयेकर्मसंज्ञाप्यन्ये।यत्तेस्तुप्राधान्येनयनावान्विनोधात्वर्थफलाभावादकर्मकत्वान्नविषयेकर्म
संज्ञेत्यपरे।धातोरुत्सर्गतोवृत्तिःफलव्यापारयोर्द्वयोः।विधेतिकेचनतवार्थोदु ॰ वप्रस्थिरुधाद्यः।उत्सर्गतोधातूनांफलव्यापारावर्थौ
द्वाविवेतिप्रपंचितप्रायं।दुहादयस्तवर्थास्तथाहि।विभागस्पंदनंव्यापारश्चदुहेरर्थः।स्पंदनत्वंतुद्रव्यत्वजन्यतावच्छेदकजातिरादि
क्रियावृत्तिर्जातिः।गोदोग्धिदुग्धंगोपालइत्यत्रविभागोजनकतयाक्षीरःस्पंदनेतच्चतण्वैवगोपालव्यापारेऽन्वेति।दानंप्रतिश्रवोव्या
पारश्चयाचेः।देयत्वेनाभ्युपगमःप्रतिश्रवः।राजानंकनकंयाचतइत्यत्रराजसमवेतंदानमनुकूलतयाकनकविषयकेप्रतिश्रवेस
चखलिप्सापकारकेदद्दीतिवाक्यादौभिक्षुव्यापारेसंसज्यतेकनकेविषयतयैवद्वितीयार्थः।एवंज्ञापकसिद्धेववविषयस्यकर्म रम॰
संज्ञा।समवायेनप्रतिश्रवयोःसामानाधिकरण्येपिसमवायविषयत्वाभ्यांवैयधिकरण्यमस्तीतिभवतिप्रतिश्रवांसधातोःसक ८९

र्मकत्वं।प्रतिश्रवोव्यापारश्चेत्युभयमेवधात्वर्थः।प्रतिश्रवश्चसमवायिनाविषयेणचकर्मणासाकांक्षइतिभवतिद्विकर्मकोयाचिरित्यपि
वदंति।उत्तरमनुज्ञास्यत्वमनुयोगश्चपृच्छेः।सामान्यवतिविशेषबोधकंवचनमनुत्तरं।जिज्ञासितत्वेनप्रतिपत्तिरनुज्ञास्यता।किमा
दिशब्दघटितवाक्यादिरनुयोगः।ज्ञानपदंपंथानंपृच्छतिपथिकइत्यत्रपरंपरयाज्ञानपदाश्रितमुत्तरंपथिकजिज्ञासितप्रतिपत्तौसा
धकःपंथाइत्यादिवाक्यंदानकतयान्वेति।अत्राप्युत्तरमात्रंफलंतच्चवृत्तिद्वाराधिकरणेनज्ञानद्वाराविषयेणचोभयमपिधकर्मणान्वि
तमित्यपरे।विभागानुत्पादःकर्मानुत्पादोव्यापारश्चरुधेः।व्रजगांरुणद्धीत्यत्रव्रजविशेषितोविभागानुत्पादःकर्मानुत्पादस्सचपुरुष
व्यापारे।योगक्षेमसाधारण्याजनकतयान्वेति।व्रजपदादिसमभिव्याहृतद्वितीयाभेदमाधेयत्वंचाभिधत्ते।तेनगांगांरुणद्धीतिनप्र
योगः।अतएवद्वितीयायाःकेवलमाधेयत्वशक्तत्वाननिर्वाहःकर्मसंज्ञायास्तांप्रत्यबाधकत्वेननिरुक्तप्रयोगापत्तेः।संयोगध्वंसआ
कर्षणकर्मव्यापारश्चचिनोतेः।तरुंपुष्पंचिनोतीत्यत्रतरुसंयोगध्वंसजनकाकर्षणरूपेपुष्पकर्मणितत्पुरुषव्यापारेजनकतयावि
शेषणं।शाब्दबोधःस्मरणंशाब्दश्चब्रुवेः।नृपंहितंब्रवीत्यत्रनृपसमवेतशाब्दबोधोहितविषयकस्मरणेतच्चवक्त्रेनिजनकतयान्वे
ति।शाब्दबोधएवब्रवीतिफलंसचसमवायिविषयोभयगामीत्यनेनस्वामित्वध्वंसस्त्यागोव्यापारश्चदंडेः।गर्गान्शतंदंडयतीत्य
त्रगर्गविशेषितःस्वामित्वध्वंसःशतविषयकत्यागेसचप्राड्विवाकव्यापारेऽन्वेति।कृतिरुपदेशोव्यवहारश्चशास्तेः।कृतिप्रवृत्तिनिवृत्ति
श्चोपदेशःकर्त्तव्यत्वेनाकर्त्तव्यत्वेनवाध्यवसायः।शिष्यंधर्ममधर्मंवाशास्तीत्यर्थयमायधर्मंशिष्यसमवेतप्रवृत्तिर्निवृत्तिरुपदेशपो

प॰वा॰र॰ धर्माधर्मे विषयकयोः तौ च गुरुव्यापारे विशेषणं। दंडयतेः प्रभुव्यापारो जयतेस्तु द्युतादिप्रधानमिति मुख्यार्थे कृतार्थभेदेन गुणकृतः।
१० यथाशासिकं शतं जयतीति मज्जनाख्यसंयोगध्वंसउन्मनाख्यं कर्म व्यापारश्च मंथेः। क्षीरसागरं कौस्तुभं मथ्नातीत्यत्र क्षीरसागरादिध्वंसः
कौस्तुभादिकर्मणि तच्च विलोडनं व्यापारेऽन्वेति। स्वामित्वे सति यथेष्टविनियोगः। स्वत्वाभावे यथेष्टविनियोगो व्यापारश्च मुष्णातेः। वणिजं
हिरण्यं मुष्णातीत्यत्र स्वामिनो वणिजो यथेष्टविनियोगाक्षमत्वं हिरण्यस्यास्वविनियोगयोग्यत्वं तच्च तस्करव्यापारप्रयोज्यत्वेनान्वे
ति। शिथिलावयवत्वरूपोत्पन्नविक्लित्तिव्यापारश्च पचेः। तंडुलानोदनं पचतीत्यत्र ओदनोत्पत्तौ तंडुलविक्लित्तिः सा च व्यापारविशेषण
त्वेनान्वेति। एतद्द्वादशधातवो दुह्यादयः। संयोगः कर्म व्यापारश्च नयतेः। ग्राममजां नयतीत्यत्र ग्रामसंयोगोऽजाकर्मणि तच्च पुरुष
व्यापारेऽप्रेरणायामन्वेति। नयतिवा प्रेरणादि वहतिना पुनराधेयकर्मानुकूलमाधारकर्मप्रस्याप्यत इति विवेकः। नौकादिस्वकर्मणा पुरुषे
कर्म जनयित्वा देशांतरं नयति। नाश्वसंयोगसन्निकृष्टसंयोगादित्रिकं नयतिवत्कर्षेरर्थः। वहतिवच्च हरतेरिति चत्वारः। न्यादयो धातवेः
एवं षोडशात्रार्थाः। दंडिजयत्यादिवत्कृषिं हरपि न्यर्थ इति केचित्। ॥ तन्निर्मूलमित्यन्ये॥ ॥ तेषां त्रयाणामर्थानां द्विक्रियेमध्यगानि मे। रम
आदिमध्येफलेन त्रकृतार्थमनुशासनं। कर्तृप्रत्ययांतेन धातुना स्वार्थविशेष्यतया प्रतिपाद्यमानो [illegible] १०

व्यापारः॥ स्वार्थविशेषणतया प्रतिपाद्यमानं फलं स्वजन्यस्मरणमुख्यविशेष्यतया भासमानं स्वार्थः॥ विशेषणविशे
ष्यत्वे आकांक्षानियम्य न तु प्राकृते॥ तेन कर्मप्रत्ययांतेन धातुना फलस्य प्राधान्येन प्रतिपादनेपि न व्यापारत्वं॥ न वा तत्र
गुणतया भासमानस्य व्यापारस्य फलत्वं॥ नापि फलतावच्छेदकविशेष्ये फले व्यापारत्वं न वा व्यापारविशेषणे व्यापार
तावच्छेदके फलत्वं॥ तथा च गां दोग्धि दुग्धं गोपाल इत्यत्र स्पंदनं पुरुषव्यापारश्च क्रिये॥ स्पंदनं विभागश्च फले॥ तथा
च मुख्यव्यापारशालितया गोपालस्येव गुणीभूतव्यापारवत्तया दुग्धस्यापि कर्तृत्वप्रसक्त्यात् अपवादकमकथितं
चेति सूत्रं एतेन धात्वर्थफलशालितया गोदुग्धयोरपि कर्मत्वं॥ कर्तुरीप्सिततमं नीप्सितं चेति सूत्राभ्यामेव सिद्धमित्य
कथितसूत्रारंभो निरर्थक इति समाहितं॥ कर्तृकर्मोभयसंज्ञाप्रसक्तौ परत्वात्कर्तृसंज्ञाया एव विनापवादं दुर्वारत्वा
त्॥ विभागेन परिच्छिन्नं स्पंदनं ब्रुवतो दुहेः॥ एकदेशान्वितेकर्मसंज्ञार्थं वानुशासनं॥ भवतु तर्हि विभागजनकस्पंदन
फलविधाया वोधयन्नयमर्थ एव दुह्यादिधात्वंतरवत्॥ तदर्थैकदेशान्वयं न त्वयुक्तं गौणकर्मणि गवादौ कर्मसंज्ञाचापू

प०वा०र० वीप्रतिपादयितुमकथितंचेत्यनुशासनं॥ शाब्दिकास्तु गांदोग्धिदुग्धमित्रसत्रगोःसंबंधमात्रविवक्षायांशेषषष्ठीप्र
२१ क्षारकस्यवस्त्रंददातीतिवत्॥ तथाचतदपवादायाकथितसूत्रारंभः॥ तथाचगोसंबंधीपयःकर्मकंदोहनंवाक्यार्थः॥ य
दिचगोर्विभागाधिकरणत्वविवक्षातदाप्राकृतिकीकर्मसंज्ञा॥ गवाधिकरणविभागानुकूलंपयोधिकरणकंस्पंदनंत
दनुकूलोगोपाधिकरणकोव्यापारइतिबोधः॥ यदिचगोरवधित्वविवक्षातदागोःपयोदोग्धीतिपंचमी॥ गोःपय
संबंधविवक्षायांषष्ठ्यपिप्रामाणिकीतिप्राहुः॥ दुह्यादयोन्यादयश्चद्विविधाश्चैतेद्विकर्मकाः॥ प्रथमोसौगौणकर्मप्र
त्ययप्रकृतिर्गणः॥ यश्चप्राकृअप्रतिपादितं॥ दुहादिरिति॥ न्यादिरिति॥ सकर्मकधातूनांद्वैराश्यं॥ तत्रप्रथमोदुहादिर्गौ
णेगौणेफलविशेषणफलविशेषणफलाधिकरणेकर्मण्याख्याताकृत्यक्तखलर्थानांप्रकृतिर्नतुमुख्ये॥ न्यादि
स्त्वर्थान्मुख्ये॥ मुख्यव्यापारविशेषणफलाधिकरणेप्रतिपाद्येकर्मप्रत्यायानलभंते॥ ननुगौणेततएवतयोर्गौण राम
योरितराशेकर्मानभिधानद्वितीयैवप्रयोज्या॥ तथाहि॥ दुह्यते॥ दोग्धव्या दुग्धा दुदोहावागोःक्षीरमित्यादौकर्मप्र २१

त्ययाःगोःकर्मत्वमभिदधते॥ नतुपयसः॥ अतएवराजासुतंयाचिताअहमपिदमचोद्यंचोद्यइतिप्रष्ठिप्रायेणप्रयु
दिताभाष्यंयामवरुध्यतेव्रजः॥ पुष्पमवचाययतेलता॥ हितमुक्तोभ्यस्तपतिगर्गः॥ शतंदंडयंतेजायंतेवाधर्ममनुशा
स्यतेशिष्यःदेवासुरैरमृतममुनिधिर्ममंथे॥ रत्नानिमुषितोबालकः॥ ओदनाःपंचंतेतंदुलानित्यादिप्रयोगाःदुहा
दिष्यागोणे॥ नीयतेग्राममजाद्वीपमुह्यतेनावासोयोचिकः॥ निकृष्यंतेकंदुकइत्यादयःप्रधानेकर्मणिप्रत्ययं
प्रयुंजते॥ गतिबुध्यशनार्थेषुशब्दकर्मण्यकर्मके॥ अणोकर्त्तासणोकर्मनियमादथवाविधेः॥ गत्यर्थागमिव्रज्या
दयः॥ बुध्यर्थाःज्ञानत्वविशिष्टवाचकाः ज्ञाबुध्यत्यादयोनतुज्ञानविशेषार्थाःजिघ्रत्यादयः॥ अशनार्थाःगल
संयोगफलकव्यापारवाचिनोभुज्याद्याःशब्दकर्माणःशब्दवाचकाइतिकेचित्॥ कर्मपदंकारकपरं॥ तेनशब्दाभिन्न
कारकोपलक्षितक्रियावाचिनइत्यपरे॥ अकर्मकाः॥ देशकालभावगंतव्याध्वभिन्नैःकर्मभिरनपेक्ष्याःनतुक
र्म्यपेक्षायोग्याः॥ अविवक्षितकर्माणोपिगम्यादयः॥ कुरून्स्वापयतिपथिकं॥ मासमासयतिगुरुं॥ गोदो

९२ हंस्मापयतिमाणवकं॥ क्रोशंगमयतियात्रिकानितिप्रयोगवत्॥ पाचयतिचैत्रेणेत्यत्रप्रमाणं॥ एषांधातुप्रयोगे
ज्ञाभावेयत्रकर्तृसंज्ञातत्रणिन्समभिव्याहारेसतिकर्मत्वंसंज्ञायते॥ गमयतिदिग्गंतमरीनित्यत्रारीणांकर्तृः॥
बोधयति॥ धर्ममाणवकानित्यत्रमाणवकानामाधारत्वंतदाधेयत्वंवाभोजयतिभट्टमतिथीनित्यत्रातिथीनांप्रयत्नः॥ एतेषां
हारयतिव्रजभृत्यंचैत्रेतस्मिन्कर्तृत्वं॥ आसयस्य१तिथिमित्यादावतिथौयत्नश्चद्वितीयार्थः॥ स्वचणिच्प्रकृतिकधात्वर्थानि
तः॥ आश्रयोद्वितीयार्थइतिवैयाकरणाः॥ नन्वेवंगमयतिदिग्गंतमरीनित्यत्रणिजंतधात्वर्थविशेषणीभूतगमनादिप
त्ववतिकर्मसंज्ञायाः कर्तुरीप्सिततमंकर्मेत्यनेनैवसिद्धेर्गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणिकर्तासणौवि
तिसूत्रंव्यर्थमितिचेत्सत्यंनियमार्थमिदंसूत्रंणिजंतप्रधानकर्मणिकर्मसंज्ञाएवयंतदगत्यर्थादिष्वेव॥ अन्यत्रतु
णिच्प्रकृतिधात्वर्थाधिकरणतयाकर्तृसंज्ञैवावतिष्ठते॥ तेनचैत्रेणयाचयत्यन्नमितिप्रयोगः सूपपदः॥ तदाहुः॥
गुणक्रियायांस्वातंत्र्यात्प्रेरणेकर्मतांगतः॥ नियमात्कर्मसंज्ञायाः स्वधर्मेणाभिधीयतइति॥ गुणक्रियायांणिच्प्रक राम ९२

त्यर्थव्यापारेस्वातंत्र्यंसाक्षादाश्रयत्वंयंचन्यत्यर्थः॥ स्वधर्मेणेतितृतीयाभिधानेनेति॥ प्रेरणेणिजर्थकर्मतांगतोपीति
शेषइतिप्राचः॥ नवीनास्तुविधानमकर्मेवगत्यादिसूत्रमन्यथापरयाकर्तृसंज्ञयाकर्मसंज्ञयबाधप्रसंगात्॥ प्रयोज्ये
कर्तृसंज्ञाविनाणिच्येवानुत्पत्त्यापेक्षकर्मसंज्ञायामुपजीव्यतयाकर्तृसंज्ञायाएवबलवत्त्वात्॥ हेतुमतिणिच्विधी
यतेकर्तृप्रयोजकश्चहेतुः॥ स्वकारकविशिष्टाक्रियाणिजर्थन्वेतीतिगुणक्रियाकारकसंज्ञाअंतरंगतयाबलवती॥
अर्थतः प्रधानंचगुणक्रियाभवति॥ गमयतिचैत्रउत्सत्रहिचैत्रहिचैत्रकर्तृव्यापारजन्यगमनमित्यस्यवान्वयबाधइति
प्रधानानुरोधादेवसंज्ञाबलवत्त्वंयुज्यते॥ तदुक्तमभियुक्तैः॥ परत्वादंतरंगत्वादुपजीव्यत्वात्तथा॥ प्रयो
ज्यस्यास्तुकर्तृत्वंगत्यादेर्विधितोन्वितेतिव्याकुर्वंते॥ नन्वेवंगमयतिदिग्गंतमरीनित्यत्रारीणांकर्तृसं
ज्ञायकर्तुरीप्सिततमत्वाभावाद्दिग्गंतस्यकर्मसंज्ञानप्रवर्त्तेतेतिचेत्॥ उच्यते॥ संज्ञांतरासमाविष्टस्वतंत्रेपरि
भाषितः॥ कर्तृशब्दः स्वतंत्रेर्थेगौणोवाचकएववा॥ यद्यपिकर्तृशब्दः संज्ञांतरानवसरुस्वतंत्रेधातुयातव्याप

प०वा०र० त्वतिपाणिनिना परिभाषितः। आकडारमेकसंज्ञाप्रतिपादनात्॥ तथापि कर्तुरीप्सिततमं कर्मेत्यत्र क
९२ र्तृपदं स्वतंत्रमात्रलाक्षणिकं। समुदायशक्तस्यैकदेशे लक्षणाप्युपगमात्। अत एव अप्रधानकर्मणा स्व
येलादीनां दुहादिकर्मणां। अप्रधाने दुहादीनां ण्यंते कर्तुश्च कर्मण इति भाष्ये कर्मसंज्ञावरुद्धेपि चतुर्थचरणे
कर्तृशब्दप्रयोगः। वस्तुतस्तु। कर्तृशब्दः स्वतंत्रमात्रस्य वाचकः संज्ञांतरानवरोधादेः परिभाष्यतावच्छेदके
लंगौरवात्। अपवादके स्तु कर्तृसंज्ञाप्रयुक्तानि कार्याण्यपोह्यंते। आकडारप्रतिज्ञापि कार्यप्रतिनियमा
र्थिकैवेति दिक्। यथानुशासनं एण्यंतधातुयोगेन कर्तृनि कर्मसंज्ञाविधिष्वपविकल्पानां व्यवस्थितिः। ण्यं
तधात्वर्थकर्तरि कर्मसंज्ञायां विधिर्जल्पमश्रु यह दशायां पुत्रं भक्षराणि जल्पयति ग्राहयति श्रावयति दर्शे
यति वेति प्रयोगात्॥ यत्तु शृणोतेः शब्दकर्मतया कर्तरि कर्मसिद्धे पुनर्विधानमनुचितमिति। तन्न। श्रुधा रामू
तोः श्रवणत्वमिव शब्दत्वमपि प्रवृत्तिनिमित्तमात्मा श्रोतव्य इति श्रोतव्यहात्॥ तथा च धर्मं श्रावयति सु ९२

तमित्यादिप्रयोगोपपत्तये विधेयंतरावश्यकत्वाच्छब्दबोधवाचकस्यापि स्रुवे बुद्ध्यर्थकतया गतिबुद्ध्यादि
सूत्रेणापग्रह इति तु न देश्यं। बुद्धिसामान्यवाचिनामेव हि बुद्ध्यर्थतया निर्देशो न तु तद्विशेषार्थानां दृशश्च
ति पृथगुपादानात्। स्मारयत्येनं वनगुल्मः स्वयमेवेत्यादौ भाष्यप्रयोगो ज्ञीतयिधि बोधितस्मरणकर्तरि कर्म
त्वं। परंतु। शब्दकर्मेत्यत्र कर्मपदं कारकवाचि। तथा च यद्रूपावच्छेदेन शब्दकारकत्वं तद्रूपविशिष्टवाचकधातुरेव
शब्दकर्मक इत्युच्यते। श्रावणत्वावच्छेदेन शब्दः कर्म शाब्दबोधत्वावच्छेदेन करणमित्युभयार्थस्य शृणोतेः
पग्रह इति शृणोतो पृथग्विधिरवग्राहिरापि न हि कर्मकः। अत एव जायाप्रतिग्राहित गंधमाल्यस्यादिना जाया
कर्तृकगंधमाल्यकर्मकप्रतिग्रहकर्त्रीमित्यन्वयबोधो जन्यते। न ह्यजायाप्रतिग्राहितामिति विग्रहादर्धपि
प्पल्यादिरसावित्यादिदेश्यं तत्पुरुषस्योत्तरपदलिंगग्राहकतया टापो दोर्लभ्य प्रसंगादित्याहुः। गत्यादिसूत्रेण
प्राप्तिकर्मभावस्य पानिषेधः। यथा गतिविशेषतया पारवाचितया गत्यर्थयोर्निवहृत्योरशनार्थयोरादिखाद्य

प० वा० र० रहिंसार्थस्य नक्षेरकर्मकस्य शब्दापत्तेश्च। तेन नाययति वाहयति भारं भृत्येन। अदयति खादयति यानं बटुना।
९४ शब्दाययति सैंधवैरित्यादयः प्रयोगाः स्वरूपपदाः। भक्षयति बलिवर्दान्सस्यमित्यादौ तु भक्षिर्हिंसार्थः क्षेत्रव
र्त्तिसस्यानां प्राणित्वात्। नियंतृकर्तृकस्य वाहेरप्रतिषेधः। नियंता पशुप्रेरकः। तेन वाहयति रथिनं वाहान्सू
तः। वाहयति गोणीं बलिवर्दान्वणिक् इत्याद्युपपन्नं। क्वचिदुभयोरप्यकर्तृकर्मसंज्ञयोर्विकल्पः। यथा हा
रयति कारयति दर्शयते। अभिवादयते वा पिता पुत्रेण पुत्रो वेत्यादिप्रयोगात्। कारिहार्योस्तु तयोश्चाभि
वादिदृश्योः। आधारोधिशयत्यादेः कर्मत्वं न द्वितीयया। कर्तृसांतरआधाराधेयभावोनुभाव्यते। अधि
शेते। धितिष्ठत्यास्ते ध्यास्ते भिनिविशते उपवसत्यनुवसत्यधिवसत्यावसति वा जनपदमित्यादौ द्वितीया
सप्तमी वा कर्तृद्वारकं दैशिकविशेषणतासंसर्गावच्छिन्नं वाधिकरणत्वमाधेयत्वं वाभिधत्ते न तत्र चानुश राम
सनिकमाधारस्य कर्मत्वं। यत्र पुनरभोजनार्थ उपवसिस्तत्र वने पुपवसतीत्येव प्रमाणं। एकादशीमुपव ९४

सेद्द्वादशीमथवा पुनरित्यादौ नाभोजनमुपवसेरर्थः किंतु दोषादुपावृत्तस्य गुणैः सहवासः उपावृत्तस्य दोषे
भ्यो यस्तु वासो गुणैः सह। उपवासस्स विज्ञेय इत्यार्षपरिभाषणात्। कर्माणि देशकालाध्वभावाः स्युर्गतक
र्णां। आधाराधेयतो धातुद्वितीयावात्र भाष्यते।। अकर्मकधातुनायोगे देशादीनां कर्मेति संज्ञा।। देशो जनप
दः कुरुपांचालादिः। कालः कालावयवत्वेन परिभाषितः। प्रहराहोरात्रमासादिः। अध्वा क्रोशगव्यूतियोजना
दिर्गंतव्यः। भावः क्रिया तत्र कुरूनस्वपिति क्रोशमास्तइत्यादौ सैकसंसर्गावच्छिन्नो मासमास्ते गोदोहंतिष्ठ
तीत्यत्र कालिकसंसर्गावच्छिन्नआधाराधेयभावो धातोरत्र फलविधयार्थः।। न त्र कर्त्रादि देशादिनिरूपि
तो द्वितीयार्थ इति केचित्। आधाराधेयभावे धात्वर्थान्वयिनी द्वितीयानुशिष्यते। अथ एवं पृथक्पृथगनुशा न
सनमर्थवदितरथा कर्तुरीप्सिततममित्यनेनैव कर्मसंज्ञासिद्धेस्तद्वैयर्थ्यात्।। कर्मसंज्ञा तु मासमास्ते मासआस्य
नइति कर्मणि सुप्तिङोरुपपादनायेत्यपरे तन्न विक्रियाजन्यविक्लित्त्यधिकरणत्वसतीति तत्प्रचिक्रियान

प० वा० र० धिकरणत्व॥तस्यचिक्रियाकर्मत्वंतदेकवचकर्मपदस्यप्रवृत्तिनिमित्तं॥तादृशकर्मत्वमुपलक्षणीकृत्यद्विती
५५ याप्रतिपाद्यत्वंकर्मणिद्वितीयेतिसूत्रेणप्रतिपाद्यते॥तत्रचात्मेपचतीत्यत्रपचेर्व्यापारमात्रेद्वितीयापाः
फलककृत्तिरर्थः॥तत्रचआधाराधेयभावनानास्यान्वयइत्यनननन्यलभ्यकमपुत्स्यपदत्वेविषयः॥भिधेय
त्वतुल्यार्थानामपिशब्दानामन्वयविशेषबोधानुकूलाकांक्षा॥तथाहिद्वितीयैवधातुमाकांक्षतिनतुकर्म
पदं।समुच्चिनोतिधातुरेवपांशुसमुच्चिनोतीत्यादौद्वितीयामाकांक्षति।नसमुच्चयार्थोपिचकारादिः॥
यत्नार्थकं॥करोतिरेवनपतिर्ज्ञानार्थकोजानात्यादिरेवनत्वेतिरिच्छार्थकोवस्यादिरेवनरंजिर्द्वितीयामा
कांक्षतिद्वि।तीयार्थप्रकारकप्रत्ययार्थविशेष्यकबोधोस्वसमभिव्याहृतपदविज्ञानस्यकारणत्वमित्सनया
रीत्यायोधातुराकांक्षाप्रविषःसएवसकर्मकइत्युच्यते॥नतुव्यापारव्यधिकरणफलवाचकधातु राम
त्वं॥सकर्मकत्वप्रयोजकमित्येके।नव्यापारमात्रंधात्वर्थस्त्यजिगम्योपर्यायपत्तिप्रसंगात्॥किंतुफल ५५

मपि॥तथाचधात्वर्थफलान्वयिआधेयत्वंद्वितीयार्थइत्यपरे।फलमात्रंधात्वर्थस्तदन्वय्याधेयत्वमधिकरण
त्वं॥वाद्वितीयार्थइतिमंडनः॥सर्वतमेपियावदप्राप्तंफलमाधेयत्वंवातावदेवद्वितीयाप्यनित्याधारत्वस्य
प्रकृत्येवलाभात्॥एवंचानभिहितइत्यधिकारस्यायमर्थः॥यस्यदसमभिव्याहृतद्वितीयांविनापितत्कि
याकर्मत्वंतस्यदाप्सतिपाद्यते॥तत्पदाद्वितीयानप्रयोक्तव्या॥निराकांक्षत्वात्॥एवंचोक्तार्थानामप्रयोगइ
तिन्यायस्यैवानुवादः॥तत्रकर्माभिधानमाख्यातसमासव्ययतद्धितैः॥कत्ताचतदभावेतुद्वितीयावत्ति
कर्मता।पच्यतेओदनइत्यत्रपाककर्मत्वंवाख्यातेन॥प्राप्तोदकोग्रामइत्यत्रउदककर्तृकप्राप्तिकर्म
बहुव्रीहिणा॥नारदइत्यबोधीत्यत्रनारदकर्मकत्वंनिपातेन॥शत्यत्रशतकरणकक्रयकर्मत्वंतद्धितेन॥पक्व
ओदनइत्यत्रपाककर्मकत्वापदांतरसहकृतेनप्रत्ययेनते॥तत्रनद्वितीयाकिंत्वोदनंपचतीत्यादौ॥नन्वेवं
कृतपूर्वंकिटमित्यत्रक्तप्रत्ययेनकर्माभिधानात्॥कटमितिद्वितीयानुपपत्तिः।अन्यथाकृतःकटाक्ष

३

१० वी०र० तपूर्वइत्यत्रापिद्वितीयाप्रसंगात्। एवमिष्टिसुरानधीतिविदानित्यादौनिष्ठाभिहितकर्मणिद्वियानुपपत्तिः॥
९६ पूर्वादीनिः सपूर्वाच्च॥ इष्टादिभ्यश्चेतिसूत्रेणकर्त्तर्यभिहितइति॥ श्राद्धमनेनभुक्तमिनिरणाविल्यतोनेने
त्यनुषंगादितिचेत्॥ उच्यते॥ कटंक्षि कर्मनादात्म्यान्वयायोगात्कृतादितः॥ द्वितीत्यत्र धातुव्यपेक्षाकृत
पूर्विणि॥ कृतपू। र्वीकटमित्यत्रक्तप्रत्ययेनकर्मणोभिधानेपिकटकर्मनाद्यत्यंनप्रतिपादयितुंशक्यते॥
कृतकटपदार्थयोस्तादात्म्यान्वयेतत्रस्यसमानविभक्तित्वस्याभावात्॥ सविषणकृतशब्दस्यवृत्त्यनुप्रवे
शानुपपत्यन्तेश्च॥ सविशेषणानांवृत्तिर्नैतिकात्यायनस्मरणादतः कृदन्तावच्छेदेनकृततादात्म्यान्वयबो
धस्यकर्मार्थकेनापिकृतपदेनानुपपादनात्॥ कटपदसमभिव्याहारेणाद्वितीयोत्पत्तिःकावारयिता॥ कृ
तपू। र्वीकटमित्यत्राश्रयइतितद्धितार्थः॥ तत्रकर्त्तृधात्वर्थस्यप्रत्ययस्यभावनायावान्वयः॥ भावनायां रामः
चनिष्टपात्तंकर्मद्वितीयोपात्तकर्मत्वंचविशेषणत्वेनान्वेति॥ वृत्त्यनुप्रविष्टस्यकृतोधात्वर्थविशेषण ९६

स्यार्थबोधकत्वस्यव्युत्पत्तिसिद्धत्वात्॥ अतएवप्राप्तोदकोग्रामइत्यत्रोदकंतादात्म्येनकर्त्तरिकर्त्ताचप्राप्तौ
साचबहुव्रीहिसमुदायवाच्येचरमावयवलक्ष्येवाकर्मण्यन्वेतीत्युदककर्तृकप्राप्तिकर्मग्रामइत्यन्वयबोधः
माह्वास्त। कारकाणांप्रत्ययार्थभावनायामेवान्वयोनधात्वर्थेगुणानांचपरार्थत्वादसंबंधः समत्वात्स्यादि
तिन्यायात्कृतपूर्वीत्यत्रभावनातद्धितार्थः सचकृतिरेव। तस्यांद्वितीयापात्तकर्मत्वान्वयः॥ अतएवकर्त्त
कर्मणोः कृतीत्यत्रतद्धितार्थकर्मत्वेषष्ठीप्रसंगवारणायकर्तृग्रहणमप्युपपद्यतइ। साकृः। तन्नि। एवं
सतिकृतमित्यत्रापिप्रत्ययार्थभावनाकर्मैवाभिधीयेत। अन्यथानेनकृतमित्यत्रकर्तृत्वस्याचयानुप
पत्तेः नचतद्धितार्थस्यकर्त्रर्थस्यवाकृतेर्भेदो। नापिपदस्यैदाक्तमभेदः। किंतुक्रियाभेदात्। नचतत्कृति
तयोसत्याश्रयः। कर्मानभिहितमितिकिमुपकृतंकृतेस्तद्धितार्थत्ववादेन। किंचैवंतद्धितार्थभावनायाम
पिकारकान्वयस्वीकारेकृतपूर्वीत्यादावविपूर्वीत्यत्रापिकर्मान्वयप्रसंगः। पूर्वादितिसूत्रेणापिकर्त्तरि

प०वा०२० तिप्रत्ययोपात्तायांप्राणिकरणकरत्वादिरन्वयसंभवात्। पाणिनाश्नातीतिप्रयोगप्रसंगः। ततः कृतपूर्वी
९ करमित्यादौ धात्वर्थएवकटकर्मकत्वान्वयस्तदाश्रयमात्रंतद्धितार्थः। एवमधीतीवेदानित्यादावपिक्तप्रत्य
यार्थआश्रयउभाभ्यांस्वरूपेफलेतत्प्रयोजकतयाध्ययनव्यापारेसचतद्धितार्थंकर्त्तरिसंबध्यतेउत्पत्तिस्व
रूपेफलेवेदोधीदौकरणकत्वस्यद्वितीयार्थस्याप्यन्वयः। आश्रयात्तत्रिवेदाश्रितेत्यन्वयबोधसंभवात्। प्र
कारांतरेणवेदवृत्तित्वान्वयस्यासत्त्वात्संभवित्वेनानभिधानसत्वाद्धितीयोत्पत्तिः। कर्तृकर्मणोःकृति
त्यत्रकृत्पदंकृदर्थविशेषणक्रियापरं। प्रकृतेचक्रियानकृदर्थविशेषणमपितुतद्धितार्थइत्यतोनषष्ठी
अतएवाख्यातार्थंप्रतिधात्वर्थस्यप्राधान्यमितिवैयाकरणमतेतिङ्प्रत्ययार्थविशेषणत्वाभावात्क्रि
यायानकृद्योगेषष्ठीसंगः। शतृशानजादेशलादेशेनलोकाव्ययनिष्ठेत्यादिसूत्रेणकारकषष्ठीप्रतिषेधा राम
त्रोदनस्यपचन्नित्यादिप्रयोगप्रसंगइति। कृद्ग्रहणमनर्थकमितिनिरस्तायत्तुकर्तृकर्मणोःकृतीति ९

सूत्रेकृद्ग्रहणेनज्ञाप्यते॥ कृतपूर्वीकटमित्यादावभिहितेपिकर्मणिद्वितीयेतितन्निंत्यांइतिकारकद्विती
याविवरणे। अकारकद्वितीयार्थोनामार्थनापिसंगतः। यथानुशासने। तस्यव्यवस्थापनमिष्येतेउभ
यतः कृष्णभद्रांसंकर्षणवासुदेवाविसत्रोभयशब्दस्यपार्श्वद्वयंतत्सित्वावृत्तित्वंकृष्णभद्रापदसमभिव्या
हृतद्वितीयायाः पार्श्वन्वयिसंबंधित्वमर्थस्तथा। चकृष्णभद्रापार्श्वद्वयवृत्तिवासुदेवसंकर्षणाविसन्वय
बोधः। नाम्नैद्विधैवसंबंधःसर्ववाक्येव्यवस्थितः। सामाधिनोकरण्येनषष्ठ्यावापिकाचिद्भवेदितिषष्ठी
पदेषष्ठ्यपवादिकविभक्तीनामप्युपलक्षकं। पार्श्वपदेनात्रपंचरारश्मांसमूहोनाभिधीयतेकिंतु
तत्संनिहितोदेशः। एकपार्श्वायाधिकद्वितीययापार्श्वनिरूपितपरत्वाधिकरणदेशइतियावत्। तेनायं
पृष्ठयोःपार्श्वद्वयवुत्यातंयोर्मुदासः। दक्षिणपार्श्वदेशात्कृवामपार्श्ववधिकदक्षिणपार्श्वसमवेतापर
त्वनिरूपकदेशिकपरत्वात्। वामपार्श्वाद्दक्षिणपार्श्वमपेक्ष्यपरोयंदेशइतिप्रतीतेः। सर्वतःकृष्णंगोपा

इत्यत्रसर्वपदंसर्वदिक्परं।यन्निमित्तेतसिद्धिं दिगन्वयिसंबंधित्वंद्वितीयार्थः।कृष्णस्यदिक्षुगोपाइत्यन्वयबो
धः।धिक्शाकानित्यत्रधिक्शब्दस्यनरकानुबंध्याचारोजुगुप्सानामद्वेषविशेषोगर्हाद्वितीयायावृत्तित्वविषयत्वं
वार्थः।तथाचशाकवृत्तिर्नरकाचारःशाकविषयिणीजुगुप्सावावाक्यार्थः।धिगस्तुनक्षमात्तरलंभवनमनइत्यत्र
मनइतिद्वितीयांतंधिगित्यस्तिक्रियाकर्तृधिगितिवामनसानवंधाते।किंतुक्रियया।तथाचजुगुप्सितसत्ताव
द्भवनमनइत्यन्वयबोधः।धिक्मूर्खंत्यत्रमूर्खसंबोधिकाजुगुप्सेत्यन्वयबोधः।संबाध्यत्वस्याक्षितभवतिपदा
र्थेनान्वयाद्भवनएवधिगितिसंबध्यतइतिकेचित्।उपर्युपरिलोकमधोधश्चेद्रमध्यधिगगनंरविरित्यत्रोपरि
पदस्यभूगोलावधिकंवायुगोलावधिकंवाउपरत्वंतदधिकमपरत्वंतदधिकरणदेशोर्थः।तदन्वयित्ववृत्तिपरत्व
निरूपकत्वंद्वितीयायाःएवमधःपदस्यभूगोलावधिकमपरत्वंतदधिकरणदेशोवार्थःतदन्वयित्वनिष्ठपरत्वनिरू राम
पकत्वंतुद्वितीयायाः।एवमधिशब्दस्याधेयत्वंवायुमोलार्थकगगनपदसमभिव्याहृतिद्वितीयायानिरूपकत्व ९८

मर्थः।तथात्रध्रुवाद्यवधिकस्यभूगोलसमेवेतपरत्वनिरूपितस्यापरत्वाधिकरणंतदाधिकरणदेशवृत्तिर्वाभू
गर्भावधिकस्यचंद्रनिष्ठपरत्वनिरूपकस्यापरत्वस्याधिकरणंतदाधिकरणंदेशवृत्तिर्वागगनन्निरूपिताधेयता
रविरित्यन्वयबोधः।उपर्युपरिबुद्धीनीजरंतीश्वरबुद्धयइत्यत्रोपरिबुद्धीनामुन्नतानमतीनासुपरीत्यन्वयादुपरि
शब्दस्यानाम्नोडितत्वान्नद्वितीया।उपर्यध्यधसःसामीप्यइत्यनेनविहितेसामीप्याभिव्यंजकेद्विवचनेद्विती
यावीप्साद्विर्वचनेतुषष्ठ्येवेतिपुनरभियुक्ताः।एतासामुपपादद्वितीयानामर्थानामार्थेनिसहमंगताउनुशास
नबलाशतथाहिस्मर्यते।उभसर्वतसोःकार्याधिगुपर्यादिषुत्रिषु।द्वितीयाम्रेडितांतेषुततोन्यत्रापिदृ
श्यतेइति।धिगिति प्लुप्तसप्तमीकं।अन्यत्रस्तोकंपचतीत्याद्येक्रियाविशेषणे।एवंसर्वतःपर्यायियोरभितःप
रितःपदयोःसमीप्यार्थकयोःसमयानिकषायोगेद्वितीया।शोकाविययुक्तोन्धरोद्वेषविशेषः।तत्रालंबनत्वेनवि
षयत्वंद्वितीयार्थः।हासाधूनित्यत्रसाधुविषयकोविषद्वेषइत्यन्वयबोधः।हीरामहादेवरतातमानरक्षिदो

प०म०र० हापदार्थैकदेशोकेनरामदेरतादेर्विनाषयत्वेनान्वयः। किंतुसीतायाःस्वविषयंदृष्ट्वेहापदार्थैरामसंबोध्यफलत्वस्य। प्रत्य
९९ पसर्गपूर्वकस्यधातोर्योगेद्वितीया। माणवकंप्रतिभांतिवेदाइत्यत्रज्ञानविषयत्वंधात्वर्थः। विशिषशब्दस्यधातोःखंड
च शःफलावाशैकत्वादकर्मकत्वं। तत्रज्ञानेपदार्थैकदेशेमाणवकसमवेतत्वान्वयान्माणवकसमवेतज्ञानविषयावेद्
इत्यन्वयबोधः। ज्ञानमात्रंप्रतिष्ठातेरर्थः। फलावाचकत्वादयमकर्मकः विषयत्वमाख्यातार्थइत्यपिवदंति। परत्व
निरूपितयरत्वद्ध्यंतदधिकरणदेशोवांतरापदार्थः। म ग्धान्विदेहानंतरागंगेत्यत्रद्वितीययोःसमवेतत्वमव
धित्वंचार्थः। तथाचमगधावधिकेनमगधवेतेनविदेहावधिकेनविदेहसमवेतेनचपरत्वेनप्रत्यकंनिरूपितंयदप
रत्वद्वयंतद्वतितद्देशोवर्तिर्वागंगेत्यन्वयबोधः। क्वचिदप्राप्तिरंतरापदार्थः। तद्योगेपिद्वितीयैवप्रमाणं। प्राप्तिरपि
ज्ञापनंगमनंचेतिद्विधा तथाहि। अनुरागमयेनभूयसामधुरेपिरसेनकोगुणः। प्रियसंगमभूमिरंतरायदिविछि राम
न्नपदासरस्वतीत्यत्रभारत्याअनुरागप्रकृतिकेनापिभूयसाशृंगाररसेनकोगुणायदिप्रयोगःसंगमपर्यंतमज्ञाप ९९

यित्वामध्येविच्छिन्नप्रबंधाचित्रांगदाचरितकथासरस्वतीनिप्रकृतमथसरस्वत्यानदीविशेषस्यलौहित्यबहुलेन
भूयसामिष्टेनजलेनकोगुणायदीप्रियस्यसमुद्रस्यसंगममहीमप्राप्यैवविलीनगतिरसावित्यप्राकरणिकमनयो
रुपमाध्वनयप्र। तीयतेएवमंतरेणपदस्याभावोर्थः। तदन्वयिप्रतियोग्यनयोगिभावोद्वितीयायाः। धनमंतरेण
नसुखमित्यादौधनसामान्याभावप्रयुक्तसुखाभाववदित्यन्वयबोधः। द्वितीयार्थप्रतियोगितायाःधनस्याधेयतया
धनत्वस्यचावच्छिन्नत्वेनान्वयाद्धनसामान्याभावलाभः। अभावयोस्तुप्रयोज्यप्रयोजकभवःसंसर्गः। कर्मप्रवचनी
यार्थैर्हेतुत्वादिभिरन्वितः। नामार्थस्तत्रचाकांक्षाद्वितीयाद्योतनयत्वसौ। येषांप्रादीनामुपसर्गत्वमवदेशबाधेन
कर्मप्रवचनीयसंज्ञातदर्थएवहेतुत्वादिः। जपमनुप्रावर्षदित्यत्रजयपदाद्वितीयाजपहेतुत्वसन्वयबोधोपपयिकी
जपानुपदयोराकांक्षामभिव्यनक्ति। विशेषणविभक्तिभिरर्थकेवजपहेतुकंप्रवर्षणंचवाक्यार्थः। कर्मप्रवचनी
योवाद्योतकोथद्वितीयया। हेतुत्वाद्युच्यतेहेतोस्तृतीयातत्रबाध्यते। सर्वत्रवाकर्मप्रवचनीयाएवद्योतकाःद्विती

प०वी०२० यायाएवंहेतुत्वेहेतुमत्वेवाशक्तिः।अतएवजपेनप्रावर्षदितितृतीयाबाधकमनुर्लक्षणेकर्मप्रवचनीयस्तद्योगेद्वितीये
१०० त्यनुशासनमित्यभियुक्ताः।एवमनोरनुसमभिव्याहृतद्वितीयायावासाहित्यरूपस्तृतीयार्थोर्थः।नदीमनुवसितासेने
त्यत्रनद्यासहावसितासंबद्धासेनेत्यन्वयबोधः।अनुहरिमुपहरिंवासुराइत्यत्रानुरूपयोर्हीनत्वमर्थस्तेनहरेर्हीनाःसु
राइत्यन्वयबोधः।वृक्षंप्रत्यभिपर्यनुवाविद्योततेविद्युदित्यत्रचतुर्णांप्रत्यादीनांलक्षणंवाच्यंद्योत्यंवालक्षणंतुद्यो
त्यद्योतकभावादिः।वृक्षवृत्तियोतकतानिरूपकद्योतनाश्रयोविद्युदित्यन्वयबोधः।आलोकांतरसंयोगानुप्रवेशद्
व्यचाक्षुषविषयत्वसंपत्तेरर्थः।तत्रचक्षुर्व्यापाराणामाभिमुख्यादिद्वाराकथंचिद्वृक्षस्यद्योतकत्वं।मुनमभिविकासमुपेयु
षीविलोचनेइत्यत्रविकासःपुरःभागस्तत्रतुनेर्विकासकत्वंद्वितीयार्थः।एवंतत्तत्क्रियासमभिव्याहारेणनानार्थकत्वमनेगौरवाज्ञा
नकत्वेवलक्षणे।वृक्षवृत्तिजनकताकोमुनिवृत्तिजनकताकश्चविकासोवाक्यार्थइत्यपरे।नक्षित्यं।तथासत्यनुर्लक्षणइतिसू राम
त्रप्रणयनवैयर्थ्यात्।एवमित्थंभावाख्यानेपितेचत्वारस्तद्धटकद्वितीयायाःकश्चिद्विषयविषयीभावोर्थः।भक्तोविष्णुंप्रती १००

त्यत्रविष्णुविषयकभक्तिमानित्यन्वयबोधः।कश्चिदुद्देश्यत्वं।तच्चकृत्याजनकेच्छाविषयत्वं।शत्रुमभ्र
तिधावतीत्यत्रशत्रुगोचरनाशादिच्छाप्रयोज्याधावनक्रियेत्यन्वयबोधः।।भागेवाच्येद्योत्येवाप्रति
पर्यनवःकर्मप्रवचनीयाः।नत्वभिर्लक्ष्मीर्हरिंप्रतीत्यत्रहरेःस्वमित्यर्थः।वृक्षंवृक्षमभिसि
चतीत्यत्रवीप्साद्विर्वचनेनकर्मत्वस्यद्वितीययाभिधानाद्वीप्सायांप्रतिपर्यनुभावानाकर्मप्रव
नीयसंज्ञागत्युपसर्गसंज्ञापवादाय।तेनाप्युपसर्गपरत्वषत्वाधभावस्वरूपंफलमुपपाद्यते
मासमधीतइत्यादावधिकरणत्वंद्वितीयार्थः।मासत्वावच्छेदेनाध्ययनाधिकरणत्वस्यान्व
यः।क्रोशंकुटिलानदीत्यत्रक्रोशत्वादिकमध्यपरमाणविशेषस्तदवच्छेदेनचकौटिल्यस्या
प्यन्वयात्युत्पत्तिवैचित्र्यात्।क्रोशत्वव्यापककुटिलत्ववतीनदीत्यन्वयबोधःदेशविधया
कालविधयाचावच्छेदकत्वंद्वि।तीयार्थः।तथाचमासमधीतइत्यत्रमासावच्छेदेनाध्य

प०वा०र० यनक्त्वात्क्रोशंकुटिलत्वंक्रोशावच्छिन्नकुटिलताचप्रतीयतेत्रिचतुरादिदिनमात्राध्ययनादेरधि
१०१ करणात्तुमासेननावच्छिद्यतेकिंतुतदेकदेशेनेत्यपिवदंति॥ ॥इत्युपपदद्वितीयाविवरणं॥
॥श्रीः॥टाभ्यांभिसस्तृतीयानुबंधष्टस्तस्यापुनःतिङादिनानभिहितेःकर्तृकरणमुच्यते॥टाभ्यांभि
स्इतितृतीया।तत्रटकारोनुबंधः।आत्वेनैववाचकता।तस्यस्तृतीयायाःकर्तृकरणं।कर्तृत्वकरण
त्वार्थः।तत्रापिपचतीत्यादावाख्यातेनपाचकइत्यादौकृता।पक्वपूपइत्यादौतद्धितेन।पक्वौदन
इत्यादौसमासेनाभिहितेकर्तरिनतृतीया।उक्तार्थत्वेनप्रयोगानर्हत्वात्।एवमक्षादीव्यतइत्यत्रा
ख्यातेनसाधकतमेकर्मसंज्ञायाःफलतःकरणस्यैवाभिधानात्।पचनेकाष्ठमित्यत्रकृतापक्वौ
दनंकाष्ठमित्यत्रबहुव्रीहिणा।स्नानीयंचूर्णमित्यादौकृत्यनशास्त्रोगोरित्यादौचतद्धितेनाभिहि राम
तेकरणेतृतीयापित्याख्याता।चैत्रेणसूपःपच्यतइत्यत्रविक्लित्यनुकूलःप्रयत्नःपचेरर्थः।आश्र १०१

यस्तृतीयायाः।अश्रयेत्तादात्म्येनान्वेत्रःआश्रयःसमवेतत्वेनप्रयत्नएवचप्रधानं।तत्रैवसूपाभिन्नाश्र
यकफलमन्वेति।स्वतंत्रःकर्त्ताकर्तृकरणयोस्तृतीयेतिसूत्राभ्यांतृतीयायाःआश्रयवाचकत्वानुशास
नात्।स्वतंत्रोहिधातूपात्तव्यापाराश्रयःतथाचतद्धातूपात्तव्यापाराश्रयबोधिकात्तद्धातुसाकांक्षात्तृती
येतिसूत्रयोरेकवाक्यार्थः।तत्तद्धातोरुत्पादनस्यचशाब्दबोधाविषयत्वाद्व्यापारस्यचधातुनैवलाभा
त्अनन्यलभ्यआश्रयेतृतीयाशक्तिःपर्यवस्यतीतिवैयाकरणाः।आश्रयांशस्यापितृतीयाप्रकृ
तिलभ्यत्वादनन्यलभ्यत्वरूपमाश्रयत्वमाधेयत्वेवाप्रयत्नस्यचधात्वाद्यर्थत्वाभावेसएवतृतीया
र्थः।अतएवपाकंकरोतीत्यादौधात्वर्थबहिर्भावेकृतोर्निवेशः।शेषमाख्यातविवेचयिष्य
तेइतितार्किकाः।पच्यतइत्यत्रापिपाकःक्रियतइतिकृञा।विवरणं।कर्मलकारस्यपिप्र
वृत्त्यादिस्वरूपाभावेनैवार्थः॥ तदन्वयिकर्तृत्वमखंडतृतीयार्थः। अन्यथादंपत्योर्म्या

प० वा० र० सज्ज्यवृत्तिकर्तृत्वमनुपपन्नं स्यादिति मीमांसकाः। तत्र तार्किकमतमनुसृत्य कर्तृतृतीया विवि
१०२ च्यते॥ ॥ प्रवृत्तिविषयप्रकारिप्रतियोगिताः। तत्तद्धातुव्यपेक्षिण्या प्रतीयं तेन तृतीयया॥
चैत्रेण गम्यते उच्यते इत्यादौ प्रयत्नस्तृतीयार्थः स च समवायेन चैत्रविशेषितः साध्यत्वयाम
मते वचने च विशेषणं। रथेन गम्यत इत्यादौ वृत्तिराधेयत्वं। तेन स्वध्वनेरुच्यते प्रतिभायते प्रका
श्यत इत्यादौ विषयविषयिभावः। इच्छामात्रार्थकयोः स्वदतिरोचत्योः ज्ञानमात्रार्थकयोः प्रतिभा
त. तिप्रकाशत्योः विषयित्वार्थककर्तृप्रत्ययेनैव सहसाकांक्षत्वात्। तेन प्रतिबिंबित इत्यत्र प्रकारप्र
कारिभावः प्रतिहतचक्षुर्जनितभ्रमार्थकप्रतिबिंबतोः प्रकारित्वार्थककर्तृप्रत्ययस्यैव सत्व
पेक्षत्वात्। नहि मुखं प्रतिबिंबत इतिवदादर्शे प्रतिबिंबित इति प्रयोगः तेन तस्य त इत्यत्र प्रतियो राम
ग्यनुयोगिभावः। अत्र प्रयत्नत्वं जातिः। तृतीयाप्रवृत्तिनिमित्तं। लाघवादन्यत्र लक्षणा। यदि चाधे १०२

यत्वमखंडं तदा तद्विशेषे शक्तिरेव। तेन धातुना च तत्तदर्थबोधोपयिकी तृतीयाकांक्षाभिधीयते॥ ॥ व्या
पारसहितो हेतुः फलेनोपहितो वा॥ करणं तत्र सुबाच्यो व्यापार उपधेयता॥ ॥ सव्यापारं करणं। व्या
पारश्चाधिश्रयणादिः। क्रियाजनकतावच्छेदकधर्मत्वेनोपलक्षणेनानुगतेन प्रवृत्तिनिमित्तेन करणप्र
त्ययनप्रतिस्वमुपस्थाप्यः। तथा च यदाधिश्रयणादिस्वरूपा व्यापारो धातुनोपस्थाप्यते तदाधिश्रितस्य
कर्तृत्वं। यदि च धातुनापि धीयते विवक्ष्यते च धात्वर्थजनकतया तदा स्थाल्यादिसर्वोपि कारकगणः कर
णमेव यदाहुः। क्रियायाः परिनिष्पत्तिर्यद्व्यापारादनंतरं। विवक्ष्यते यदा यत्र करणं तत्तदा स्मृतं। वस्तुतस्त
दनिर्दिश्यं न हि वस्तु व्यवस्थितं। स्थाली पच्यत इत्येषा विवक्षा दृश्यते यत इति। तथा च काष्ठेन पच्यत इत्यत्र का
ष्ठे निष्ठव्यापारजन्य एकाधिकरणकविक्लित्तिजनकः पाक इत्यन्वयबोधः। तदाश्रयव्यापारोभयं व्यापारमा
त्रे वा तृतीयार्थः। काष्ठव्यापारयोराधाराधेयभावो व्यापारपाकयोश्च जन्यजनकभावः संसर्गः। यथानुभवेन

प०वा०र० स्मरतियोगेनस्वर्गंगच्छतिचक्षुषापश्यतिश्रोत्रेणशृणोतीत्यादौतृतीयार्थेषुसंस्कारापूर्वसन्निकर्षेषुशब्द
१०३ धनुभवयोगचक्षुःश्रोत्राणांजन्यत्वंसंसर्गः।क्वचिदाधाराधेयभावः।चिकीर्षयाप्रवर्ततेतदापरामर्शेना
नुमिमीते।शब्देनशृणोतीत्यादौप्रत्यासत्तौस्फुटश्चिकीर्षापरामर्शशब्दानांसमवायस्तृतीययोपात्तःआधा
राधेयभावेनप्रकृत्यर्थविशेषितःप्रकृत्यनुमितिश्रावणेषुजन्यजनकभावेनान्वेति।सर्वत्रव्याकरणतृती
यार्थप्रकृत्यर्थस्यजन्यजनकभावसंसर्गेणैवान्वयः।चिकीर्षयाप्रवर्ततइत्यादौहेतौतृतीयानतुकरणे
दंडेनघटइतिवद्वैयाकरणाः।अनुमानीयःपरामर्शइत्यत्रकर्मप्रत्ययाअपिसाधवः।अक्षादौक
र्मकरणोभयसंज्ञासमुच्चयः।स्मरतितावत्पाणिनिर्दिवःकर्मणिचेतिसूत्रं।दिवःसाधकतमंकरणं
कर्मचसंज्ञायतइतितदर्थः।संज्ञाद्वयसमावेशार्थकश्चकारः।अतएवमनसादिवइत्यत्रमनसःकर राम
णसंज्ञाप्रयुक्तातृतीया।कर्मसंज्ञयाचकर्मोपपदप्रयुक्तोणप्रत्ययः।मनसःसंज्ञायामितित १०३

तीयायाअलुक्।एवंस्थितेतिदिव्यतेःकरणत्वमभिदधतोद्वितीयातृतीयाचसाधुः।अक्षैरक्षान्वादीव्यतीत्यत्रदीव्यतेः
क्रीडासुखसाधनव्यापारोर्थःतत्रचाक्षाःकरणत्वेनान्वयंति।तेनाक्षकरणकसुखसाधनक्रीडनव्यापारोवाक्यार्थः
यत्तु।दिवःसाधकतमेकरणसंज्ञाप्रयुक्तकार्येदेवनोक्षइत्यत्रल्युट्कर्मसंज्ञाप्रयुक्तंत्वक्षाद्दीव्यंतइत्यत्रलः।अ
क्षैर्दीव्यतीत्यत्रोभयसंज्ञाप्रयुक्तकार्यप्रसक्तौपरयाकरणसंज्ञयाकर्मसंज्ञाप्रयुक्तंकार्यंवाप्रतिषिध्यते।तस्मात्
अक्षान्दीव्यतीतिनप्रमाणमितिनिरस्तं।एवंदिवःकर्मचेतिसूत्रेचकारवैयर्थ्यप्रसंगात्।ऐच्छिकविकल्पेनकार्यद्वयोप
पादकत्वेचकारसार्थक्यात्।व्यवस्थितविकल्पस्यसंज्ञाद्वयविधानबलादेवसिद्धेः।अक्षासादीव्यंतइत्यत्रदेवनसाध
कतमत्वमाख्यातेनाभिहितमितिनतत्करणतृतीया।कथयत्येवंसंज्ञः।कर्मणिकर्मतायत्रदानप्रकृतिकेनयच्छति
नाअधर्मसाधनंसुपस्थापितं।तत्रचतुर्थ्यर्थसंप्रदानतातृतीयाकथयत्येवसंज्ञः।कर्मणिकर्म+नवादेवनाअक्षाइत्यत्र
कर्मणिद्वितीयाप्रसज्यतेल्युट्उक्तार्थकत्वात्।अधर्मसाधनेदानेदाणोर्थेसंप्रदानता।तृतीया+तेनदास्याधर्मंयच्छ

प॰का॰र॰ तदृत्यादौदासीसंप्रदानं वाक्यार्थः। न पुनरिहाधर्मसाधनत्वमपि ज्ञाद्बुद्धिविषयः आक्षेपलभ्यत्वात्। सयच्छत इति तु
१०४ दाणश्च सा चेच्चतुर्थ्यर्थे इत्यनुशासनेन संपूर्वकाद्दानेः आत्मनेपदं प्रयोज्यं यदि स्यात्तृतीया चतुर्थ्यर्थ इत्यर्थकेन सिद्धं। र
वं संपूर्वकस्य ज्ञानार्थकस्य कर्मणि विषयतास्वरूपे कर्मत्वप्रति तृतीयायाः द्वितीयायाश्चार्थः। पित्रा पितरं वा संजा
नीत इत्यत्र पितृविषयकमवेक्षणं वाक्यार्थः संजानीत इति संप्रतिभ्यामनाध्याने इत्यनुशासनेन संपूर्वकात् प्रतिपूर्वकाच्च
आत्मनेपदं भवति। यद्यध्यानं स्मरणं न संज्ञार्थ इत्येकेन सिद्धं आध्याने तु मातरं मात्रा वा संजानातीत्येव प्रमाणं। केचित्तु अप
ध्याने मातरं मातुर्वा संजानातीत्येव साधुः न तु मात्रेति तृतीयायाः परया षष्ठ्या बाधात्। अत एव पितुः संज्ञानमित्यादौ कृद्यो
गषष्ठ्या तृतीयायाः बाध इत्याहुः। न क्षितं। इति कारकतृतीयाविवरणं। प्रकृत्यादिगणाज्ज्ञातात्तृतीया तु नदात्मिका। अव
च्छेदकतावृत्तिप्रकारत्वादिर्तासति। प्रकृत्यादिभ्यो विहिता तृतीयाऽवच्छिन्नतादात्म्यमभिधत्ते यथा प्रकृत्या चारुरित्यत्र सु
खजनकसाक्षात्कारविषयधर्मवान् चारुपदार्थः। चारुपर्यायाएवाभिराम हृद्य सुंदर मंजुलादयः मनोभिराम नयन राम १०४

भिराम इत्यादौ पदार्थैकदेशे सुखजनकसाक्षात्कारे नयनजन्यतादात्म्यान्वयः तावदाश्रयमात्रवृत्त्यधिकरणानिष्ठाभावाप्रति
योगिस्थूलकालावच्छेदेन स्वाश्रये वर्तमानस्यात्यंताभावस्याप्रतियोगिवा धर्मः। प्रकृतिरित्युच्यते। सतो जातिरीश्वरस्य सार्व
ज्ञं जलस्य शैत्यं पृथिव्या गंधो गुणस्य द्रव्यसमवेतत्वं प्रकृतिरिति प्रयोगात्। उत्पत्तिक्षणे शैत्याभावो जले। पाकक्षणे गंधाभा
वः पृथिव्यां। समवायिनाशक्षणे द्रव्यसमवेतत्वाभावो गुणे। विद्यमानोपि न स्थूलकालावच्छेदेन विद्या ब्राह्मणानां स्वरः ख
रस्यासेयो गोः द्रव्यस्याकर्म मूर्तस्य। प्रकृतिरित्यादौ जात्यादि प्रकृतिसादृश्यादभिक्षगमनुरतेः प्रकृतिपदं गौणं। चारुपदार्थैक
देशे निरुक्तधर्मे तादात्म्यं प्रकृतिप्रकृतिकर्तृतीयार्थः। प्रकृत्यभिन्नचारुत्ववानित्यर्थः। नाम्ना सुतीक्ष्णश्चारितव्रतोऽयत्र
सुतीक्ष्णपदं सुतीक्ष्णपदबोध्यलाक्षणिकं। नामवाचकं। चारितमाचारस्य सफलस्य विषयः। तथा च वाचकाभिन्न सुतीक्ष्ण
पदबोध्याय माचारविषयाभिन्नदमवानित्यन्वयबोधः। सुतीक्ष्णपदप्रयोगार्थेन दक्षस्य विरोधस्तत्प्रन नीयान श्रोतः। सु
रथो नाम राजाभूदित्यत्र नामेत्यव्ययं। ततो लुप्तात्तृतीया। नामाभिन्न सुरथपदबोध्यो राजाभूदित्यन्वयबोधः। नामेति सं

भावनार्थकमभ्युपेयंवा। गोत्रेणगार्ग्यइत्यत्र पुरुषारंभकत्वलभ्यत्वंगोत्रपदार्थः पत्न्यांसागोत्र्यव्यपदेशोगौणः। गार्ग्यप
दार्थैकदेशोगर्गापत्यत्वंगर्गारंभकभुक्तावयवपरमाण्वारभ्यत्वमितियावत्। तत्रगोत्रपदार्थान्वयः। धान्येनधनीत्यत्र
धान्याभिन्नधनवानित्यन्वयबोधः। जात्याब्राह्मणइत्यादौस्वरूपेणोपस्थितेपिब्राह्मणत्वेतादात्म्यान्वयानानुपप
न्नः। ब्राह्मणपदंवापुण्यप्रयोज्यजातिमत्परं। पृथिवीजलयोर्द्रव्यत्वेनसाधर्म्यमित्यादौप्राधान्येनोपस्थितेपिपदार्थे
पदार्थांतरतादात्म्यंबोधयंतीतितृतीयादृश्यते। नपरंपदार्थैकदेशत्वापन्नएवमर्घादिक्रियासपर्ययापृथपर्यपूपुजत्। वाज
पेयेनयजेतेत्यादौक्रियायांप्रातिपदिकार्थतादात्म्यमपितृतीयाबोधयति। विशेषणांतरविशेषितसपर्यायाःपूजात
दात्म्यान्वयेननिराकांक्षत्वं। प्रमानुभवइतिसहप्रयोगदर्शनात्। यथार्थानुभववाचिकोहिप्रमाशब्दः। अतएवजग
दमधुरंवाचंविशदाक्षरशालिनींइत्यत्रवाचमितिक्रियाविशेषणमुपादायमधुरत्वादिविशेषणावच्छिन्नवाचस्तादा
त्म्यंस्यगदधात्वर्थफलेऽन्वयेपिसाकांक्षत्वात्। वाक्शब्दस्याजहल्लिंगतयाक्रियाविशेषणत्वेपिक्लीबत्वासंभवादि रामः १०५

तिवामनः। प्रकाशाकारोपितशापुष्टार्थत्वमेवोदाजहार। नत्वभवन्मतयोर्ग। मधुरंजगादेत्येतावतैवगदधात्वर्थफलेमधु
रतातादात्म्यान्वयेपिमधुरवाकृतादात्म्यस्यार्थप्राप्तोआक्षेपलभ्यस्यपदेनाभिधानादपुष्टार्थमर्थः। आकांक्षाविरहेत्वभवन्म
तएवयोगएवस्यात्। एवमर्थादीनापर्यपृथुजादित्येतावतैवसामंजस्येसपर्येत्यपुष्टार्थस्यान्नतुनिराकांक्षमितिदिक्। स
मर्पयतिकरणानुवादिकाधात्वर्थस्यभावनायाकरणत्वेनान्वयादितिभाष्यकृतः। क्वचित्तृतीयायाः। अवच्छिन्नत्वमवच्छेदक
त्वार्थः तेनवह्नित्वेनवह्नेः कारणत्वंकार्यत्वंप्रतियोगित्वंप्रकारत्वंविशेष्यत्वमित्यादौकारणत्वादिषुवह्नित्ववृत्त्यवच्छेदकता
निरूपकत्वंवह्नित्वनिरूपकावच्छिन्नत्ववत्वंवाबाध्यार्थः। समवायेनरूपवानित्यत्रतुमतुबर्थैकदेशोऽधिकरणतायांसमवा
यावच्छिन्नत्वं। समवायेनध्वंसोनास्तीत्यत्रनञर्थेसमवायावच्छिन्नत्वंप्रकारोव्युत्पत्तिवैचित्र्याच्चयद्वप्रतियोगितयाध्वंसो
विशेषणं। नञर्थेसमवायावच्छिन्नत्वंतद्धटितसंसर्गोपिवतृतीयार्थइत्यर्थात्। समवायावच्छिन्नध्वंसप्रतियोगिताकसंसर्गा
भावोलभ्यते। संसर्गीभूतप्रतियोगितायामपदार्थेपिव्युत्पत्तिवैचित्र्यात्समवायावच्छिन्नत्वंप्रकारइतिस्वतंत्राः। एतेनपदत्वे

प॰वा॰र॰ नघटोनास्तीत्याशरीयत्वेनशृंगग्राहत्यादिप्रयोगाणांप्रामाणिकत्वेनेपिव्याख्याताः।तत्रेदमवछेदकत्वंक्वचिद्धटकतास्वरूपमपिय
१०६ थाधूमत्वेनवन्हिव्याप्तिः वन्हावयःपिंडेनधूमव्यभिचारःवन्हिधूमयोःपर्वतेनसहभावइत्यादौधूमव्यापकवन्हिमद्वृत्तिधूमत्वे
नवन्हिव्याप्तिर्धूमस्य।धूमाभाववद्वृत्तिवन्हित्वादौव्यभिचारोधूमाभाववदयःपिंडस्यवन्हिधूमसामानाधिकरण्यसहभावेपर्व
तस्यचघटकत्वात्।समेनेतिविषमेणागछतीत्यादौकर्तृत्वमधिकरणत्वंदैशिकविशेषणतासंसर्गावछिन्नवृत्तिस्तृतीयार्थः
भूगर्भावधिकतुल्यांतरायस्ययस्यसर्वेवयवाःदृश्याःसदेशाःसमइत्युच्यतेतदितरोविषमः।अत्रसप्तम्यर्थेतृतीया।ननुग
मनस्यसमविषमदेशवृत्तिव्यापारजन्यत्वविवक्षयाकरणेतथासतिसमस्तृतीयायुक्तादित्यत्रसकरणकादित्येवमुनिरवस्य
त्।नतुतृतीयायुक्तादिति।संचरेत्तेरात्मनेपदंस्याद्यदितृतीयासाकांक्षोधातुरित्यत्रार्थेकेननतेनसूत्रेणअहोवहोःकालादनयाग
गनवीथ्याविः।शंकमिवअभ्रंचरावहेइत्यादावाधारेतृतीयात्वमितिसूच्यते।रजतत्वेनपुरोवर्तिनंजानातीछतिकरोतिद्वेष्टीत्यादौ
प्रकारत्वंतृतीयाविशेष्यत्वंधातोःफलविधयाद्वितीयायाःवार्थस्तत्रनिरूपकत्वेननतृतीयार्थस्यान्वयः।लक्षणस्वरूपप्रा राम १०६

माण्यादिभिरनुमानेनिरूपणीयइत्यत्रशाब्दबोधानुकूलव्यापारोनिरूपेरर्थस्तत्।समभिव्याहृतस्यकर्मकृत्प्रत्ययस्यनिरूपण
जन्यशाब्दबोधविशेष्यत्वंवाक्यार्थस्तत्रकृत्यार्थकदेशविशेष्यतायांनिरूपकतयातृतीयार्थस्यप्रकारत्वस्यान्वयःतेनलक्षणादि
प्रकारतानिरूपितायानिरूपणजन्यशाब्दबोधविशेष्यतात्तद्वृत्यनुमानइतिवाक्यार्थबुद्धिः।तत्रविशेष्यतामात्रंकृत्यप्रत्ययार्थः
शाब्दबोधस्यधातुनैवलाभात्।कर्मप्रत्ययोपसंदानेनधातुनाव्यापारविशेषितस्यफलस्याभिधानादितिव्यापारफलयोःपृ
थक्शक्तिवादिनः।अन्येतु।धातुनाफलविधयोपात्तंकर्मप्रत्ययास्तद्रूपेणाभिदधते।तेनशाब्दबोधजनकव्यापारजन्यशाब्दबो
धविशेष्योनिरूपणीयपदार्थइतिमन्यंते।परिछिन्नत्वमपिक्वचित्तृतीयार्थः।द्विद्रोणेनधान्यंक्रीणातीत्यादौद्रोणोगुरुत्वविशेषः
द्विद्रोणमितिपात्रादित्वान्नस्त्रीत्वं।परिछिन्नत्वंक्रयकर्मत्वान्वयितृतीयार्थः।तच्चद्विद्रोणसमवायिद्व्यारंभकपरमाणुत्वसम
नियतायाःसंख्यायाःव्यापकत्वं।तच्चाधारतया।आधारद्व्यारंभकत्वेनवासंसर्गेणावछिन्नंप्रवेशनीयं।तथाचक्रयकर्मत्वंना
मक्रयजनितंस्वत्वंतच्चैकमेवसकलेषुधान्यतदारंभकेषुधान्येष्वेववाभवतिचपरमाणुष्वपिस्वत्वस्वीकारेणसाक्षात्स्वत्ताद्वारासंख्या

प०वा०र० याः कोटित्वादेर्व्यापकं इतरथा तु धान्यमात्रवृत्त्यपि स्वत्वं परंपरया तथेति द्विद्रोणसमवायादि द्व्यारंभकपरमाणुत्वसमनियतायाः संख्या
१०० तत्सजातीयसंख्याव्यक्तिं प्रति साक्षात्परंपरया व्यापकस्य धान्यवृत्तेः स्वत्वस्य जनिकात्र यत्किंचित्येत्यन्वयबोधः। एकदेशिनस्तु। द्वाभ्यां द्रो
णाभ्यामारब्धं गुरुत्वांतरं द्विद्रोणं तत्समवायित्वं धान्यान्वयित्तृतीयार्थः। एको धान्यराशिरिति प्रतीत्यतिरिक्तस्य राशेस्तत्र तत्र द्रोणस्वरू
पस्यावयविगुरुत्वस्य तावतां च परमाणुगुरुत्वानां वैकल्पिकी कारणता। द्विद्रोणप्रयोज्यजातीयावमनप्रयोजकानि यावंति गुरुत्वानि
तावद्गुर्वाश्रयघटितपरंपरया संसृष्टत्वं धान्येषु तद्वृत्तिस्वत्वं वा प्रतीयत इति तन्न। अवयविगुरुत्वस्य साक्षात्सततं त्रयस्यैवासमवायिकार
णत्वं मवनयने तु परमाणुगुरुत्वानामेव परंपरया तथात्वमन्यता सर्षपराशिजनितावनमनापेक्षया लोहपिंडजनितावनमनस्य प्रकर्षेप्र
कर्षप्रसंगात्। कारणोत्कर्षेण कार्योत्कर्षावश्यंभावात् इति न्यायद्वितीयाध्याये विवृतत्वादित्यादिक्। सामानाधिकरण्यादिः समयः स्यात्
न कथा। तृतीयार्थस्तदीयत्वं भेदः कारकं न तथा। संयोगिसंयुक्तत्वसमवायिसमवेतत्वं देशो दैशिकत्वकालकालिकत्वादिरनेकधाः सहा रामू
र्थः। स च यत्र नामार्थेनान्वेति तत्र प्रतियोगित्वं तृतीयार्थः। संकर्षणेन सह वासुदेव इत्यत्र संकर्षणप्रतियोगिकसंयुक्तो वासुदेवः सहरू १०१

पेण रस इत्यत्र रूपप्रतियोगिसमवायवदधिकरणसमवेतो रस इति। सेहे वद्रश्राभिः पुत्रैर्भारं वहति गर्दभी इत्यत्र दशपुत्रप्रतियोगिकं दैशिक
संसर्गवतिदेशे दैशिकेन विद्यमाना गर्दभीति। सह पत्न्याप्तिरित्यत्र पत्निप्रतियोगिककालिकाधिकरणे कालिकेन संसर्गेण विद्यमानः
पतिरित्यन्वयबोधः। सहारिवंसैः दीर्घाश्वासदंडा इत्यत्र दीर्घपदस्य चिरस्थितरआयतं वार्थः। तृतीयायाश्चाभेदः स च रस्थिरे दीर्घपदा
र्थे स च समानकालीनत्वं सहार्थे स चायं ते दीर्घपदार्थेऽन्वेति। व्युत्पत्तिवैचित्र्यात्। एवं च दिवसाभिन्नस्थिरश्च समानकालीन दीर्घाभि
न्नाश्वादंडा इत्यन्वयबोधः। तृतीयार्थाभेदान्वये च न समानलिंगवचनत्वादिनियमः। सीतया दारवानित्यादिप्रयोगात्। तेन कन्यया स
हरमणीयो वर इति नानुपपन्नं। एवमेव पुत्रेण सहागतः पितेत्यादौ पुत्राभिन्नो य आगतः तत्समानकालीनागताभिन्नपितेत्यन्वयबोधः
गमनविशेषयोः समानकालीनत्वेऽभासमाने गमनयोरपि तद्वासंते विशिष्टान्वयबोधः सामग्रीस्वभावात् पुत्रेण सह गच्छति पुत्रेण स
ह तिष्ठतीत्यादौ कर्तृत्वे तृतीया। तदन्वितमागमनं सहार्थे समानकालीनत्वेन द्वितीयागमने तत्र। ख्यातार्थकर्तृत्वादावन्वेति। धनेन सह गो
लभत इत्यादौ तृतीयार्थकर्मत्वं तल्लाभे स सहार्थे। सगोकर्मलाभे। सकर्मत्वादावन्वेति। दंडेन सह चक्रेणोत्पद्यते। अध्वर्युणा सह सदस्याय

प॰बा॰र॰ ददाति।शाकृत्स्नपदेनसहस्वर्गोस्यतलिपित्रासहमातुःस्मरति।नावासहनद्यांतिष्ठतीत्यादौकरणसंप्रदानापादानविषयाधिकरणत्वा
१०८ नियमायायंतृतीयार्थः।सहयुक्तधातुनाभिहितयोःक्रिययोःपदांतरनिर्दिष्टःसर्वोपिकारकगणोयोगपद्येनान्वेति।अन्यत्रतृतीयानिर्दि
ष्टात्।तेनग्रामंगच्छतिपुत्रेनगरंगच्छतिपितेतिनप्रयोगः।द्वयोरपिक्रिययोःनगरकर्मकत्वान्वयबोधेननगरकर्मकपुत्रकर्तृकगमनस्यबा
धात्।गवासहधनंलभतइत्यत्रगोकर्मकत्वाभेदेनकर्मकत्वाभेव्याख्यातो।गुणविधयाप्रथमानिर्दिष्टोवाकर्त्ताप्रधानविधयावाभास
तेसहार्थएववासमानकर्तृत्वं।।तेनगोश्चैत्रेणधनस्यमैत्रेणलाभेगवासहधनंलभतेमैत्रइतिनप्रमाणं।पत्न्यासहयजतइत्यत्रपत्न्याः
गौणकर्तृत्वंतृतीययानिर्दिश्यते।यद्दिनंदंपत्योर्व्यासक्तंकिमप्यखंडंकर्तृत्वं।सहयुक्तत्वेद्वेक्रिये।एकासहार्थेप्रतिविशेषणमपराप्र
धानंयस्यचकारकस्यप्रधानक्रियायांनान्वयस्तज्जातीयंगुणक्रियान्वयितृतीयापिनप्रतिपाद्यते।सहयुक्तेऽप्रधानेइतिसूत्रस्यायमर्थः
सहयुक्तक्रियान्वयिनोस्तुल्यजातीययोःकारकयोर्मध्येयत्प्रधानमप्रधानक्रियाकारकं।तस्मिन्नभिधेयेतृतीयेति।तेनग्रामेणसहचै राम
त्रोगच्छतीतिनप्रमाणं।प्रमाणंचग्रामेणसहगृहंगच्छतीतिचैत्रइति।एककक्रियाकारकत्वंसाहित्यमितिप्रवादस्तुएकस्यारोपात्तत्वेनक्रियया १०८

रेकव्यपदेशः।यत्तुपुत्रेणसहागच्छतीत्यादौयत्कारकान्वयिनीयाक्रियातत्कारकविशिष्टतत्क्रियासमानकालीनत्वंसहशब्दार्थस्तदेक
देशेकारकान्वितंवृत्तिमत्वंतृतीयाभिधत्ते।तथाचपुत्रवृत्तिकर्तृताविशिष्टागमनसमानकालीनागमनकर्त्तेत्यन्वयबोधः।यद्दिचतत्कार
कान्वयिनीसाक्रियापदांतरेणनप्रतिपादितातथासतिसहपदंतत्रमूकमतएवतत्रग्रामकर्मगमनसमानकालीनमागमनं।पुत्रकर्तृकग
मनसमानकालीनमागमनंचप्रतीयतइतितन्न।तथासतियत्रशासासहमूर्छतिनवशत्रुरित्यादौश्लेषभित्तिकसहोक्त्यलंकारेयशःकर्तृक
वृद्धिसमानकालीनमोहकर्ताशत्रुरित्यन्वयबोधानुपपत्तेः।मूर्छतीत्यनेनकर्तृतान्वितायामोहक्रियायाएवाभिधानात्।सहशब्देनय
शःकर्तृकवृद्धिसमानकालीनत्वाभिधानासंभवात्।संभवेवायत्रशासासहमुह्यतितवशत्रुरित्यत्रापितथाप्रतीयेत।तस्मान्मूर्छतिनाभि
ष्टार्थेनवृद्धिर्मोहश्चोपस्थितेतत्रवृद्धेःतृतीयार्थःयशःकर्तृत्वस्यवृद्धेःसहार्थसमानकालीनत्वेतस्यचमोहेन्वयःसहार्थसमानकालीनत्वे
विशेषणतयाविशेष्यतयावान्वयधातुजन्याक्रियोपस्थितिस्तंत्रमितिमुह्यतिनावृद्धेरनुपस्थापनायशसासहमुह्यतिशत्रुरितिप्रयोगः
नवासहपदस्यक्रियाकारकभेदेनार्थभेदः।रूपप्रागभावेनसहगंधप्रागभावइत्यादौकुत्सयासमानकालीनत्वशक्त्यैवनिर्वाहात्।तृतीया

श.वा.र. याः करणत्वकर्तृत्वयोः क्लृप्तशक्तिकायाः कारकचतुष्टये शक्तिचतुष्टयं कल्प्यत इत्यतिलाघवं। ननु गोपुत्रे धनं पितरि लभमाने पुत्रेण ध
१०९ नं लभते पितेत्यपि प्रसज्येत। न च तृतीयानिर्दिष्टभिन्नस्य कारकस्यैकरूपावच्छिन्नत्वेन गुणप्रधानक्रिययोरप्यन्वयबोधसामग्र्यपेक्षणी
या। अत्र च न धनकर्मतायाः गुणक्रियायामन्वयसंभव इति न तथा प्रयोग इति वाच्यं। एवं सति शिशुः पयो धास्यति सागरैः सहेत्यत्र श्ले
षभित्तिकसहोक्तौ धास्यतीत्यनेन धारणपानक्रिये उपस्थिते तयोर्धारणे सागरकर्तृत्वस्य सहार्थसमानकालीनत्वे धारणस्य पाने सहा
र्थस्य पयःपदार्थक्षीरकर्मकत्वस्यान्वयः। गुणक्रियायां च सागरकर्तृकधारणेन तदन्वयसंभवो वाधात्। किंतु पयःपदार्थजलकर्मत्वस्ये
ति नैकरूपावच्छिन्नस्य कारकद्वयोरन्वयसंभव इत्यनुपपत्तिताद‌वस्थ्यात्। एतेनैककर्तृत्वाद्यपि कर्तृत्वार्थकतृतीयासमभिव्याहृतस्य
सहस्यार्थ इत्यपि निरस्तमिति चेन्न। गुणप्रधानक्रिययोरेकपदार्थकर्मत्वस्यैव व्युत्पत्तेः। इदमत्राकूतं शिशुः पयो धास्यति सागरैः सहेत्या
दौ शिशुपदेन शिशोः सागरपदेन समुद्रस्य सहपदेन समानकालीनत्वस्य धास्यति पदेन खंडशो धारणाभाविर्त्वस्य योग्यताज्ञानं परस्प राम
रपदानामाकांक्षाज्ञानं चेति शाब्दसामग्री। तया सागरकर्तृकनीरकर्मकधारणसमानकालीनशिशुकर्तृकक्षीरकर्मिकाभाविपान १०९
+पानकर्तृकत्वानां च पयःपदेन क्षीरनीरयोः द्वितीयया कर्मत्वस्योपस्थितिः। सागरकर्तृत्वधारणे नीरकर्मतायाः शिशुकर्तृकपाने क्षीरकर्मत्व+ २

क्रियेत्यन्वयबोधः। यत्र च पयःपदेन क्षीरमात्रस्योपस्थितिः सा न फलोपधायिका। पयःपदजनितनीरस्मृतितद्योग्यताज्ञानादिवि
रहात्। यत्र च प्रधानादिक्रियायामपि न कर्मान्वयस्तत्र तद्घटिताभिन्नैव सामग्रीति दिक्। श्लेषस्थले एकपदोपात्तयोरभेदो व्यंजनया प्र
तीयते व्यंजनिकबोधे चाबाधो न विरोधी। श्लेषमूलकाभेदाध्यवसायाच्च क्रिययोरेककर्मकत्वं सहपदेन ध्वननघृसा प्रत्याय्यते। एवमे
व सकलकलं पुरं चंद्रमं रस्मिवेत्यादौ कलकलसहितस्य समसस्यकलायुक्तस्य च श्लेषभित्तिकाभेदाध्यवसायात्स एव साधारणधर्म
तया परिस्फुरतीति नु रसविद्याविदः श्लेषस्थले पयःपदवाच्यत्वावच्छिन्ने लक्षणा। तत्कर्मकत्वं च धारणपानयोरुभयोरप्यबाधितमेव
मेव पुरचंद्रयोः सकलकलप्रतिपाद्यत्वमेव साधारणधर्म इति व्यंजनविद्वेषिणः नन्वेवं पुमान् स्त्रियेति सूत्रे स्त्रिया सहोक्तौ पुमान् शि
ष्यत इति व्याख्यानमनुपपन्नं। मुख्यक्रियाकर्मण्यभिहिते गौणक्रियाकर्मणि सहयुक्ततृतीयायाः साधुत्वात्। अन्यथा ग्रामे पासह
गच्छतीत्यपि प्रसज्येत न तथा च स्त्रीकर्मकोक्तिसमानकालीनावामुक्तौ पुमान् शिष्यत इति कथमवगम्यतां उक्तौ पुंसकर्मकतेति चेत्।
पुंस इति कृद्योगलक्षणषष्ठ्यंतं परमनुषज्य पुमान् स्त्रियेति वाक्यस्योपपादनीयत्वात्। एवमेव यत्कर्तव्यं तदनया सहेत्यत्रापि पक्षे

प.वा.र. तिपदमध्याहरणीयमिति प्राञ्चः। वस्तुतस्तु। यत्रैकद्रव्यक्रियाद्वयनिरूपितं कारकमभिधानीयं तत्र प्रधानीभूतक्रियाकारकप्रतिपादि
काविभक्तिरेव प्रयोक्तव्या। गुणीभूतक्रियाकारकं तु समभिव्याहृतया विभक्त्यैव प्रतिपाद्यते संसर्गमर्यादयैवावभासते। यत्वोदनो भुज्यत इ
११० त्यादौ तथादर्शनात्। उक्तं च। प्रधानेतरयोर्यत्र द्रव्यस्य क्रिययोः पृथक्। शक्तिर्गुणाश्रया तत्र प्रधानमनुरुध्यते। प्रधानविषया शक्तिः
प्रत्ययेनाभिधीयते। यदा तदा गुणे तद्वदनुक्तापि प्रतीयत इति। स्त्रिया सहोक्तो पुमान् शिष्यत इत्यत्र प्रधानक्रियायाः शिष्यतिनोपात्ता
याः कर्तृकारके आख्यातेनाभिहिते गुणक्रियाया वचनस्य कर्मत्वं विनापि तद्योगे षष्ठी प्रथमया प्रतिपाद्यते। संसर्गमर्यादयाभासत इ
ति नपुंसक इति पदमध्याहर्तव्यं। एवमेव शाकेन सह पक्त्वोदनो भुज्यते पत्न्या सह पक्त्वा भुंक्ते ओदनं पत्न्यादयोपि प्रयोगाः। सहपदाः। शा
सह पदं स्थंजकमेव न तु वाचकं। क्रियायाः समानकालीनत्वादिना संसर्गेणान्वयः। अत एव सहप्रयोगं विनापि पुत्रेणागच्छतीति वाक्य
प्रामाण्यं। वृद्धो यूनेति निर्देशेन ज्ञाप्यत इति प्राहुः। व्यक्तिर्जात्या सह भासत इत्यत्र क्रिययोस्तादात्म्यं सहार्थः। भासनं ज्ञानमाख्यातस्य तृती राम
यायाश्च विषयतालक्षणं गौणकर्तृत्वं। तथा च ज्ञानकर्तृकभानाभिन्नं व्यक्तिकर्तृकं भानमित्यन्वयबोधः। जात्या सह व्यक्तिमवगाहते ६१०

निरूपकत्वफलको विषयितारूपो व्यापारः। आख्यातोपात्तं गौणमगौणं वा कर्तृत्वं प्रकृत्यर्थे विशेषितं तद्विशेषणं वा गौणप्रधानक्रिययो
र्विशेषणतया विशेष्यतया वा प्रथमान्तविशेष्यकशाब्दबुद्धिपक्षे गुणक्रियाया द्विधान्वयः। तथा च जातिकर्मकावगाहनकर्त्रभिन्नजातिकर्मका
वगाहनसमानकालीनव्यक्त्यवगाहकर्त्रभिन्नबुद्धिरित्यन्वयबोध इति दिक्। सहपदतुल्यार्थस्य साकं सार्धं समं शब्दाः। महाशरीरेण जात्या विशे
षायास्समग्रता। तदभावो यद्विकारस्तृतीया तत इष्यन्ते। संनिवेशो शरीरेषु समग्रत्वलक्षणा मनुष्यत्वब्राह्मणत्वादिव्याप्या वा जातयः
यदवच्छिन्नं प्रति विजातीयानां त्वगसृगस्थि कारणमतो न मांसे व्यभिचारः। काणस्तु जन्मतो लोचनसजातिस्तदवच्छिन्नसमवायि
कारणस्याविकृतचक्षुर्गोलकादेरभावात्। + पाणिपादादीनां समवायिकारणत्वात् अस्थि वृत्तिसमवायेन महाशरीरे सत्त्वे
तादात्म्येन नास्ति + अवयवाधिकेपि त्रिलोचनादौ न सा जातिरधिकस्य तृतीयलोचनस्य तत्सामग्र्यामनुप्रवेशात्। तथा च येनां
गविकार इति सूत्रे। येनांगेनांगिनो विकारस्ततस्तृतीयेति वृत्तेरयमर्थः। यत्समवेतत्वप्रयुक्तो महाशरीरत्वजातेरभावः स्वउ
शरीरे ततः प्रामिपत्तीकात्तृतीयेति अवयवस्य विकारस्तत्फलं तु सिध्यति। अविकृतावयवसमवेतत्वस्य महाशरीरत्वा

भावंप्रत्यप्रयोजकत्वात्।अक्ष्णाकाणइत्यत्रअक्षिपदंगोलकपरंसमवेतत्वप्रयुक्तसामग्र्यस्याभावस्तृतीयार्थः।काणपदस्यच
चक्षुरधिष्ठानगोलकारब्धत्वेसतिचक्षुरनधिष्ठितगोलकसमवेतंशरीरमर्थः।तथाचगोलकसमवेतत्वप्रयुक्तसमवेतत्वा
भाववान्चक्षुरधिष्ठितानधिष्ठितगोलकसमवेतःपुरुषइत्यन्वयबोधः।गोलस्यविकारःकनीनिकोपघाताप्रयुक्तोविजात्य
विशेषाभावअक्षेपलभ्यः।अविकृतचतुराश्यत्वस्यमहाशरीरत्वाभावप्रयोजकत्वाभावात्।प्रयोज्यप्रयोज्यकत्वभावस्तत्र्याप्यव्या
पकभावः।स्वरूपसंबंधविशेषेण।एवंपादेनखंजयतीत्यत्रपादवृत्तिर्जातिविशेषाभाववतिपादसमवेतःखंजपदार्थः।तथाच
पादसमवेतत्वप्रयुक्तसामग्र्याभाववान्यथास्थितपादइत्यन्वयबोधः।यदिचम गोलकोल्लूनपादोवाकाणःखंज
श्चभवति।तदाचक्षुरधिष्ठितगोलकद्वयासमवेतत्वेसतिचक्षुष्मद्गोलकसमवेतःकाणःसमग्रपादद्वयसमवेतःपादस
मवेतःखंजःतादृशस्थलेचाक्ष्णापादेनेनिसंबध्यते।वस्तुतस्तु।तृतीयायाविकारोर्थःसचक्वचिन्नाशःक्वचिदुपघातःक्व

चिच्छायादितथाचाक्ष्णाकाणइत्यत्राक्षिविकारप्रयुक्तःश्चक्षुःशून्यत्ववद्गोलकवानतत्प्रयुक्तचक्षुष्मद्गोलकद्वयासमवे

त्याकारोबोधः।गोलकस्यत्वनुशापएवविकारः।तमक्ष्णाकाणीच्चकारचरमोरघुराजपुत्रइतिमुरारिः।मुखेनत्रिलोच
नइत्यत्रमुखेलोचनत्रयत्वाप्रयुक्तोविकारः।सामग्र्यविशेषस्याभावस्तत्प्रयुक्तोमहाशरीरत्वाभावः।गोलकाभ्यांमुखे
नशरीरमारभ्यतइत्यभिप्रायेणमुखेनत्रिलोचनइतिमाघः।वपुषाचतुर्भुजइत्यत्रवपुःपदंशरीरपूर्वार्धपरमितिदिक्।
हेतौतृतीयाहेतुस्त्रकारकोज्ञापकश्चद्विधः।जन्यत्वंज्ञाप्यतातस्याअर्थइत्येकदेशिनः।हेतौतृतीयात्वनुशासनेनहेतोःप्रकृति
लभ्यतयाहेतुत्वेतृतीयाराश्यात्वमनुशिष्यते।हेतुश्चद्विविधोजनकोज्ञापकश्च।दंडेनघटःधूमेनवन्हिरित्यादावाधाराधेय
भावेनदंडहेतुत्वयोःधूमज्ञापकश्चनिरूपकत्वयाचकारणताघटयोर्ज्ञापकतावन्ह्योश्चान्वयःमणिकृतस्तु।नज्ञापकत्व
तृतीयार्थः।चक्षुषारूपमितिप्रयोगप्रसंगात्।धूमस्याज्ञापकतयाधूमेनवन्हिरित्प्रयोगप्रसंगात्।किंतुधूमेनवन्हिरि
त्यत्रधूमपदंधूमज्ञानेवन्हिपदंवन्हिज्ञाने।ज्ञायमानवन्होल्लाक्षणिकं।हेतुनाचतृतीयार्थः।तथोचधूमज्ञानवृत्तिहेतुतानि
रूपकज्ञानविषययोवन्हिरित्यन्वयबोधः।चेष्टयापततीत्यादौचेष्टज्ञाननिष्ठहेतुतानिरूपकज्ञानविषयःपाकभावज

प॰वा॰र॰ त्यन्वयबोधः भावनावाचिनः आख्यातस्य ज्ञायमानभावनायां लाक्षणिकत्वात् । आख्यातेनैकदेशे ज्ञाने निरूपकतया तृतीयार्थस्य हे
११२ तुत्वस्यान्वयः विभक्त्यर्थयोन परस्परमन्वय इति प्रामाणिकं । एकप्रत्यसोपजीवकत्वेन निरूप्यत इत्यादौ त्व प्रत्ययः प्रत्यसोप
जीवकत्वज्ञाने लाक्षणिकः तन्निष्ठजनकतानिरूपकत्वं निरूपणे भासते । प्रत्यसोपजीवकत्वसंगनेहर्नो नं च तु जिज्ञासाया
जिज्ञापयिषायां वा प्रयोजकत्वेन निरूपणजनकं । यज्ञेति वद्धेरेन यागइष्टसाधनमित्यादावपि वेदज्ञानजन्यज्ञानविषये
ष्टसाधनत्ववान्यागइत्यन्वयबोधः इत्याहुः । एकदेशिनस्तु । नजनकत्वं ज्ञापकत्वं वा तृतीयार्थस्तथासति घटो नरासभेने
ति घटू घटो न दंडेनेति प्रयोगप्रसंगात् । दंडनिष्ठहेतुताया अभावस्य घटे सुतरां सत्वात् । न च निरूपकता संबंधो वृत्तिनि
यामको येन तत्संसर्गावच्छिन्नप्रतियोगिताकोहेतुताभावास्तृतीयासमभिव्याहृतेन नञा बोध्येत । नापि वृत्त्यनिया
मकः संबंधः प्रतियोगितावच्छेदक इति जन्यत्वं ज्ञाप्यत्वं च तृतीयार्थ इत्याहुः तच्चिंत्यं । वृत्त्यनियामकसंबंधस्य प्रतियोगितान राम
वच्छेदकत्वे घटो न पारिमांडल्येनेत्यादौ घटे पारिमांडल्याभावाप्रसिद्ध प्रतियोगिकतया नबोधयितुं शक्यत्वात् तृतीयार्थे च निरू ११२

पतासंबंधावच्छिन्नप्रतियोग्यताकः पारिमांडल्याभावस्याप्रसिद्ध इत्यनन्वयप्रसंग इत्यधिकमुपरिष्टात् । हेतावि तिसर्वेफल
मपिहेतुः । अध्ययनेन वसतीत्यत्राध्ययनफलको वासो वा कार्थः । तत्फलकत्वं तु तदिच्छाप्रयोज्याचारविषयत्वं । न तु तज्जनकत्वं ।
निर्वाणेन सुगतमुपास्ते मात्स्य इत्यादौ सुगतोपासनो निर्वाणजनकताया बाधात् । तुल्योपमान्यशब्दार्थ सादृश्यप्रतियोगि
तां । तृतीयाह षष्ठेवस्यात्तुलोपमयोर्द्वयोः सादृश्यवाचकपदे सत्यं पक्षांतरे तृतीया षष्ठीवत्सादृश्यान्वितं प्रतियोगित्वमभिध
त्ते । चंद्रेण चंद्रस्य वा सदृशं तुल्यं समं वा मुखमित्यादौ चंद्रप्रतियोगित्वसादृश्यवन्मुखमित्यन्वयबोधः । तत्र यदि सादृश्यमति
रिच्यते । तदा तत्प्रतियोगित्वमपि तथा । यदि च वृत्तिमद्धर्मवानेव सदृश पदार्थस्तदा वृत्त्यन्वयि निरूपकत्वमेव प्रतियोगित्वं तृती
यार्थः । तथा च चंद्रनिरूपकवृत्तिमद्धर्मवन्मुखमित्यन्वयबोधः । सादृश्यघटकभेदे च तृतीयार्थः प्रतियोग्यनुयोगिभावस्व
प एवान्वेति । घटेन रहितं शून्यं वा भूतलमित्यादौ प्रतियोगित्वार्थकतृतीयादर्शनात् । भेदविशेषितसाधर्म्यार्थक सदृशशब्दादि
योगेपि तृत्यन्वितनिरूपकत्वार्थिका तृतीया । रामरावणयोर्युद्धं । रामरावणयोर्युद्धे सदृशामित्यपि प्रयोगात् । एतादृशाननया

प॰बो॰र॰ ११२

लंकारेप्रथमतोरामरावणयोर्युद्धंनिरूपितंवृत्तिकधर्मवद्रामरामरावणयुद्धमितिबोधः।ततोभेदांशमपहायसाधर्म्यमात्रेण
लाक्षणिकपदप्रयोगफलविधयानिरूपणंरामरावणयुद्धमितिवैजनिकोबोधः।समानशब्दःशाब्दोवेत्यन्यदेतत्।सदृशपदंनिरूपमे यं
युद्धपदंरामरावणयुद्धलाक्षणिकं।रामरावणयोरितिलक्षणातात्पर्यग्राहकमितिकाव्यमार्गविरूढं।अनिरूढलक्षणायाःप्रयो
जनशून्यत्वेननेयार्थतापगमात्।सादृश्यवाचिनोऽपितुल्योपमयोर्योगेचंद्रस्यतुलामुपमांवासुखंधत्तइत्येवप्रमाणंनतुचंद्रेणेति।
कथंतर्हितुलांयदारोहतिदंतवाससेतिस्फुटोपमंभूतिसितेनशंभुनेतिप्रयोगइतिचेत्।सहपदस्याध्याहारेणतदर्थस्यसंसर्गविधया
भावेननसहयुक्तेस्तृतीयाप्रयोगात्।तथाचदंतवासःकर्तृकतुलाकर्मकारोहणसमानकालीनंतुलारोहणंकर्तेति।भूतिसितत्वंशंभु
भिन्नस्फुटोपमसमानकालीनंस्फुटोपमंभिन्नंनारदमितिचान्वयबोधः॥ ॥परंतुवैरेणसहसंयुज्यतेसमवेतीसादौनिरूपक
त्वं।निर्वैरेणसहवैरायतेनिर्मत्सरेणसहस्पर्धतइत्यादौविषयविषयीभावस्तेनसहोपमीयते।तुल्यतइत्यादौतदीयत्वाक्षिप्तसहार्थः
तएवतदुपमांगजैःसमंचमेर्यैवतुलाभिलाषिणइतिश्रीहर्षःसहयुक्तेस्तृतीयातुसाधुत्वार्थैःस्यात्॥प्रकारोद्विविधः।विशेषणमु राम ११२

पलक्षणंच।तत्रतद्बुद्धिसमानकालीनत्वेसतितद्बुद्धिप्रकारउपलक्षणं।यथागुरुणाटीकाकृताक्षेत्रमित्यत्रगुरुकृत्।अत्रहित
कालनिष्ठस्यध्वंसस्यकदाचित्काभावस्यवाप्रतियोगित्वंसंबंधश्चतृतीयार्थः।तथाचाविद्यमानस्यगुरोष्टीकाकृतःक्षेत्रमित्यन्व
यबोधइतिकेचित्।इत्थंभूतलक्षणेतृतीयेतिसूत्रेअतीतार्थिकोनिष्ठाप्रत्ययोपिसाधुसंगच्छते।इत्थंभूतस्यलक्षणेसंबंधेबोध्येतृ
तीयासाधुरितिसूत्रार्थइत्येतन्मतोत्तंभनावसरेमिश्राः।विशेषणत्वंप्रकारत्वंचपर्यायशब्दौ।योयस्यांबुधोयत्प्रकारःसतत्रवि
शेषणं।विशेषणोपस्थापकमविशेषणमुपलक्षणं।यथाकाकेनोपलक्षितःसंस्थानविशेषाद्देवदत्तगृहेविशेषणीभूयभासनर्
तितस्यतीत्तावुपलक्षणंकाकः।एवमुपमितोलिंगस्यशाब्दबोधपदस्योपलक्षणत्वमिष्टमेव।काकेनदेवदत्तगृहास्पृष्टंविशेषणं।
परंपरयोपलक्षणं।तदाहुःशिवादित्यः।व्यावर्त्तनीयमधियद्विविमानिसाक्षात्तद्विशेषणमतोविपरीतमन्यत्।दंडीयुमानि
तिविशेषणमत्रदंडःपुंसोनजातिरनुदंडमसौचतस्येति।अनुदंडंदंडमनुगतोदंडत्वजातिर्नपुंसोविशेषणं।किंत्वसौदंडस्येत्य
र्थइत्यन्ये॥ ॥मणिकृदनुयायिनस्तुविशेषणमुपलक्षणमितिपरिभाषानानार्थो।यत्रदंडीपुरुषइतिज्ञानंततोनिर्दंडपुरुषव्या

प॰श॰२॰ दण्डोदंडी पुरुषइतिनिश्चयस्तत्रदंडोविशेषणमित्युच्यते। यत्रैकस्मादेवव्यावृत्तेरनुयोगिताप्रतियोगिताचैकधर्मावच्छिन्ना। तत्रत
११४ दनुयोगितावच्छेदकत्वेनतत्प्रतियोगितावच्छेदकत्वेन चप्रतीयमानत्वंविशेषणपदप्रवृत्तिनिमित्तं। अतएवश्वेतस्यकरवीरस्यकुव
लयस्यव्यावृत्तौपुंडरीकत्वावच्छेदेनगृह्यमाणायांश्वेतत्वेनकमलविशेषणमतएवचेदंविशेषणत्वंनव्यावृत्तबुद्धेर्विषयः। किं
तुतदनुव्यवसायादेः॥ काकवंतोगृहादेवदत्तस्येत्यादौदेवदत्तस्वत्वरहितगृहव्यावृत्तिःसंस्थानविशेषावच्छेदेनगृह्यतइतिका
कोनविशेषणं। अपितुविशेषणान्यत्वेसतिव्यावृत्तिबुद्धिप्रकारतयातदुपस्थापकतयावोपलक्षणं। अतएवप्रमेयत्वादेर्वि
शेषणोपलक्षणबहिर्भावात्प्रकाराद्द्विविधइतिप्रतीकं। गृहीत्वाव्यावर्त्तकइतिविशेषायमित्यंशःपछिन्नः। इत्यादिविशेषोमित्यंशम
नेविशेषणवत्वंवस्तुसदेवव्यावृत्त्यधिकरणतावच्छेदकत्वं। तच्चसंयोगाद्यवच्छेदकवत्स्वरूपसंबंधविशेषस्तस्यप्रमाणिकत्व
द्योतनायमणोप्रत्याय्यव्यावृत्तौस्यादितिनिर्देशइति। तत्रव्यावृत्त्युल्लेखानंतरमेवाहिविशेषणप्रत्ययइतिमणिवाक्यंदुरुपपादं। राम
उपलक्षणात्ततीयायास्तुनोपलक्षणत्वमशक्यं। किंतुवस्तुसत्युपलक्षणेप्रातिपदिकेनोपस्थापितेसंबंधमात्रं। काकेनदेवद ११४

त्तगृहाइत्यत्रकाकसंबंधिनोदेवदत्तगृहाइत्यन्वयबोधः। प्रमेयत्वादेश्चनस्वरूपसद्व्यावर्त्तकमितिनप्रमेयत्वेनघटइतिप्र ०.८
योगः। यस्तुपशुनायजेत्यादौपशुगतमेकत्वंविशेषणं। गृहेसमार्ष्टीत्यत्रगृहगतमुपलक्षणमितिछांदसानांव्यवहारःसच
विशिष्टान्वयतदनन्वयनिबंधनः। विशिष्टान्वयस्तुत्रिविधः। पशुनायजेतेत्यादौतृतीयोपात्तकर्मतायांयागभावनायांवा
पशोरन्वयेएकत्वावच्छिन्नप्रतियोगिताकःसंसर्गोभासतइत्येकः। पशोर्नहिविशेषणतापन्नेकत्वेचप्रकारतापर्याप्तेतिद्विती
यः। एकत्वेप्रकारत्वद्वयमन्योन्याभावावच्छिन्नमेकं। पशुर्विशेष्यतयाद्वितीयं। भावनादिविशेष्यतयानिरूपितमेकमे
ववाभिन्नंविशेषताद्वयनिरूपकसंसर्गतायुगलावच्छिन्नमितितृतीयःकल्पः। तथाचयदिदंडावच्छिन्नःपुरुषसंबंधो
विवक्षितस्तदादंडस्यविशेषणत्वं। इतरथातूपलक्षणतयादंडेनपुरुषमानयेत्यादिप्रमाणं। प्रमेयःप्रमेयपदवाच्यइत्या
दौविशेष्यान्वयिवाच्यतातादात्म्यान्वयितयाप्रमेयत्वमपिविशेषणमित्यादुः। तत्रतृतीयायाःसंबंधमात्रार्थकतयाप्रमेय
त्वेनद्रव्यत्वेनवापुरुषमानयेत्यादिकःकुतोनप्रयोगइति। उच्यते। अभावप्रतियोगित्ववैशिष्ट्यंचतृतीययाकथ्यतेतत्र

प॰श्रा॰र॰ लक्ष्यस्य पुरुषादेर्हि धान्वयः। दंडेन पुरुषा इत्यादावभावप्रतियोगित्वे तृतीयार्थः। तत्राभावे पुरुषस्य प्रतियोगित्वं च दंडत्वा
११५ वच्छेदेन दंडस्य च वैशिष्ट्यस्य पुरुषेन्वेतीत्युपलक्ष्यस्य विशेषणतया हि धात्वर्थानुप्रवेशः। पुरुषनिष्ठात्यंताभावप्रतियोगि दंडवि
शिष्टपुरुष इत्यन्वयबोधः। प्रतिस्वं गुणानां द्रव्यनिष्ठात्यंताभावप्रतियोगित्वेपि न गुणत्वावच्छेदेन तथेति गुणेन द्रव्यमिति
न प्रयोगः। उपलक्षणतावच्छेदकधर्मावच्छेदेन तृतीयार्थान्वयव्युत्पत्तेः। कलक्कणितगर्भेण कंठेनाघूर्णितेक्षणः। पारावतः प
रिभ्रम्य रिरंसुश्चुंबति प्रियामित्यत्र कलक्कणितगर्भकंठमेवोपलक्षणतावच्छेदकं। तत्र न यावन्निष्ठात्यंताभावप्रतियोगिता
वच्छेदकत्वबाधः। अत्यंताभाववैशिष्ट्यं चान्वेतीत्यपि वदंति। अवच्छिन्ना प्रतियोगिता तृतीयार्थः। अत्रावच्छिन्नत्वे दंडस्य।
पुरुषत्वविशिष्टे च प्रतियोगित्वस्यान्वयः॥ तथा च दंडावच्छिन्नपुरुषत्वावच्छिन्नप्रतियोगितावान् पुरुष इत्यन्वयबोधः। पुरु
षत्वव्यापकं प्रमेयत्वादि। तद्व्याप्यं चैत्रत्वादि च न पुरुषावच्छिन्नप्रतियोगितावच्छेदकव्याप्यव्यापकभावनापन्नयोगिताव रामः
छेदकत्वादिति प्रमेयत्वेन चैत्रत्वेन वा पुरुष इति न प्रयोग इत्यपरे॥ ॥यज्ञेन पुरुषुना रुद्रमित्यादौ दानवाचके। यज्ञो कर्मता ११५

माहृ तृतीयाधारतां कश्चित्। पशुना रुद्रं यजत इत्यादौ पशुं रुद्राय ददातीत्यन्वयबोधः। कर्मणि तृतीया। संप्रदाने द्वितीया। पु
ष्येपास्नायादित्यत्र कालिकमाधारत्वं तृतीयार्थः। पुष्यपदं पुष्यचंद्रसंयोगावच्छिन्नकालपरं। मोगेन प्रसितत्सुक इत्यत्र
तृतीयाविषयत्वलक्षणं सोपामाधारत्वमभिधत्ते। कालाध्वात्यंतसंयोगे क्रिया चेदपवर्गिणि। तृतीयाप्युच्यते तर्हि द्विती
येवान्यथा भवेत्। अन्हा क्रोशेन वानुवाकोधीत इत्यादावस्वक्रोशत्वादिव्यापकां कालिकीं दैशिकीमाधारतां तृतीया ब्रूते
यदि फलवती क्रिया धातूपात्ता फलत्वं तु परिछाप्रयोगेस्याचारविषयः क्रियात्वं। तदुपहिता क्रिया। तथाध्ययनान्वारस्वहद
संस्कारेच्छाप्रयोज्य इति दृढसंस्कारोपहिताध्ययने धातुर्लाक्षणिकः। यत्र तु क्रियायां न फलोपधानं तत्र मासमधीतोपि नाप्य
स्त इत्यत्र द्वितीयैव प्रमाणं। अत्यंतसंयोगमात्रं तृतीयार्थो ऽपवर्गस्तु व्यंजनाकाम्यः। दिवसेन भवान् युद्धे स्पत्र दिवसाभिव्या
पके भवत्कर्तृकं युद्धमिति प्रथमः। विजयफलोपहितं युद्धमिति द्वितीयो बोध इति प्रकाशकारचरणाः। तत्र तवद्य त्रुदिवसम
युद्धन तु दिवसेन व्यत्र गतिर्भिसा। फलोपहितत्वं सपरार्थताबादे तु दिवसाभिव्यापकयुद्धकर्त्तादिवसाभिव्यापकफलोपहि

प॰ वा॰ र॰ तयुध्यकर्तृत्वाभावबोधश्चेतवशात्तुरित्यन्वयबोधः॥ ॥इति श्रीपदवाक्यरत्नाकरे तृतीयाविवरणं॥ ॥ङे॰भ्यांभ्यश्चतुर्थी॥ सा संप्र
दानत्ववाचिका॥ संप्रदानत्वं तु दानस्यक्रियायाया फलोपभुक्॥ ङे॰भ्यांभ्यसिति चतुर्थी तत्र ङ॰कारोनुबंधो न वाचककोटिप्र
११६ विष्टः। चतुर्थ्यर्थस्तु संप्रदानत्वं। तत्र ददातेः स्वत्वध्वंसजनको व्यापारोर्थः। अत एव स्वस्वत्वध्वंसफलवत्तया हिरण्यादेः कर्मत्वं। उत्स
र्गे पि ददातिर्मुख्य एव। विक्रियादावपि ददातिप्रयोगो दृश्यते। गोमिथुनमादाय कन्यां ददातीत्यादौ॥ यद्वा॥ उपेक्षायां ददाति
व्यवहाराभावात्स्वत्वानुकूलस्त्यागो ददात्यर्थः। त्यागस्तु न मम किं त्वस्येत्याकारोन ममेत्यंशेनोपेक्षासाधारणेन स्वत्वध्वंसप्र
तिजनकः स्वत्वध्वंसप्रकारतानिरूपितविशेष्यतासंसर्गेण तत्पुरुषीयस्वत्वध्वंसं प्रतिजनकत्वात्। किं त्वस्येत्यंशेन परस्वत्वं प्रति
त्यागस्य जनकता। स्वत्वध्वंसो व्यापारः। अत एव विरोधं तरितेति त्यागे संप्रदानानुमस्यात् तदीयं स्वत्वं जन्यते। जन्यत्वेव चोरक
र्तृकत्यागेन परस्य स्वत्वं। पूर्वस्वामिस्वत्वस्य स्वत्वान्तरप्रतिबंधकत्वात्। यत्तु त्यागस्योपेक्षणासाधारण्येन स्वत्वनाशप्रत्ये रामः
व जनकत्वं। ननु स्वत्वे प्रमाणाभावात्। सप्त वित्तागमा धर्म्या लाभो दायः क्रयो जयः। प्रयोगः कर्मयोगश्च सत्प्रतिग्रह एव च ११६

त्यत्र याजनाध्ययनप्रतिग्रहैर्ब्राह्मणो धनमर्जयेदित्यत्र च प्रतिग्रहस्यैव स्वत्वोपायत्वाभिधानात्। प्रतिग्रहस्यापीदं ममे
त्याकारानुमितिस्वरूपस्य समित्कुशाद्युपादानसाधारणेन रूपेण स्वत्वजनकत्वं। यत्पुरुषनिरूपितं स्वत्वं प्रति पुरुषसमवे
तस्वीकारस्य विशेष्यतया कारणत्वात्। तथा च स्वत्वमात्रं चतुर्थ्यर्थः। तत्र प्रकृत्यर्थस्य निरूपकतयाऽन्वयः। जनकतया च स्व
त्वस्य पदाद्यर्थफले स्वत्वध्वंसेऽन्वयात्। ब्राह्मणाय गां ददातीत्यादौ ब्राह्मणनिरूपितस्वत्वजनकगोनिष्ठस्वत्वध्वंसजन
कत्यागवानित्यन्वयबोधः। व्यधिकरणस्वत्वं प्रतिगवि स्वत्वध्वंसस्याजनकतया स्वत्वमात्रं वृत्तित्वमर्थाल्लभ्यते। तेन पु
त्रस्य राज्यलाभकामनया दीयमानायां गवि पुत्राय गां ददातीति न प्रयोग इति॥ तन्न॥ स्वत्वध्वंसजनकत्यागमात्रस्य द
दात्यर्थत्वे उपेक्षायामपि ददातिप्रयोगापत्तेः दानस्य स्वत्वे प्रत्यकारणत्वेऽन्यमुद्दिश्य त्यक्तेऽन्यस्योपादाने स्वत्वापत्ति
प्रसंगात्। उपादानेन स्वत्वेऽजननीये समित्कुशादीनां तादात्म्येन सहकारित्वाभ्युपगमे नष्टस्यापि विशेषसामग्रीघटकत्व
मावश्यकं। तत्पुरुषीयत्वप्रकारतानिरूपितविशेष्यतासंसर्गेण त्यागस्य तत्पुरुषस्वत्वं प्रति कारणत्व। स्वत्वध्वंसस्तु व्यापारः

प॰वा॰र॰ ब्राह्मणाय गां ददातीत्यादौ निरूपकत्वं स्वामित्वं चतुर्थ्यर्थः। तथा च ब्राह्मणनिरूपितस्य ब्राह्मणसमवेतस्वामित्वनिरूपित
११७ स्यैवास्वत्वस्य स्वत्वध्वंसव्यापारेण जनकस्त्यागो वाक्यार्थः। भवतु वा स्वत्वस्योद्देश्यत्वाख्यविषयतासंसर्गेण त्यागान्व
यस्तत्त्वोद्देश्यकस्त्याग एव ददात्यर्थः। अत एव स्वत्वानुपहितेप्युत्सर्गे ब्राह्मणस्य संप्रदानत्वं ददातेश्च मुख्यत्वमुपपद्य
ते॥ ॥ यत्तु उत्सर्गेणापि समनंतरमेव संप्रदानस्य स्वत्वं जन्यते। अत एव तदुद्देशेन कैश्चित्त्यक्ते धने तस्मिन्नप्रतिग्रहीते एव निधनमु
पगते तत्पुत्राणां स्वत्वोत्पत्तिरुपपद्यते। तद्व्यक्तिमरणजन्यस्वत्वध्वंसस्य तद्व्यक्तिमरणस्य वा स्वत्वध्वंसव्यापारेण तत्पुत्र
स्वत्वं प्रति जनकत्वात्। अपुत्रव्यक्तिमरणजनितस्वत्वध्वंसस्य तत्पत्नीस्वत्वध्वंसं प्रति जनकत्वं। अपुत्रस्य धनं पत्न्यभिगा
मीति स्मरणात्। ऋतुमपेक्ष्य निधनमुपगतेपि तज्जातमपि स्त्रीस्वत्वं पुत्रोत्पत्त्यानाश्यते पितृमरणजनितस्वत्वना
शेन च मातृस्वत्वनाशानंतरं पुत्रस्वत्वं जन्यते। तादृशाच्छलेच मात्रा विक्रीते न पुत्रस्य स्वत्वोत्पत्तिः। कर्तृपुरुषस्वत्वस्य प्रतिबं राम
धकस्य नाशकाभावादित्यवश्यमुत्सर्गेणाव्यवहितस्यापि पुंसः स्वत्वं जन्यत इति। तन्न॥ ॥ एवमपि तन्न प्रोषितमुद्दिश्य ११७

त्यक्ते तत्पुत्रस्य स्वत्वानुत्पादप्रसंगात्। उत्सर्गव्यवस्थोत्तरस्यावश्यमाश्रयणीयत्वात्। ब्राह्मणमात्रमुद्दिश्य सत्के तुला
पुरुषादौ ब्राह्मणसामान्यस्वत्वोत्पादनप्रसंगाच्च। परस्वे दातुर्विनिमयाद्वितरेण च्यनधिकारप्रसंगात्। इत्थं च संप्रदानमित्य
न्वर्थसंज्ञाबलाद्दानफलस्वत्वनिरूपकत्वमेव संप्रदानत्वं चतुर्थ्या मुख्योर्थ इति दिक्। शांतिका॥ ॥ शाब्दिकास्तु ददातेः स्वत्व
ध्वंसः। स्वत्वं च फलं विधयार्थः। त्यागक्रियाफलमप्येकेनैव कर्मणा साकांक्षा। द्वितीयोपात्तमधिकरणं स्वत्वे स्वत्वध्वंसे च
यौगपद्येनान्वेति। गां ददातीत्यत्र गोवृत्तेः स्वत्वस्य स्वत्वध्वंसस्य चानुकूलस्त्यागो वाक्यार्थः। तेन ग्राममलाभकामनयादीय
मानायां गावि गां ग्रामं ददातीति न प्रयोगः। चतुर्थी तु धात्वर्थफलान्वयि प्रीत्यादिफलांतरमभिधत्ते। तेन गां ददाति ब्रा
ह्मणायेत्यत्र ब्राह्मणप्रीतिजनकगोवृत्तिस्वत्वस्य गोवृत्तिस्वत्वध्वंसस्य चानुकूलस्त्यागो वाक्यार्थः। प्रीतिमजनयत्य
पि स्वत्वं यदि ददातीति च प्रयोगस्तदा तत्र श्रेष्यमाणं प्रीतिजनकत्वमेव चतुर्थ्यर्थः। इच्छायां च चतुर्थ्यर्थे प्रकृत्यर्थस्य विषयतया
न्वयः। ब्राह्मणविषयतया निरूपितप्रीतिविषयतानिरूपितजनकत्वविषयतानिरूपितविषयतयाभिप्रायः स्वत्वेः

प॰वा॰र॰ न्वेति। अत एव कर्मणा यमभिप्रैति स संप्रदानमिति सूत्रे। कर्मफलगोचरमभिप्रायविशेषमेव चतुर्थ्यर्थं तया पाणिनिरुदा
जहार। अत्र संप्रदानपदं नान्वर्थसंज्ञकं॥ येन दानजन्यफलफभागेकः स संप्रदानसंज्ञः स्यात्। किंतु क्रियांतरजन्यफलवद
११८ पि संप्रदानमिति सिसंज्ञायते। क्रियाग्रहणं कर्तव्यमिति वार्तिकात्। चतुर्थ्यर्थपात्रं च फलं क्वचिदनुकूलतया धात्वर्थेऽन्वेति।
यथा ब्राह्मणाय ददातीत्यत्र दानफले स्वत्वे ब्राह्मणप्रीतिः। वृक्षायोदकं सिंचतीत्यत्र क्रियाफले जलसंयोगे वृक्षपुष्टिः
च यदग्नये प्रजापतये च जुहोतीत्यत्र वह्निसंयोगफलकप्रत्यक्षे पत्यक्षहोमफले वह्निसंयोगेऽग्निप्रजापतिस्वात्म्यं तत्प्रीति
र्वा। विप्रायान्नं निर्वपतीत्यत्र निर्वापफले विक्लित्तौ विप्रभोजनं। खंडिकोपाध्यायः शिष्याय चपेटिकां ददातीत्यत्राभि
घातफलक्रियार्थकददात्यत्र फलेऽभिघाते शिष्यश्रथा। अजां ग्राममानयतीत्यत्र कर्मानुकूलव्यापारात्मकनयनफले क
र्मणि ग्रामसंयोगः यत्र च। नयतिना संयोगोप्युपात्तस्तत्र परया कर्मसंज्ञया संप्रदानत्वाबाधात्। अजां नयति ग्राममभि
त्येव प्रमाणं। एवं गमनजन्यसंयोगफलस्य। चैत्रेऽपि संभवेन चैत्रः श्वेत्रायगच्छतीतिप्रयोगापादनमिति परास्तं। परस्या राम ११८

कर्मसंज्ञया संप्रदानसंज्ञाबाधात्। क्वचिच्च तुर्थ्यर्थः प्रधानक्रियायामन्वेति। तथा। तमनेनैव पुत्रमभियो भवतीत्यत्र पुत्रप्रीयभावेऽआ
त्मनः प्रीतिः। प्रक्षेशेते प्रौढवधूरित्यत्र प्रौढवधूकर्तृकं शयनेपतिप्रीतिः। ग्रामाय गच्छतीत्यत्र शुद्धस्य ददार्थकगमिधात्वर्थे ग्रामसं
योगः। अत एव गत्यर्थकर्मणि विभाषा चतुर्थीविधिः मस्यास्त्येयः। गमिफलस्य धातुनोपादाने चतुर्थीति न्यायसिद्धतयायामाप
चलतिवृक्षाय स्पंदते ह्स्यारे रिवगच्छतीति प्रयोगोपीष्यत एवेत्याहुः। स्पृह्यर्थधातुसाकांक्षा चतुर्थी इत्याह धर्मेतो। स्पृहिणा यंत्रिनास
व्यपेक्षात्तु विषयत्ववाक्। चैत्रायुरुस्वदत्तेचै रोचते मोदकत्वस्य चरुच्यार्थरभिलाषोऽर्थः। तत्समभिमाह्रतया रुच्यातंतु विषयत्वमभिधत्ते।
तेन चैत्रसमवेताभिलाषविषयमोदक इत्यन्वबोधः। स्पृहयतिसमभिव्याहृतार्थ्यांतं तु समवायित्वमभिधत्ते चतुर्थी तु विषयत्वं
तेन पुष्पेभ्यः स्पृहयति पटाययन इत्यत्र पुत्र विषयकाभिलाषवान्। पटविषयकपलपायानिस्त्वन्वयबोधः। पटमुद्दिश्य तंतुसा
धयत्यपि त्रयत्ले उद्देश्यत्वेन विषयइति पटाय तन्तुरति निराबाधं। स्त्रीपुमवीरजननीजननीतवैवदेवीस्वयंभगवती गिरिजापि
यस्यै। त्वद्दर्शीशीह्रतविशारववलोभ्रत श्रीग्रीशविदीर्णहृदयास्पृह्यां बभूवेत्यत्र रेणुकासदृशी। भवेयमित्यभिलाष एव स्पृहा।

प॰वा॰र॰ तस्यां च न रेणुकाविषयत्वबाधः। यदि तु विषयतामात्रस्य चतुर्थ्यर्थत्वे पुष्पलाय स्पृहयतीति प्रयोगापत्त्यास्त्वनिष्टविषयतानिरूपित
११९ मुद्देश्यतस्पृहिसमाभिव्याहृतचतुर्थ्यर्थो भवति च पुष्पं मे स्यात्। पुष्पवानहं स्यामीत्यभिलाषविषयत्व मुद्देश्यत्वस्वरूपमिष्टसाधनं पु
ष्पं मे मेति विशिष्टज्ञानेन वा तादृशेच्छाजननादिति रेणुका सदृशी भवेयमित्यभिलाषो न रेणुकां किंतु तत्सादृश्यमुद्दिशतीति रेणु
कां वैसगवती स्पृहयतीति प्रयोगोनुपपन्न इति विभाव्यते तत्र दातारास्त्येनोद्देश्यप्रकारको ऽभिलाषः। ब्राह्मणोहं स्यामीतीच्छाकाराल्ले
खदर्शनात्। तत्र च ब्राह्मण इष्टसाधनं। ब्राह्मणोऽहमित्याद्रिज्ञानद्वयमेकं वा। कारणमित्यन्य देतत्। नन्वेवं स्पृहणीयगुणेर्महात्मभिरित्य
त्रकर्मणि कृत्यप्रत्ययादुरुपपादः। निरवकाशया संप्रदानसंज्ञया कर्मसंज्ञाया धात्वंतरलब्धसावकाशाया पदाया बाधा इति चेतत्। उ
च्यते। दानीयो ब्राह्मण इति प्रयोगात्संप्रदानता। अनीयरापि प्रवृत्तौ निमित्तमिगम्यते। संप्रदानत्वप्रवृत्ति निमित्तकोऽनीयर्प्रत्ययः
निदानीयो ब्राह्मण इति प्रयोगदर्शनात्स्वगम्यते तेन स्पृहणीया गुणा इत्यत्र संप्रदान एव कृत्यप्रत्ययो न कर्मणि। एतेन परस्परत्वस्पृह
णीयशोभं न चेदिदं द्वंद्वमयोजरथ्यासृत्यपि व्याख्याते। इरदत्तस्तु स्पृहेरीप्सित इति सूत्रे। स्पृहकर्मणि न संप्रदानसंज्ञा विधत्ते। येन राम
११९

तुल्यविषयत्वया निरवकाशया विशिष्य संप्रदानसंज्ञया धात्वंतरसावकाशया। कर्मसंज्ञाया बाधः स्यात्। किंतु स्पृहिरिच्छामात्रवाचि
त या फलावाचकत्वादकर्मकस्तत्र विषयताभिधायि चतुर्थीनिष्पत्तये संप्रदानसंज्ञा विधीयते। यत्र च विषयतासरूपफलावच्छिन्नाभि
लाषवाचि स्पृहिर्यत्र वा विषयतैव संबंधत्वेनाभिधानीया। तत्र कर्मणि द्वितीया। शेषे षष्ठी च प्रमाणमत एव स्पृहयंति गुणात्मनो षिणः प
रिवादं तु परस्परदुर्जना इति। कर्मीय इव कांतस्य तस्यैदि स्पृहयंतिचेति प्रयोगगुणपद्यतइत्याह। श्लाघह्नुङ्स्थाशपां कर्मरा धर्विप्रश्नगोत्वरः
उत्तमणा धारयतेर्भजतसंप्रदानतां। उत्कर्षप्रकारकप्रतिपत्तेरनुकूलो व्यापारः। शब्दो वा श्लाघेरर्द्दर्शनस्यानुकूलो व्यापारो न्हुवः प्रकाशस्या
नुकूलो व्यापारः संमुखावस्थानादिति ष्ठतेरपकर्षप्रकारकप्रतिपत्तेरनुकूलः शब्दः शपेरर्थः। नरपतये श्लाघत इत्यत्रोत्कर्षप्रकारकप्रति
पत्तिस्वरूपफलान्वयिनि विशेष्यनरपतिस्तौतीति वत्कर्मसंज्ञा प्रसक्तातदपवादाय चतुर्थी विधीयते। जारायन्हुते वं धकीत्यत्र राजंप्रछाद
यनीत्यादौ दिवादर्शनस्वरूपप्रकाशसमवायितया। शिवाय वेशपत इत्यत्र शिशृंगिंदंतीत्यादावि वापकृष्टत्वज्ञान विशेष्यतया शिशो
प्रसक्तं कर्मत्वमपवदंतीसंप्रदानसंज्ञा विधीयते। यत्र च स्थयत्वेम ध्यस्थत्वेन निर्णयकत्वेन वाश्रयणं तदं तस्य तिष्ठतेरर्थः। तत्र न सं

प॰वा॰र॰ प्रदानता। अत एव संशय्य कर्णादिषु तिष्ठते य इति भारविः। संशयानेतरितस्य कर्णादेर्निर्णायकत्वेनाश्रयणस्य कर्तामप इति तदर्थः। यत्र च
१२८ नोपालंभः शापेर्थः। किंतु शापतः शुध्यशुद्धिविवेचकः पुत्रदारादिस्पर्शादिरर्थः। नत्र पुत्रेण शापतीत्याद्येव प्रमाणं। अत एवान्म्यन्नो बुबुधि
तः। करकोशापेयंभावानुरक्तललनाखुरतेः शपथं। जीयेय यनकविनायमेकः परेणनस्मेहस्येमुर्कंघटकूर्परेणइत्तिघटकर्परः। वासुदेवा
याप्यतिगर्भ इत्यत्र देवपर्यालोचनं राधेरर्थः। चतुर्थ्यास्तत्समवेतत्वं। तथा च वासुदेवसमवेतं दैवं गर्गः पर्यालोचयतीति वाक्यार्थबोधः।
राधेरीक्षतेरप्युपलक्षणं। तेन कृष्णाय ईक्षते गर्ग इत्यादौ निरुक्तैव गतिः। मम पुत्रस्य कीदृशं शुभमशुभं वेति विविधस्य प्रश्नस्य गोचरतानु
वासुदेवपदेन न प्रतिपाद्यते। किंतु व्यंजनयैव। प्रश्नानंतरं तिंशुभाशुभपर्यालोचनं वा राधेरर्थः। गर्गाय शतं धारयतीत्यत्र ऋणत्वनिरूपि
तमधमर्णत्वं धारयतेरर्थः। फलीभूतर्णत्वाश्रयतया शतस्य कर्मत्वमुत्तमर्णत्वं चतुर्थ्यर्थः। तथा च गर्गवृत्त्युत्तमर्णत्वनिरूपितशतवृत्तिऋ
णत्वप्रतियोगिकाधमर्णत्वस्याश्रय इत्यन्वयबोधः। उत्तमर्णत्वं स्वामित्वविशेषः। ऋणत्वाधमर्णत्वे। स्वत्वस्वामित्ववदतिरिक्ते नव
पदार्थाननुगतप्रतीतिव्यवहारयोरशेषात्। स्वत्वाभाव एव ऋणत्वमिति वद् ऋणत्वाभाव एव स्वत्वमित्यपि स्यात्। यदि चोद्धारतास्य स्यपा। राम १२८

पविशेषस्य साधनं विनियोग ऋणत्वं। तदा पापसाधनविनियोग एव स्वत्वमिति स्यात्। अत नियोगकालेपि स्वत्वव्यवहाररूपाव्यवहारेण तु
ल्ययोगक्षेमः। शास्त्रमपि ऋणत्वे स्वत्वे च तुल्यं। शास्त्रस्याननुगतिप्रवृत्तिनिमित्तक ऋणपदघटितत्वमिव तादृशस्वपदघटितत्वमपि। इ
दं तु सिद्धांततत्वविस्तरेताव्यवस्थापितमिति नेह तन्यते। क्रुधद्रुहेर्ष्यासूयार्थधातुभिः सव्यपेक्षया। चतुर्थ्या विषयीभावः समवायोभिधी
यते। क्रुधिकुपिरुष्यादयो धातवः केवलद्वेषगुणवाचकत्वादकर्मकाः। शत्रवे क्रुध्यति कुप्यतीत्यादौ चतुर्थ्या द्विष्टतालक्षणो विषयताविशेषो
र्थः। द्विषिस्तु द्विष्टतोपलक्षितं द्वेषमभिधत्त इति न क्रुधिपर्याय इति। शत्रुं द्वेष्टीत्येव प्रमाणं। द्रुह्यतिर्द्वेषाचरणमर्थः। शत्रवे द्रुह्यतीत्यत्र च
तुर्थ्या द्वेषान्वयिसमवायोर्थः। शत्रुसमवेतद्वेषविषयकाचारवानित्यन्वयबोधः। परक्रियायोगो वरोद्वेषः ईर्ष्या सपत्नीभ्य ईर्ष्यतीत्यत्र क्रियान्व
यिसमवेतत्वं चतुर्थ्यर्थः। सपत्नीसमवेतक्रियां न सहत इत्यन्वयबोधः। परसमवेतक्रियायामीर्ष्यतिना फलविधया निर्दिष्टायां तद्विषये कर्म
णि द्वितीयैव प्रमाणं। भार्यामीर्ष्यति मेनामन्यो द्राक्षीदित्यत्र भार्याविषयकमन्यसमवेतं दर्शनं न सहत इत्यन्वयबोधः। परगुणेषु दोषारोपण त्वा
मसूया। वादिने असूयतीत्यादौ वादिसमवेतज्ञानं भ्रमत्वज्ञापयतीत्यर्थः। तत्रेदं मा कृतं यत्तु प्रकाशाकाराचरणैः। श्लातस्तावदहं शठेन विधि

प॰वा॰र॰ नानिद्रादरिद्रीकृतद्रव्यत्वविधिंप्रत्यस्मयोत्यन्यतरस्युक्तं। तत्रेदंमाकूतं। विधेर्नैसर्गिकोगुणोऽनिद्रादरिद्रीकरणे। तत्रज्ञात्वहेतुकत्वरू
१२१ पेणदोषत्वेनकामिनीसुखसमागमविच्छेदविरहत्वेनाऽरोपितमितिगुणोदोषात्मरूपास्त्रयाभावोऽभिव्यज्यतइति। ज्ञात्रुमभिक्रुध्य
त्यभिद्रुह्यतीतिवेत्याद्येकर्मासंज्ञानुक्रुधद्रुहोरुपसृष्टयोःकर्मेत्यनुशासनात्सिद्धा। प्रतिश्रवाश्रवायाऽग्रवापूर्वस्वीकारवाचिनो। याचनान्वि
तकर्मत्वंचतुर्थी। तत्रभाषतेप्रतिशृणोतेराशृणोतेश्चयाचनपूर्वकोदेयत्वेनाभ्युपगमोऽर्थः॥ ॥यत्तु॥ संविदागुःप्रतिज्ञानं। नियमाश्र
यसंश्रयाः। अंगीकाराभ्युपगमप्रतिश्रवसमाधायइति। नमल्लिंगानुशासनेआश्रवप्रतिश्रवावपिसंश्रवपर्यायत्वेनपपाठ। तदर्थंविदे
शात्रिप्रायेण। द्विजायगांप्रतिशृणोत्याशृणोत्याद्योचतुर्थ्याःकर्तृत्वमर्थः। सचयाचनान्वयी। द्वितीयोपात्तंकर्मत्वंयाचनांगीकारयोरु
भयोरपिसंबध्यते। तथाचद्विजकर्तृकागोकर्मकयाचनपूर्वकोदेयत्वेनाभ्युपगमोवाक्यार्थः। एवमनुशृणोतेःप्रतिशृणोतेश्च। सत्रांतप्र
वेकोत्साहनमर्थः। सत्रांसनंकथनंप्रोत्साहनंहर्षानुकूलोव्यापारः। होत्रेप्रतिशृणात्यध्वर्युरनुशृणातीत्यत्रचतुर्थ्याःत्रांसनहर्षसा
न्वितावृत्तिरर्थः। तथाचहोतृवृत्तिसंत्रांसनपूर्वकस्यहोतृहर्षानुकूलस्यकर्ताध्वर्युरित्यन्वयबोधः। परिक्रयस्यकरणसंप्रदानत्वमिष्यते। राम १२१

लभ्यत्वायःस्वीकारःसपरिक्रयः। भृतिर्वेतनादिः। तत्पूर्वकोयःस्वत्वानुकूलोव्यापारःसक्रयः। सनियतकालावच्छेदेनएकत्रविद्यमानस्य
त्वस्यजनकोयस्तदापरिक्रयइत्युच्यते। परिक्रयजन्यंस्वत्वंतत्रैववस्तुनियमासमात्रमवस्थायनश्यति। मासांतरादनंतरंतुस्वत्वांतर
मुत्पद्यते। व्यवस्थावशादेकमेववास्वत्वंयद्यत्कालावच्छिन्नवस्तुविषयकंतदानदाधर्म्यव्यवहारप्रयोजकमित्यपिलीलावतीप्रकाशेवर्धमा
नोपाध्यायैरुद्भावितं। परिक्रयकरणंचपत्रतिःसंप्रदानसंज्ञांविभाषयेति। ज्ञानेनज्ञातायवापरिक्रियते। शृपदस्यतृतीयाचतुर्थ्योःकर
णत्वमर्थः। सत्वस्वत्वेन्वेति। ज्ञानस्यस्वत्वंजनकदानव्यापारवृत्तयास्वत्वकारणस्यावाधात्। तथाचज्ञातकरणकस्वत्वजनकःपरिक्र
यइत्यन्वयबोधः॥ ॥परंतुप्रतिदानजनितनियतकालकस्वत्वजनकःपरिग्रहःपरिक्रयइत्युच्यते। तत्रशतेनतादात्म्येनज्ञानस्या
न्वयः। संसर्गतयालब्धकरणत्वस्यानुवादिकात्तृतीयाचतुर्थ्यौवाज्योतिष्टोमेनयजेतेत्यादिवदित्याहुः। ग्रामायगच्छतीत्यत्रकर्म
त्वमपिचतुर्थ्यर्थः। गत्यर्थकर्मणिद्वितीयाचतुर्थ्यौचेष्टायामनध्वनीत्यनुशासनात्। चेष्टायामितिग्रामार्थकगमेर्व्यवदासः। अ
नध्वनाध्वनगच्छतीतिप्रयोगवारणायतेनमनसाव्रजतिहरिमित्येवप्रमाणं। ननुहरयइति। चेष्टापदंक्रियासामान्यपरं। ग्रमाय

प॰वा॰र॰ गच्छविरहैषयइतिप्रयोगात्।अत्रचेष्टाभिन्नेऽगत्यर्थेऽध्वनिचतुर्थीनिषेधमात्रेतात्पर्यं।स्पंदमात्रवाचिनिगमेतन्ञन्यफलवतिसं
प्रदानतुष्येग्रामायगच्छतीतिप्रयोगस्योपन्नतयापृथग्विधेरवानवकाशादितिमहाभाष्यकृतः॥ ॥इतिपदवाक्यरत्नाकरेकारक
१२२ चतुर्थीविवरणं॥ ॥साहृश्यमपकर्षोवायनोमन्यतिकर्मणि।अनाहृतेनञाबोध्यश्चतुर्थीतुनतोभवेत्।नत्वांतृणायतृणंवामन्यत
इत्यत्रसाहृश्यमपकर्षोवानञर्थः।द्रोणिर्मर्यादयाहीनोब्राह्मणोनैषदुर्मतिरित्यादौव्यस्तनञापिनिकृष्टबोधनात्।तृणपद
समभिव्याहृतयाद्वितीययाचतुर्थ्यावानञर्थोन्वयिप्रतियोगित्वमुच्यते।साधुत्वमात्रार्थोवास॥नानुयाजेषुयजतीत्यत्रेव।तथा
चतृणप्रतियोगिकेनसाहृश्येनापकर्षेणवात्वांजानामीतिशाब्दान्वयबोधः।ततोनाहृतस्त्वमितिनिर्देशजनकोमन्यते।कर्मणपन्न।
इतिबोधोनतुशाब्दः।यत्रतुनानादरोव्यंजनयाप्रतीयतेतत्राश्वपत्नंनद्विजंमन्यइत्यादौनचतुर्थ्यसाधुः।दृश्यतेचवैजयंतनिकोबोध
सापेक्षापदानांसाधुता।अतएवरूपंवरअभिसादौवैयंजनिकप्रयोजनप्रतिपत्तिभावरूपपदस्यतद्रूपसाधुतयानेयार्थतानाम
दोषः।अतएवदवदजितःसत्रात्रुर्नहतोजल्पस्तवतवासमीत्यादौहर्षभपादौत्योत्यपुनरुक्तंसाधुनेतरथा।नचात्रहर्षादिःप्रतीय राम १२२

ते।अतएवसुंदरसुंदरसृथातेसौंदर्यं।अज्ञनार्जनसात्यकेसात्यकेभवतामासौर्दशांवलिंकरोमीत्यादावामंत्रितस्यवाक्यादेर्विभाषे।
स्याकोधादौद्यात्स्यसाधुनापरथा॥भवतुवा।तृणसदृशतदपकृष्टादौतृणपदस्यलक्षणा।तस्यात्वसदार्थेतादात्म्येनान्वयः।नञ्परम
नाहृतवाचि।तृणवदनाहृतत्वांमन्यइत्यन्वयबोधः।यद्दिचमन्यतेःकर्मणोयस्मादनुक्तस्यापकृष्टता।नञ्बोध्यस्याद्वितीयावाचतु
र्थीप्राणिवर्जितादितिशाब्दिकस्मृतिविरोधाद्वयं।अत्रमन्यतेश्यनविकरणधातुनिर्देशात्तनादेर्मनोव्युदासः।तेनत्वां
मनुतइत्येवप्रमाणं।नतुतृणायेति।अनुक्तस्यकर्मयादइतितुनत्वंकोरोममतइत्यत्रकीदायेतिप्रयोगवारणायतत्रकर्मणः
प्रत्ययेनाभिहितत्वात्।परेतुअयुक्तेवापकृष्टेतिपठित्वाश्वपत्नंनद्विजन्मन्यइत्यादौयुक्तापकर्षवाचिनञोऽनेनउदासः।अत्रचतुर्थी
साहृश्यवना।नञ्पदविमुक्तापिप्रमाणं।सदृशत्वंतृणादीनामनुक्तेमन्यकर्मणि।द्वितीयावच्चतुर्थ्यापिबोध्यते।बाधितंयदीत्या
पिशालीस्मरणात्।अतएवतृणायमत्वारघुनंदनस्तइक्षःप्रधानंप्रधानान्निरास्तदितिभट्टिः।तृणाभ्यांमन्यतेकामक्रोधोयःपं
चकारयन्नितिश्रीहर्षः।नञाभेदबोधनइवनिकर्षसाहृश्यादिबोधनेपिप्रतियोग्यनुयोगिपदयोस्तुल्यवचनत्वंतंत्रं।तेनतृणा

प.वा.र. १२३ यद्युवांमन्यइत्यादिकोनप्रयोगः।त्वान्ननावमन्नकाकंशृगालंवामन्यतइत्यत्रचतुर्थीनिषेधायप्राणिवर्जितादिति।प्राणिनस्तुनौकाका
न्नशृगालानांप्राणित्वपारिभाषितमितिस्मृत्यापरिभाषिता।तेननत्वांशुनेनकीटायवामन्यइत्याद्युपपन्नमनुपपन्नंचनत्वामन्ना
यमन्यइति।अन्येतु।।नत्वांतृणायमन्यइत्यादौतृणपदस्यतृणसदृशार्थः।तस्यचत्वत्पदार्थेऽभेदान्वयोपपादकतयाकर्मत्वाद्विका
द्वितीयाप्रसक्तौ।दंडिनंपुरुषंजानातिवत्।अत्रमन्यकर्मविशेषणेसदृशलाक्षणिकपदेद्वितीयावच्चतुर्थ्यनुशिष्यते।मन्यतेमुख्यकर्म
णितुनचतुर्थी।मन्यकर्मण्यनादरेविभाषाप्राणिष्वित्यनुशासनेऽनादरनिमित्तसादृश्यप्रतियोगिवाचकपदार्थइत्यर्थकस्यकर्मविशे
षणत्वात्।नञ्पदस्यानादरोर्थः।आदरोनामइष्टानिष्टसाधनत्वेनप्रतिसंधानं।तदुद्देश्यत्वकर्मकमननत्वावच्छेदेनान्वेतीतितस्या
प्यहिताहितसाधनत्वमर्थतः।पर्यवस्यतीत्याहुः।।नमःस्वस्तिस्वधास्वाहालंवषड्योगेपक्षिता।चतुर्थीसंप्रदानत्वविषयत्वाद्विशं
सति।पुष्पंशिवायनमइत्यत्रदानकर्मनमःपदार्थः।चतुर्थीचसंप्रदानत्वार्था।तथाचशिवसंप्रदानकर्मपुष्पमित्यान्वय राम
बोधः।ब्राह्मणायगौर्नमइतिवाक्यमपिप्रमाणमेव।परंतुनेदंत्यागवाक्यंधर्म्यं।नामगोत्रसमुच्चार्यसम्यक्श्रद्धान्वितोद १२३

दत्।संकीर्त्यदेशकालादितुभ्यंसंप्रददेइतिदानवाक्यस्यप्रतिनियमनात्।भवतुवामत्रकरणत्यागकर्मनमःपदार्थःमंत्र
करणकोपकारजनकत्यागकर्मणिनमःपदार्थेत्यागान्वयितदुद्देश्यकत्वंचतुर्थ्यर्थः।तथाचशिवोद्देश्यकस्यमंत्रकरण
कस्यत्यागस्यकर्मपुष्पमित्यन्वयबोधः।भवतिचशिवायनमइतिवाक्यंमंत्रः।चतुर्थ्यंतनमोंतवाक्यस्यमंत्रत्वपरि
भाषणात्।तादृशमंत्रस्तुदैवतोद्देश्यकत्यागस्यैवोपकारकोनतुब्राह्मणसंप्रदानकस्येति।ब्राह्मणायगौर्नमइ
तिवाक्यंनप्रमाणं।ब्राह्मणस्यापिदेवतात्वविवक्षायांतुब्राह्मणायनमइतिवाक्यंदानांगब्राह्मणपूजादौदृश्यते।मंत्रवा
क्येशिवादीनांदेवतात्वंपुनरर्थगम्यंतुश्रौत।ऐंद्रंदधीत्यादितद्धितेनहीन्द्रशब्दस्यस्वरूपपरतायांचतुर्थ्यंतकरणकत्या
गकर्माभिधीयते।नेदंकेदेशेचतुर्थ्यंतेनतादात्म्येनान्वयः।यदिपुनरिंद्रोनामचेतनादेवदेवताप्रामाणिकी।नेदंइंद्रपदार्थइंद्रः
प्रतिपाद्यप्रतिपादकभावात्मकेनैवसंसर्गेणचतुर्थ्यंततेपदेन्वेति।भवतुवेंद्रप्रतिपादकमिंद्रपदत्वमेवेंद्रपदार्थः।नतु
तादात्म्येनैवचतुर्थ्यंतपदेभासतेतोअतएवशाक्रायस्वाहेत्यादिप्रक्षेपवाक्यमश्रौतं।यदाम्नायेचप्रजापतयेजुहोतीत्यादौ

प॰वा॰र॰ अग्निवृत्युद्देश्यतादृगेवहोमःश्रौतः।नत्रचतुर्थ्यंताअग्निकरणकर्त्तव्यन्यायगम्यनइति।तद्धितापेक्षयाचतुर्थी।सांक्षोद्दे
१२४ ताश्रुत्यभावात्।यदाऊः।तद्धितेचतुर्थ्यावामंत्रलिंगेनवापुनःदेवतात्वश्रुतिस्तरेत्रदुर्बलंतुपरस्परमिति।यथाशि
वायनमइतिवाक्येपिनमःपदार्थकदेशत्यागः।न्वितमुद्देश्यत्वाभिधंसंप्रदानत्वमेवचतुर्थीप्रतिपादयति।उद्देश्य
त्वं।तन्निष्ठाप्रतीरेव।तेनशिवप्रतीतिजनकत्यागकर्मैवाक्यार्थः।परमात्मनिशिवप्रीतेतज्जनकत्यवा।बाधितत्व
तुप्रीत्युद्देशिकेछत्रच॰तुर्थ्यर्थः।तत्रालंबनत्वेनशिवस्यान्वयः।शिवःप्रियतामितिबाधितविषयकेछासंभवात्।ता
दृशेछाप्रयोजकत्वंचत्यागेप्रतीयते।फलेछायाउपायेछाप्रयोजकत्वात्।पूर्वंशिवायनमइतिनतिरपिनमसोर्थः।
शिवविषयिणीनतिरित्यन्वयबोधः।प्रजाभ्यःस्वस्तीत्यत्रसंबंधएवचतुर्थ्यर्थः।स्वस्त्यर्थस्यकुशलंतेनप्रजासंबंधि
कुशलमित्यन्वयबोधः।आशंसायांतुप्रजाभ्यःप्रजानांवास्वस्तिस्यादित्युभयमपिप्रमाणं।चतुर्थीचाशिष्यायुष्य राम्
मद्रभद्रकुशलसुखार्थहितैरित्यनुशासनेपर्याययोर्मद्रभद्रयोर्ग्रहणादायुष्यकुशलादीनामपिपर्यायग्रहणात्सग १२४

मात्।अतएवाशास्येर्हितकुशलाद्यर्थैर्योगेचतुर्थीवेतिभागुरिः।अनुशासनेचायुष्यंचिरंजीवितं।मद्रंभद्रंचमंगलं। १.
अतएवाशास्यैर्हितकुशलाद्यर्थैसाक्षात्सुखसाधनंपुत्रजन्मादि।कुशलमनागमं।दुःखसाधनभावःसुखमात्मनगु
णविशेषः।स्वतःकमनीयः।अर्थंप्रयोजनमिछाविषयः।हितंकालांतरभावीष्टसाधनताकंयागभेषज्यादि।अशि
षीतिमार्कंडेयंस्यायुष्यमस्तीसाधोचतुर्थीमुदासाय।अनाशिष्यपिस्वस्तियोगेचतुर्थीप्राप्तेयषष्ठीनिषेधायचनमःस्व
स्तिस्वाहास्वधालंवषट्योगाच्चेतिसूत्रेकुशलपर्यायस्यस्वतःपृथग्ग्रहणं।स्वाहापदस्यापिहोमकर्मार्थः।तत्रहोमान्वयि
उद्देश्यत्वंचतुर्थ्यर्थः।हविरग्नयेस्वाहेत्यत्राग्न्युद्देश्यककेमेहोमेहविरित्यन्वयबोधः।वन्हिसंयोगजनकप्रक्षेपोत्तरांग
त्यागोजुहोतेर्मुख्यार्थः।अनग्निकर्त्तृकब्राह्मणपाण्याद्यधिकरणकप्रक्षेपांगकत्यागेग्नौकरणहोमादौतुजुहोतिगौ
णः।तत्राग्नयेकव्यवाहनायस्वाहेत्यत्रस्वाहापदमपितथा।पितृभ्यःस्वधेत्यत्रापिपितृउद्देश्यकत्यागः।स्वधापदार्थः
तत्रत्रैवर्णिकत्वपिंडितलपितृत्वं।पारशवस्यपितानत्रैवर्णिकिनसपिंडितः।किंतुदैवतमात्रमिति।नतत्रस्वधाश

प.का.र. स्वप्रयोगः।त्रैवर्णिकेनपिंडितस्यपात्रौत्राब्देबुद्धिंजनयत्येवबाधकाभावात्।भवतुवास्तुवाथाकारणकत्यागकर्मैव
१२५ स्वधापदार्थः।शूद्रकर्तृकत्यागेन+त्वेनक्रियमाणेप्रत्याब्दिकादौस्वधाशब्दप्रयोगानिषेधात्प्रत्यवायजनकस्तेनप्र
त्रारवेनप्रयुक्तस्तथाविधशब्द+स्वधाकरणकः।अलमितिपर्यास्त्यर्थकानांग्रहणं।पर्याप्तिरपित्वात्स्यंनिग्राहकत्वंच।
अलंजगतेःप्रभुःसमर्थः।शक्तोवाक्यमवानित्यादौजगन्निरूपितस्यस्वाम्यस्यनिग्राहकत्वस्यवाधिकरणंभगवानि
त्यन्वयबोधः।अश्वादियोगेषष्ठ्यपिसाधुः।सएषांग्रामणीरित्यादिनिर्देशात्।अतएवप्रभुर्बुभूषुर्भुवनत्रयस्ययइति
माघः।दैवतसंप्रदानकत्यागकर्मवषट्पदार्थः।वषडिंद्रायेत्यादाविंद्रोद्देश्यकस्यदानस्यकर्मेत्यन्वयबोधः।उपलक्ष
णमिदं।सनकादिमनुष्येभ्योहंतेत्यत्रहंतयोगेपिचतुर्थीदर्शनान्मनुष्येभ्योदानंतत्कर्मवाहंतपदार्थः।नन्वृत
स्यतिनमस्करोतिवादेवानित्यत्रनमस्यतेर्नमस्कारोनेश्वरनत्यनुकूलोप्रयत्नोर्थः।नमोवरिवःश्चित्रङः क्य
जितिसूत्रेणकरणेक्यच्विधानात्।शब्दवैरकलहाभ्रकण्वमेघेभ्यइतिसूत्रात्करणइत्यस्यानुवृत्तेः।तथाच। राम १२५

शब्दायतिवन्नमस्यतिरकर्मकएवस्यात्।धात्वर्थांतर्भूतकर्मकत्वात्।एवंनमस्करोतिरपि।यदिचनमस्य
तिनमस्करोतिधातूननावेवरूढौनतुयौगिकौ।व्याकरणरूत्पादनंपुनरुणादिरूत्पादनवद्बालोपलालनं।त
थाचदेवान्नमतीतिवद्देवान्नमस्करोतीत्यपिविषयत्वरूपगौणकर्मत्वार्थकद्वितीययोगादुपपद्यतइत्यु
च्यते।यदिवासकर्मकलक्षणोक्तरीत्यामुंउयंतेरिवनमस्यतेरपिसकर्मकत्वमित्यभिधीयते।तदास्वयंभुवे
नमस्कृत्येत्यादिप्रयोगोनुपपन्नः।उपपदविभक्तेःकारकविभक्तिर्बलीयसीतिन्यायादितिचेत्।उच्यते।
अध्याहृतेतुमर्थस्यधातोःकर्मानुशासति।फलेभ्योगच्छतीत्यादौचतुर्थीव्यक्तियोदिता।विद्धत्तेरावक्ति
यार्थोपपदस्यकर्मणिस्थानिनइतिक्रीयीतरगुणीभूतक्रियावाचकधातुप्रकृतिकस्यतुमुनःस्था
निनोनित्यप्रयुज्यमानस्यकर्मणिचतुर्थीत्यादिस्यर्थिकाव्याक्रियाफलेभ्योगच्छतीत्यत्राहर्तुमध्याहृतत

प॰चा॰र॰ त्कर्माभिधायिनीचतुर्थी।तथाचफलकर्मकाहरणार्थकंगमनंवाक्रियार्थः।एवंस्वयंभुवेनमस्कृत्येत्यत्रप्रीणयितुमित्यध्या
१२८ हारेणस्वयंभुवंप्रीणयितुंनमस्कृत्यन्वयबोधः।उपकारकानामतादर्थ्यंतस्यभूयसीविधातादर्थ्येविहितचतुर्थ्या
प्रतिपाद्यते।तादर्थ्येऽनुशिष्टाचतुर्थी।तादर्थ्यमाह।तादर्थ्यंचोपकारकत्वं।सोऽर्थोयस्येतिबहुव्रीहेरनंतरंभावप्रत्ययो
र्थोर्थवतोःसंबंधमभिधत्तेकृत्तद्धितसमासेभ्यःसंबंधाभिधानंभावप्रत्ययेनेतिहरेरनुशासनात्।अर्थार्थवतोश्चोपका
र्योपकभावएवसंबंधः।उपकारकत्वानबहुविधा।क्वचित्कार्यकारणभावः।पटायतंतवोघटायवर्णधुरित्यादौ।क्वचित्तन्निष्ठोपका
रकजनकत्वं।यथाश्वायघासोब्राह्मणायपदधीत्यादौ।क्वचिदपकारकत्वं।यथामशकेभ्योधूमोहरिणेभ्योवागुरेत्यादौ।तादर्थ्यप्र
काराःसर्वेकारणत्वोपकारकत्वानियथा।यथंचतुर्थ्यर्थोः।तुमर्थाद्भाववचनादितिसूत्रेणसाधिता।चतुर्थीतुल्यकर्तृत्व
मुद्देश्यत्वंचतत्रासति।तुमर्थाच्चभाववचनादितिसूत्रविहिताघञ्ल्यादयःक्रियायांक्रियार्थायांविधीयंते।नतश्चतुर्थीतुमर्थानभि राम १२८
धत्ते।तुमर्थस्तुतुल्यकर्तृकत्वंतदुद्देश्यकत्वंच।पक्तुंगच्छतीत्यत्रपाकतुल्यकर्तृकापाकोद्देश्यिकागमनक्रियावा।

वाक्यार्थः॥शाब्दिकास्तुभाववचनाश्चेतिसूत्रेणभावेविहिताघञादयःक्रियायांक्रियार्थायांविधीयंते॥ततस्तादर्थ्येस्यघञआम्न
न्तत्वात्प्रातिपदिकार्थमात्रेप्रथमाप्राप्तातदपवादायतुमर्थाच्चभाववचनादि॥त्यनेनचतुर्थ्यनुशिष्यते॥एतेनभावघञंतात्सादिका
शब्दात्तादर्थ्येचतुर्थी।चतुर्थ्यापाकायगच्छतीत्यादिप्रयोगोपपत्ताविदंतुमर्थादित्यनुचा॥श॰रनमनर्थकमितिनिसमर्थ्यंनन्वेवंभा ३४
ववचनादित्यस्यतादर्थ्यार्थकत्वेभाववचनेत्यनुशासनमेवव्यर्थंभावघञंतात्तादर्थ्येचतुर्थ्यैवपाकायव्रजतीत्यादिप्रयोगोपपत्ते
रितिचेन्न॥क्रियायाक्रियांतरतादर्थ्ये।विवक्षायांविशेषविहितेनतुमुन्घञोऽपवादात्पाकायेत्यस्यानुपपत्त्याघञोविशेषवि
ध्यंतरावश्यकत्वादित्याहुः॥चतुर्थ्यर्थोज्ञापकत्वमुत्पातेनतोपलक्ष्यते॥गुणीभूतंभाविपथावातायकपिलातडित्॥वातायकपि
लातडिदित्यत्रवस्तुनउत्पातभूतायांकपिलतडितिवातविशेषितज्ञापकत्वंचतुर्थ्याप्रसाध्यते।उत्पातातुज्योतिःसंहितासु
लक्षिताबहुविधादिव्यभौमांतरिक्षाः।उत्पातत्वमपिवाक्यार्थबुद्धौविषयइतिपुनरप्रामाणिकंधातुयोगेकारकविभक्तिरि
त्युत्पातवाचिपदयोगेज्ञापकत्वार्थेचतुर्थीसाधुरितिसूचयितुमुत्पातेनज्ञापितेचेत्यनुशासनेउत्पातग्रहणात्॥इतिचतु

प०वा०र० ष्ठीविवरणं॥ ॥ ङसिभ्याम्भ्यसङ्कस्येषाविभक्तिः पंचमीतत्रां॥ अपायेति ध्रुवत्वंचेत्यपादानत्वमुच्यते॥ ङःसिभ्यांभ्यसितिपंचमीतत्रउ
१२८ क्तारेणबंधः॥ नरोः पत्रंपतनीत्यत्रापादानत्वंपंचम्यर्थः॥ नच ध्रुवत्वेसतितत्क्रियाजन्यविभागाश्रयत्वं॥ अतएवपत्रस्यनस्वक्रियापादा
नत्वं॥ नवाकुड्यात्सततोश्वात्सततीत्यादौपतनानरवत्यश्वेनदिनरवत्वकपततनापादनत्वहानिः॥ यत्तुहरिणा॥ अपायेयदुदासी
नंचलवायदिवाचलं॥ ध्रुवमेवतदावेशात्तदपादानमुच्यते पततोध्रुवएवाश्वोयस्मादश्वात्पतत्यसौ॥ तस्याप्यश्वस्यपतनेकु
ड्यादिध्रुवमुच्यते॥ उभावप्यध्रुवौमेषौयद्यप्युभयकर्मजे॥ विभागेप्रकृतंतुक्रियेतत्रविवक्षितोमेषांतरात्क्रियापेक्षमवधित्वंपृ
थक्पृथक्॥ मेषयोस्स्वक्रियापेक्षंकर्तृत्वंभवितत्त्वपृथक्पृथगेवतिउक्तमस्ति अत्रापायेविभागेसतीतिविशेषउदासीनंविभा
गजनकक्रियानधिकरणं॥ तदावेशात्॥ विभागजनकक्रियानधिकरणत्वात्॥ ननुपरस्परस्मान्मेषावपसरतइत्यादौउभय
कर्मजन्येविभागेविभागजनकक्रियानधिकरणत्वंनकस्यापिमेषस्येत्याशंकते॥ उभावपीत्यादि॥ नविभागजनकत्वेनक्रियाप्र राम
वेशनीया किंतुतादृूप्येणेतिनानुपपत्तिरितिसमाधत्ते॥ प्रविभक्तेत्वित्यादि॥ तस्तथापिपर्यायः॥ नन्वयादेस्संज्ञावस्त्वे १२८

कथंकर्तृसंज्ञामेषयोरकाडारादेकासङ्गानादित्याशंक्यभिन्नाभिन्नक्रियानिरूपितकारकांतरसमावेशोनविरुद्धइत्याशयेनाह
मेषांतरात्क्रि विवरणवशात्कथितएवार्थोपर्यवसानेतत्रक्रियादेरन्यत्वम्पत्वाद्विभागजनकत्वंभेदप्रतियोगितावच्छेदकत्वंचपं कृ
चम्यर्थः॥ तथाचनरोः पत्रंपतनीत्यत्रतत्समवेतविभागजनिकातद्भिन्नभेदप्रतियोगितावच्छेदिकापतनक्रियाधात्वर्थः॥ पंचम्यर्थवि
भागेतदर्थैकदेशेभेदेचतद्वृत्त्यादिनाप्येकएवप्रकृत्यर्थोयोगपद्येनान्वेति॥ तेनपत्रांतरनिष्ठान्योन्याभावप्रतियोगितावच्छेदिकायेनतत्रत्य
नरादिविभागजनिकायेनतत्वत्क्रियामादायपत्रात्पत्रंपततीतिनप्रयोगः॥ यत्तुविभागएवपंचम्यर्थोनचैवंपत्रात्पत्रंपततीतिप्रयोगप्रसं
गः॥ पत्रस्यपरमाकर्तृत्वसत्त्वयाअपादानसंज्ञाबाधात्संज्ञायाएवचविभक्तिनिष्पादकत्वादितितन्न॥ एवमपितरोः पत्रंपततिनपत्रा
दित्यत्रपत्रसमवेतविभागजनकत्वाभाववाधेनबाधप्रसंगात्॥ अत्रहिनागुणात्पततीतिवृद्धिभागेप्रकृत्यर्थसमवेतत्वस्यपतनेवा
तत्समवेतविभागजनकत्वस्याभावःप्रत्येतुंनशक्यते॥ अयोग्यत्वात्॥ ननुशिष्यातेपिपत्रसमवेतक्रियायांपत्रनिष्ठविभागजकत्वपत्रां
तरनिष्ठान्योन्याभावप्रतियोगितावच्छेदकत्वोभयसत्वात्तन्निषेधोनुपपन्नः॥ नचनदोषस्तत्रानुपादकत्वसमुदायोनिषिध्यत

१०वा०र० इतिपूर्वोक्तभाष्यंसाप्रनंतयुगसहस्रेणापिनिर्णेतुमशक्यत्वात्॥नचस्ववृत्तिविभागजनकत्वस्ववृत्तिभेदप्रतियोगितावच्छेदकत्वोभयसं
१२८ सर्गावच्छिन्नप्रतियोगिताकः पत्रसामान्याभावएवक्रियायांभासते॥पंचमीतुप्रतियोगितावच्छेदकसंसर्गानुवादिकेत्यपिसूच्यते॥वृ
त्यनियामकसंसर्गप्रतियोगितावच्छेदकत्वस्याभावात्॥भावेवाविभागप्रतियोगिताकत्वविशिष्टजनकत्वस्वरूपसाक्षात्संसर्गावच्छिन्न
प्रतियोगिताकाभावस्ययत्रापादानक्रियायामपिनिराबाधत्वमापत्त्राद्युत्पत्तीतिप्रयोगप्रसंगात्॥नचपरंपरासुद्रूपानादृश्यसंसर्गावच्छि
न्नप्रतियोगिताकाभावएवपंचम्यंतपत्रपदसमभिव्याहृतेनआबोध्यते।परंपराहिविभागनिरूपकत्वजनकत्वान्यैवपरस्परसंवलि
तानिसंसर्गः॥तत्रपत्रत्वावच्छिन्नप्रतियोगितानिरूपिताविभागसंसर्गितानिरूपकत्वेनत्याचजनकत्वे।संसर्गतानन्निरूपिताचानु
योगितान्अर्थाभावेभासते।विभागीयत्वविशिष्टजनकतास्वरूपसाक्षात्संसर्गविशिष्टधर्मानवच्छिन्नासंसर्गताजनकतावृत्तिप्र
तियोगिताभ्यांनिरूपितत्वइतिवाच्यंपरंपरासंसर्गतासुप्रथमाप्रतियोगितयाचरमानुयोगितयाप्रथमैववानुयोगितयाचमैषप्रतियोगितया राम
निरूप्यतइत्यत्रविनिगमकाभावात्।दृश्यंतेचप्राचांनिबंधेषुप्रतियोगिविश्रांतासंसर्गरचना॥नचोभयथापिप्रतियोगितानुयोगि १२८

ताभ्यांप्रथमचरमसंसर्गतयोर्निरूपणेपिविशिष्टसंसर्गतोनोविवेउपपद्यतइतिवाच्यं।विलोमानुलोमानुलोमपरंसर्गावच्छि
न्नप्रतियोगिताकाभावयोरविशेषप्रसंगात्।विस्तरतोव्युत्पादितंचास्मिभ्रांतत्वपरंपरायाः संसर्गत्वस्यैवनितरांप्रतियो
गितावच्छेदकत्वस्यनिराकरणमितिचेदुच्यते।निष्पुष्पवंतमितिपदद्वयमप्रतियोगिकः।पंचम्यर्थस्याप्यभावोद्विविधःप्र
तियोगिता।पुष्पवंतौनेसादौद्विवोपरूपकस्याद्विवचनस्यसत्वेपिनिष्पुष्पवंतमित्या।व्ययीभावेसूर्याचंद्रमसोरसंनाभा
वोन्यूनवृत्तिभ्यामपिसूर्यत्वचंद्रत्वाभ्यामवच्छिन्नव्यासक्तप्रतियोगिकताकः प्रतीयतइतिपत्रादिसादौविभागजनकत्व
भेदप्रतियोगितावच्छेदकत्वपर्याप्तप्रतियोगिताकोप्यभावोभासतइत्यभ्युपेयंपादिचपुष्पवंतपदादेः सूर्यचंद्रोभयाद्यर्थ
त्वदाभवतुपंचभ्याअपिनिरुक्तोभयंतथा॥साचोभयत्वावच्छिन्नप्रतियोगिताजनकतानिष्ठयावच्छेदकतात्वनिष्ठयाव
च्छेदकतमानिरूप्यते।उभयत्वनिष्ठावच्छेदकतैववासामानाधिकरण्येनजनकतावच्छेदकतात्वाभ्यामवच्छिद्यते।जनक
तात्वनिष्ठावच्छेदकतानिरूपकत्ववृत्त्या।साचविभागवृत्त्यवच्छेदकत्वनिष्ठानुप्रतियोगितावृत्त्या।साचभेदनिष्ठयावच्छे

१० शा० र० रकतयानिरूप्यते।स्रोतोद्वयसुखस्पर्शत्वभेदविभागयोरवच्छेदकताद्वयमेकयैवपत्रत्वावच्छिन्नावच्छेदकतयानिरूपितममुमेवावयंत्र
१२९ पत्रेविभागजनकत्वंतत्रभेदप्रतियोगितावच्छेदकत्वंत्रियांनास्तीतिप्रामाणिकाव्यवहरंति। नह्यस्मादृश्यादनुगतार्थविशिष्ट
बुद्धिर्नजायतइतिआनुभविकं।एतादृशाभावावगाहिनीयत्रत्वावच्छिन्नैकप्रकारतानिरूपितविभागभेदोभयविशेष्यता
कः प्रकारताद्वयनिरूपितैकविशेष्यताकस्यसंशयादेरिवविशेष्यताद्वयनिरूपितैकप्रकारताकस्यापिबोधस्याभ्युपेयत्वात्॥
अतएवसंशयाव्यवहितोत्तरंनप्रत्यक्षमिति।वाक्येनमानांतरेणवायस्मात्संशयादव्यवहितायस्मादुत्तरंप्रत्यक्षंप्रत्याय्यते।
संशयत्वावच्छिन्नप्रकारतयाव्यवधानोत्तरत्वयोर्विषयतयोस्ताभ्यांचप्रत्यक्षविशेष्यतायांनिरूपणेनफलतएकतमसंशया
व्यवहितपूर्वस्यचिरातीतसंशयांतरोत्तरस्यप्रत्यक्षानवगाहनात्।येप्यव्यवधानोत्तरत्वाभ्यांसंसर्गाभ्यांसंशयत्वप्रत्यक्षमेवप्र
स्तवाक्यादिनाप्रतिपद्यतइतिगौडाव्यपदिशंतितेकिलसंसर्गताद्वयनिरूपितापूर्वप्रकारताभ्युपगमेनकिमिवफलमुपलं राम
भतइतितएवजानंति। संशयाव्यवधानघटकाश्चनपरस्परसंसृष्टाइत्यादिविपरीतदर्शनेनैतादृशादृशबुध्यनुदयेनाव्यव १२९

धानघटकपदार्थोपस्थितिसपेक्षयाचाव्यवधानादौविशेष्यत्वाभ्युपगमावश्यकत्वेसंसर्गत्वेप्रमाणाभावः परमधिकं॥एवमे
वधूमत्वादिसामान्यसंतर्भाव्यवन्ह्यादेः कारणत्वमपिसुग्रहं।तत्क्षणाव्यवहितपूर्वत्वलक्षणावच्छेदेनतत्क्षणाधिकरणेविद्यमान
स्याभावस्यप्रतियोगितासामान्याभावोवन्हौधूमकारणता॥सचएकएवनचधूमव्यक्तिघटितकूटात्मकोसौसहस्रेणापि
दुर्ग्रहत्वात्।संभवतिचैकविधधूमत्वावच्छिन्नावच्छेदकतयानिरूपितमव्यवहितपूर्वक्षणावच्छिन्नत्वेधिकरणत्वावच्छेद
कताद्वयानिरूपितंविद्यमानत्वेनान्याभावेएकैकमवच्छेदकत्वंतन्निरूपिताप्रतियोगितावच्छिन्नाप्रतियोगितातन्निरूपि
कोऽननुगतसामान्याभावस्तद्बुद्धिंप्रतिचधूमत्वावच्छिन्नप्रकारतानिरूपिताव्यवहितपूर्वक्षणावच्छिन्नत्वाधिकरणत्व
त्तिविशेष्यताद्वयनिरूपितविद्यमानतायैकविषयताकोव्यभिचारग्रहएवविरोधीनतुधूमांतराव्यवहितप्राक्क्षणाव
च्छेदेनध्वंसांतराधिकरणविद्यमानवन्ह्यभावावगाहीत्यधिकंबौद्धाधिकारविवरणेविवृतमासीत्।नन्वेवमपिवृक्षादा
एतेसंयोगइत्यादिप्रयोगोदुर्वारः॥आसन्नाश्चलिंगइत्यादेरखिलस्येष्टत्वेपितरोस्तज्जनीतिचेत्॥क्वचित्साभिजहत्यादिवि

१०श०र० भागफलिकाक्रियां॥उक्तार्था- नामप्रयोगानाचापादानपंचमी॥ स्वजन्यादिनाविभागजनकक्रियावाचिनापंचम्यर्थस्यक्रोडीक
१३० तत्वादुक्तार्थानामप्रयोगइतिन्यायात्तद्वाचिशब्दान्नपंचमी।किंतुविभागान्विताधेयत्वार्थिकाद्वितीयैवेपरयाकर्मसंज्ञयापादान
संज्ञाबाध्यतइतितुवैय्याकरणाः॥नन्वेवमपसरत्सादेर्विभागफलकक्रियावाचितयासभातोपसरतीसादोपंचम्यनुप
पत्तिः॥नहिस्पंदत्वपसरत्वयोरेकार्थतमनुभवविरोधादितिचेदुच्यतेनोयदेशांतरसंयोगफलकस्पंदवाचिनः।अकर्मकानिरत्ना
यपंचमीनान्वपेक्ष्यते॥निर्गम्यपसरत्यादिधातुर्बहिरादिदेशसंयोगफलकक्रियावाचीधात्वर्थांतर्भूतकर्मकस्तेनविभाग
स्यफलविधयानुपादानात्पूर्वदेशस्यापादानत्वनिराबाधमित्यनभिहितविभागाभिधानायगृहान्निर्गच्छतिसदसोपसर
तीसदसिभापंचम्युपपुच्यतएवमूर्ध्वसंयोगफलक्रियावाचिनएवउध्वरतेर्योगेपिस्थाल्याःपुलाकमुध्वरतीसाद्वेपंचम्यव
सेया।कुतोभवान्प्रतिधान्दृथपनाद्दियोजनेविधुः॥इत्यादावागमनादीनांमध्याहारेणसंगतिः॥कुतोभवानितिप्रश्नेप्रति राम
पननगरादित्युत्तरेचागनइति॥पनाद्दियोत्ततेविधुयुदित्यत्रतिः सन्येत्मध्याहत्यपंचम्युपपादनीया।तेरार्विभाजनेमत्र १३

मस्मोविभजनेत्वन्वाइत्यादाववधित्वार्थोउ·सिधोत्नुमपेक्ष्यते।विभजिर्द्विधा।केवलविभागवाची।फलावाचकत्वादकर्म
कः।विभागजनकविभागव्यधिकरणविभागव्यधिकरणेरलनादिक्रियावाचीसकर्मकः।तत्रोभयत्रपंचम्याविभागान्वि
तमवधित्वमवधिमत्वंचार्थः।तच्चस्वरूपसंबंधोनिरिक्तोवापदार्थइत्यन्यदेतत्।तथान्तरो: पत्रेविभजत्वइत्यत्रतर्व्व
धिकविभागाश्रयत्वंपत्रेस्थोमांसंविभजनेकोणपइत्यवाक्यवधिकमांससमवेतविभागानुकूलोत्कंन्दलादिक्रियास
वापित्वंकौणेपवाक्यार्थः।अत्रध्रुवमपायेपादानमितिसूत्रमपायेविभागेध्रुवमवधिभूतमपादानसंज्ञमितिव्याख्येयं॥ योग
विभागादितिवाक्यपदीयेहरिचरणाः॥पापद्विरमतीसादोविषफलाभिधायिनी।व्याघ्राद्बिभेतीसादोतुहेमातुतामाहपंच
मी।पापाद्विरमतिजुगुप्सतेधर्मात्प्रमाद्यतीत्यत्रविरमेर्निवृत्तिर्जुगुप्सागर्हानामदूषणविशेषः।प्रमादेस्तुदुःखसंस्कारोर्थः।पंचम्यर्थ
विषयविषयकप्रवृत्त्यभावः।धर्मविषयककर्तव्यतास्मरणाभावप्रयुक्तोधर्मविषयकप्रवृत्त्यभावश्चवाक्यार्थइत्यादि॥चौ
राद्बिभेतित्रायतइत्यादौअनिष्टस्यभीतिसेनानिवर्तनंभयं।अनिष्टासुसत्यनुकूलोव्यापारस्त्राणांपंचम्यर्थहेतुत्वहेतुम

१०श्री०२० नान्वानिष्ठे ऽन्वेतिनथाचचौरहेतुकमनिष्टभाविवेनचिंतयति। चौरहेतुकानिष्टानुत्पत्त्यनुकूलो व्यापारस्त्राणमिति बोधः॥ यत्र त्वाभ
१२३ यापादानस्यापिनहेतुत्वविवक्षातत्रसबधसामान्यार्थिकाशेषषष्ठीवत्प्रमाणं। अतएवकस्यबिभेतिदेवाश्चजातरोषस्यसंयुग
इतिप्रयोगः। तद्भिन्नं। नरकाद्बिभेतित्तरकान्त्रायतइत्यादौनरकजन्यानिष्टंनराभावात्। वस्तुतोभयंत्वद्वेषात्मकांतरजातिः सैव
विभेतेः प्रवृत्तिनिमित्तात्फलावाच्छकत्वादेवचासौयंविवदकर्मकः। नत्वदुःखगोचरभयस्यास्मिन्मतेविलक्षणानिसंधानमेवकारण
मपेक्षत्वेनात्रद्वेषत्वस्यासामर्थ्यावनेननरागांधानामास्तिकानांनरकान्नयेभयप्रेक्षमाणानांआत्मश्रवणाद्येमुमुक्षूणांकुतोपिकृष्णग
इतनय। उभयमितिविषयेभयंचभयादानसाधनत्वमासन्नत्वंचज्ञायमानंजनकं। चौरेभ्योहिभयमुत्पन्नतत्प्रतिसंहितेभ्यएवमा
सतिप्रकर्षाच्चभयमायातिकर्षप्यासत्तिरपिकालिकीदैशिकीमथानभवमूहनीया। एवंचविषयविषयिभावलक्षणाहेतु
तैवपंचम्यर्थः। तथाचचौराद्बिभेतीत्यत्रचौरगोचरभयवानितिवाक्यार्थः। त्राणमपिभयाभावानुकूलोव्यापारः। त राम
स्यचभयाभावरूपधात्वर्थतावच्छेदकफलावाच्छकत्वात्तव्यः। कर्मभयाभावश्चभयकारणविघटनद्वाराभावव्यापारप्रयोज्यः। १३१

कल्पमस्यधर्मस्यत्रायतेमहतोभयादित्यत्रापिभयहेतुकानिष्टानुत्पत्तेःप्रयोजकोव्यापारोनत्र। नीयते। परंतुभावितोभयाद्दपिदुः
खविशेषसाधनादन्यांतरसंभवादुपगोचरभयाभावस्यैव। अतएवद्विलीयाद्वैभयंभवतीतिश्रुत्यास्वस्मान्नभयमितिपरिसंख्या
यते। द्वेषविषयास्वाभाव्येनस्वभिन्नत्वज्ञानस्यापिद्वेषकारणत्वमास्वगोचरभयासत्त्वसंभवात्। भयस्यस्वहेतुकानिष्टचिंत
नस्वरूपतानुश्रुतिशतेनापिनालंपितुशक्यतइतिदिक्। एवंरणात्पराजयतइत्यत्रद्वेषाधीनानिवृत्तिःपराजेरर्थः। पंचम्यर्थ
विषयतानुद्वेषनिवृत्त्योरुभयोरन्वेति। तथाचरणद्वेषायभरणानिवृत्तिमानित्यन्वयबोधः। अतएवपराजेरसोढइत्यनुशा
सनेपराजेर्योगिः। सहनस्यद्वेषस्यविषयोपादानत्वेसज्ञायते। शत्रुपराजयतेइत्यत्राभिभवानुकूलोव्यापारोर्थः॥ पराजे
रितिशत्रुरभिभाव्यतयाकर्मैव। क्रियानिवृत्तिजनकव्यापाराजनरवाच्यः। धातवोवारयंत्याद्याःप्रत्याकांक्षंतिपंचमीं।
वारयत्यादिधातुर्धातुप्रवृत्तिनिमित्तत्वोपलक्षितपतनत्वादिव्यवच्छिन्नप्रतियोगिताकमभावंफलविधयाभिधत्ते॥ न
स्त्रप्रयोजकमपिमापतेनाज्ञिवाक्यादिव्यापारंप्रधानतमानज्जनितापदार्थोपस्थितिरूपलक्षणधर्माभिषेणपतनाभा

प० ४।०२० वत्वादिना फलमवगाहते। तत्राभावस्वरूपफलाधिकरणतया विवक्षितेन कर्मसंज्ञा बलीयसीति तन्ने द्वितीयापवादभूताभाव
१३२ प्रतियोगिक्रियाकारकाणि पुनरपादानसंज्ञकानीति तत्रत्या पंचमी तानि कारकाण्यभिधत्ते। कूपादंधं वारयतीत्यत्र कूपापि
करणकपतनप्रतियोगिकस्यांधवृत्तेः। यवेभ्यो गां वारयतीत्यत्र यवकर्मकभक्षणप्रतियोगिकस्य गोवृत्तेः। परस्वेभ्यः पाणिं
वारयतीत्यत्र परस्वकर्मकादानप्रतियोगिकस्य पाणिवृत्तेः शरेभ्यः शरीरं वारयतीत्यत्र शरकरणकवधप्रतियोगिकस्य श
रीरवृत्तेः। पुष्पेभ्य आतपं वारयतीत्यत्र पुष्पकर्मकशोषणप्रतियोगिकस्यातपवृत्तेः। श्वपचेभ्यो दानार्थं वारयतीत्यत्र श्व
पचसंप्रदानप्रतियोगिकस्य दातृवृत्तेरभावस्यानुकूलो व्यापारो वाक्यार्थः। यत्तु क्रियाविषयकानिवृत्त्यनुकूलो व्यापारो वार
यतेरर्थस्तत्र निवृत्त्यन्वितत्वमाधेयत्वं द्वितीयायाः प्रकारितं पंचम्याः शाकं कूपप्रकारिकायाऽधंधवृत्तेः पतननिवृत्तेरनुकू
लो व्यापारो भवति। कूपादंधं वारयतीति वाक्यार्थः। कूपे मा पतत्वयमिति निवृत्तौ कूपप्रकारकतायाः निराबाधत्वात्। तथा
सत्यपि तेन न पुरं भोगो निवर्तत इत्यादौ न गतिश्चिन्तनीया। लीयतिर्दर्शनाभावजनिकां वदति क्रियां। मातुर्निलीयते सा राम १३२

दौ पंचमीनेष्यमाणतां। मातुर्निलीयते बाल इत्यादौ स्वकर्मकदर्शनाभावानुकूलो व्यापारो लीयतेरर्थः। पंचम्यास्तु वृत्तिम
त्त्वेनावधिविषयत्वमभिधत्ते। तेन मातृवृत्तित्वेन स्वस्वकर्मकदर्शनाभावस्यानुकूलो व्यवधानादिव्यापारो वाक्यार्थः। दृश्यते हि बालेन
मामा माद्राक्षीदिति॥ मातृवृत्तित्वेन स्वकर्मकदर्शनाभावः॥ अत एव बालो मातुर्निलीयते माता पुनरेतं पश्यत्येवेत्यादयः प्र
योगाः सूपपदाः॥ तदर्थमेवांतर्धौ येनादर्शनमिच्छतीत्यत्रेच्छतिग्रहणमिति व्यक्तं। तद्विदां। प्रकाशनाधिकरणे धीमान
स्य वक्तरि। प्रकृतौ च जनेः कर्त्तुरपादानत्वमिष्यते। हिमवतो गंगा प्रभवतीत्यत्र प्रभवतिः प्रकाशस्य दर्शनयोग्यताभावा
रकदेशाव्यवहितदेशावच्छेदेन दर्शनयोग्यत्वं द्वितीयदेशान्वयितादात्म्यं पंचम्यर्थः। तथा च हिमवदभिन्नो योग्यताभाव
दकदेशाव्यवहितदेशस्तदवच्छिन्नदर्शनयोग्यत्ववती गंगेति वाक्यार्थः। उच्चारणानंतरमिमुच्चारणमभीऽर्थः।
प्रथमोच्चारणान्वितं कर्त्तृत्वं पंचम्यास्तथा चोपाध्यायादधीत इत्यत्रोपाध्यायकर्तृकोच्चारणानंतरोच्चारणकर्तृत्वम
र्थः॥ ब्रह्मणः प्रजाः प्रजायंत इत्यत्र जनेरुत्पत्तेः कर्त्रीणां प्रजानां प्रकृतित्वमुपादानत्वं वा ब्रह्मणः प्रतीयते। धा

१०।१०।१०। त्वंनरोपनायामपि उत्समावेवमेवान्यपयोबोध्यः। अतएवांगादंगात्संभवसि हृदयादभिजायसे। आत्मा वै पुत्रनामासि त्वं जीव शः
१३३ रदः शतमिति श्रुतौ हेतुपंचम्यागतार्थमेदिति केचित्॥ अध्याहृतल्यबंतस्य कर्माधिकरणं तथा। प्रासादात्प्रेक्षते इत्यादौ विभक्ति
र्विक्तिपंचमी। प्रासादात्प्रेक्षते। आसनात्प्रेक्षते इत्यादावारुह्योपविश्य वेत्यध्याहार्यकर्मणोधिकरणे च पंचमी। प्रासाद
मारुह्यासनमुपविश्येति पर्यवसितवाक्यशरीरं॥ इति पदवाक्यरत्नाकरे कारकपंचमीविवरणं॥ धनोध्वकालनि
र्माणं ततो भवति पंचमी। सप्तमी केवलं कालादध्वनः प्रथमापि च। योजनादिशब्दा मुख्यया वृत्त्या परत्वविप्रकर्षम
भिदधति। गौण्या तु तदभिव्यंजकसंयुक्तसंयोगेण परकालपरत्वप्रतियोगिकापरत्वाधिकरणदेशान् मासादिपदमपि ना
वदास्यपरिस्पंदान्तरजन्यमासो वत्सनोः सामपि तमपरत्वविशेषमभिदधत्तत्संसर्गगुणेन तदंतरालकालाभवान्
भिधत्ते। स्वीक्रियंते संख्यायाइव परत्वादेरपि समवाया न्यूनकेनापि संसर्गेण गुणकर्मणोरपि व्यवहारवशाद्वैशिष्ट्यं राम
तथा च ग्रामा वाद्योजनमोजने वा वनमित्यादौ पंचम्या अवधिमत्वं प्रथमायाः सप्तम्या वाधिकरणत्वमर्थः। ग्रामावधि १३३

कयोजनात्मकपरत्वाधिकरणं वनमित्यन्वयबोधः। कार्तिक्या आग्रहायणी मासो मासे वेत्यादौ तु कार्तिक्यादिपदं तदु
त्पन्नतिरङ्गमेलाक्षणिकं। तथा च कार्तिक्युत्पन्नावधिकमासस्वरूपापरत्वाधिकरणमाग्रहायण्युत्पन्नवास्त्वित्यन्वयबोधः।
दिक्शब्दाचूत्तरपदाजाहुच्येनतरेणन्। आराद्भिन्नेभ्यांच योगे नाम्नो भवति पंचमी। उदयाचलावधिकमपरत्वं द्विशिष्टं चेद
शमभिदधाना पूर्वादयो दिक्शब्दास्तथाविधाः शास्योंचूत्तरपदा आजे मा दक्षिणा प्रभृतयः। अन्येन तरशब्दो पृथक्त्वविशि
ष्टवाचिनो प्रपंचार्थमितरग्रहणं। तेन पृथक्त्वार्थकानामितरेषामपि लाभात्। चैत्रादिन्नः पृथगित्यादिकमुपपद्यते। इत
रस्त्वन्यतोवयोरितिकोशासिद्धनीच वाचकस्त्वितरशब्दो महणेग्रहाने। अयमस्मात्तारोमंदोक्रूस्व इत्यादावितायभास्य
समानीवरूतर इत्यादौ विभक्त पंचम्यैवार्थे सिद्धे॥ इतरेयोगविनीयापिततोन्यत्रापि दृश्यते इति सत्तुशासने ततरेणेतिवृत्ति
यान्वेतिचा 'त्रसूत्रेणाचाज्ञुशिष्यते। तेन पुरुषाराधनमृतेइति प्रयोगः प्रमाणं। आरात् दूरसमीपयोर्वर्तते॥ पूर्वो
ग्रामात्क्ष्य आगत इत्यादौ पंचम्याः परत्वनिरूपकत्वमर्थः। तथा च ग्रामवृत्तिपरत्वनिरूपकमुदयाचलावधिकं पदपर

प०वा०र० संनदाश्रयस्तडागादिति माधवासूर्वोमधुरित्यत्रपूर्वपदेनप्रागभावाधिकरणस्यपंचम्याः प्रतियोगित्वस्याभिधानात्माधवप्र
१३८ तियोगिकप्रागभावाधिकरणंमधुरित्यान्वयबोधः। प्रागादिशब्दानांदिक्शब्दत्वेपिग्रामस्यदक्षिणइत्यादाविवप्राग्भावषष्ठींवा
धित्वुंएथग्रहणमतोग्रामात्प्राकूतडागइत्यादौग्रामवृत्तिपरत्वनिरूपकोदयाचलावधिकापरत्व। वनिर्देशेनडागइत्यन्वयोगम्य
ते। एवंग्रामाद्दक्षिणाहिवेत्यादौवडवानलावधिकापरत्ववानदेशोदक्षिणापदस्यपंचम्याः परत्वनिरूपकत्वंवाजावेद्देशिकम
धिकरणत्वमर्थस्तेनग्रामवृत्तिपरत्वनिरूपकवडवानलावधिकापरत्ववान्निर्देशेनडागइतिवाक्यार्थः। अवयववान्निपूर्वादि
परयोगेतुषष्ठ्येवप्रमाणं। नेतृपूर्वकायस्यानुकायात्। शरीरस्यदक्षिणाहिनिलोनतुशरीरादिति। चैत्रादन्यइतरइत्यादौचैत्रा
वधिकपृथक्त्ववानित्यन्वयबोधः। अत्रान्योन्याभावानेवान्यादिपदार्थः। अथपरमन्यपदं। नस्वरूपार्थमितिप्रपंचनायपृथ
गितरपदोपादानं। ननुघटान्नेतिप्रञ्ज्यसपंते। नञआभावेसामान्यार्थकत्वात्। संसर्गमर्यादयातादात्म्यसंसर्गावच्छिन्नप्रति राम
योगिताकाभावेघटोनेत्यादौघटान्योन्याभावस्यार्थतोलाभादन्योन्याभावत्वस्यनञ्वृत्तिनिमित्तत्वाभावात्। भवतुवान्यो १३८

न्याभावएवनञर्थस्तथापिनिपातातामभेदान्वयंप्रतिव्युत्पत्तिविशेषार्थान्वयंप्रत्ययोग्यत्वमेवकल्प्यतइत्येकदेशिनः। वना
दाशदित्यत्रवनावधिकंपरत्वमपरत्वंचार्थः। ऋतेशब्दस्यान्योन्याभावस्तद्धांश्चार्थः। लोकादृतेपचति। जलादृतेगंधः। गंधादृ
तेपाषाणोरसात्। ६दृतेवन्हिरितिचतुर्णांनिदर्शनं॥ अपाङ्परिप्रतिप्राधंकर्मप्रवचनीयता। बहिश्चसंस्यायोगेनपंचम्यांयांछि
हेतुनां। अपपरीवर्जनार्थौ। मर्यादायामभिविधौचाङ्। प्रतिनिधिप्रतिदानयोः। प्रतिश्चकर्मप्रवचनीयसंज्ञांभजमानोत्यपे
क्षमाणस्यप्रातिपदिकस्यपंचम्यानिमित्तं। बहिःशब्दोपितथा। अपहरेः परिहरेर्वासंसारइत्यादावत्यंताभावः। कर्मप्रवचनी
यथोः पंचम्याआधेयत्वमर्थः। हरिवृत्त्यत्यंताभावप्रतियोगिसंसारइतिकं। क्वचित्साठिकं। क्वचिदन्यदपि। संसर्गस्यतादात्म्य
संयोगसादेश्यसमानकालिकत्वादरभावोपियथायथंतात्पर्यवशादुपतिष्ठते। आमुक्तेः संसारइत्यत्रसंसारमुक्तिनिरू
पितंकालिकमव्यवधानं। मुक्तिसमानकालिकत्वाभावश्चआसमुद्रान्मरदइत्यत्रसमुद्रनिरूपितेदेशिकमव्यवधानंतादा
त्म्यसादेश्यसंयोगस्यवाभावश्चभासते। आकडारादेकासंज्ञेत्यत्रएकसंज्ञाकशब्दविधिनाकडारसूत्रनिरूपितंपा०

२

१०व्या०र० कमव्यवधानं॥ नत्वविन्नताभावश्चावगम्यतइति। अभिविधौवर्त्तमानस्याङोव्यापकभिन्नसंबंधश्चार्थः॥ नत्रव्यापकताघट
१३५ कइतरानिरूपितश्चैकएवसंबंधः प्रतीयते। आपरमाणोः पृथिवीत्यादौपृथिवीत्वसामानाधिकरण्येनतादात्म्यसंसर्गाव
च्छिन्नापरमाणुव्यापकतातदितरनादात्म्यंचभासते। आसमुद्रात्पशब्दइत्यादौपशब्दसिसमुद्राभिव्यापकत्वंसमुद्रेतरसंबं
धश्चभासतइत्येवमादिक॥ नत्संबंधनदितरसंबंधावेवाभिविधिर्नतुव्यापकताचाप्यापरमाणोरितिप्रयोगश्चतदर्शनादि
त्यपिकेचित्। प्रतिनिधौवर्त्तमानस्यप्रतेर्भेदसत्कार्यकारित्वंचार्थः। प्रद्युम्नः कृष्णात्प्रतीत्यादौकृष्णाभिन्नकृष्णकार्यका
रिप्रद्युम्नइत्यन्वयबोधः॥ प्रतिदानेवर्त्तमानस्यप्रतेःऋणत्वध्वंसजनकत्वमर्थः। पंचम्यास्तुऋणत्वानितमादानजन्यत्वं
ऋणत्वंतुस्वत्वमिवपदार्थान्तरंपापविशेषोवा॥ तिलेभ्यप्रतियच्छतिमाषानित्यत्रतिलादानजन्यर्णत्वध्वंसजनकमाष
दानकर्त्तेत्यन्वयबोधः। बहिर्ग्रामादित्यत्रतदधिकरणदेशोबहिपदार्थः॥ ग्रामानधिकरणंचपरिसरादिरेवदेशोग्रा राम.
नर्यमीणः। अकर्त्तरिऋणेहेतौपंचमीचास्त्रियांगुणे। प्रायेणज्ञापकेहेतौस्त्रियामप्यगुणेष्वपि। शतादूद्धइत्यादौऋण १३५

मर्णत्वंवाहेतुमत्तावाएवंडशःपंचम्यर्थः ऋणाभिन्नशतेनहेतुकंबंधनंकर्मेत्यादिरन्वयबोधः॥ ऋणकर्त्तृकबंधविवक्षायांतुऋ
णेनबद्धइत्येवप्रमाणं। आज्ञेनआज्ञाद्वाबद्धइत्यादौहेतुनापंचमीतृतीयायुज्यते। बुध्यामुक्तइत्यादौतुतृतीयैव। ननुपंचमीव
त्सिशब्दस्यस्त्रीत्वात्। स्त्रीयामपिगुणागुणेचज्ञापकेहेतौपंचमीसाधः। नास्तिघटोनुपलब्धेरित्यत्रानुपलब्धिज्ञापकत्व
स्यपरतास्तितायामन्वयस्यानुभवात्। अज्ञानज्ञापकमनुपलब्ध्यादिवपंचम्यासंबंधनेननतुचक्षुरादि। तेनेन्द्रियात्घटइतिन
प्रयोगः॥ ज्ञानज्ञापकेतुसर्वत्रपंचमी। धूमादग्निमान्पर्वतइति। जीवःकर्त्ताबुधेरितिचप्रयोगात्। धूमादग्निमानित्यादौधूमपदं
धूमज्ञाने। अग्निपदंअग्निज्ञाने। ज्ञायमानाग्नौवालाक्षणिकं। हेतुतोहेतुमतावापंचम्यर्थोधूमज्ञानविशेषितेनापरज्ञानेनेतीति
प्राञ्चः। ज्ञानजन्यत्वंपंचम्यर्थोसौधूमविशेषितोग्निपदार्थस्तदेकदेशेवाग्निज्ञानेन्वेतीत्यपरे। वन्हिरेवजिज्ञासितोनतुवन्हि
र्वेति। पर्वतोवह्निमानितिप्रतिज्ञावाक्यघटकानिपदानिमुख्यवृत्त्यैवप्रवर्त्तन्ते। हेतावपिधूमादिपदंतथा॥ धूममधिकृत्यैवो
दाहरणादिवाक्येतत्वाप्त्यादेर्ज्ञापकताप्रयोजकधर्मस्योपपादनात्। धूमपदेनधूमज्ञानमलक्षणेनतुधूमज्ञानस्यैववन्हिज्ञा
नजनकताप्रयोजकंरूपमुदाहृतंस्यादतोज्ञानजन्यज्ञानविषयत्वंपंचम्यर्थोधूमादिविपृषिंतेकदेशेवन्ह्यादावन्वेतीपु

१०वा०२० नवीनाः॥धूमवन्हिपदाभ्यांभक्त्याज्ञानमुपस्थाप्यते।यत्ताववस्त्वर्थौ॥पंचमीकुतार्वक्त्येत बक्षद्युत्पादाविवजनकतांजन्यतांवाभि
१३६ धत्ते॥स्वीक्रियतेचैकप्रातिपदिकशक्यत्वस्यार्थयोर्भेदेनान्वयस्तथाच धूमोज्ञानेनतस्येतुतायांसाज्ञानेनद्वन्हावन्वेतितीतिर्धूम
विषयकज्ञानाविषयवन्हिमान्पर्वतइतिबोधः।प्रतिज्ञाहेतुभ्यांसंस्यजन्यते।केवल्याप्रतिज्ञयापर्वतोवन्हिमानित्येवबोधनेन
तुधूमेयवन्हिमानिति।हेतुसमभिव्याहारज्ञानानंतरितोहिवन्ह्यादिपदस्यज्ञानिलक्षणअहोहेतुपंचम्यर्थान्वयबाधादितितुवस्त
गतिः॥ननुघटःपृथिवीगंधान्नरूपान्नघटत्वान्नापिस्नेहादित्यादौघटेरूपादिज्ञानस्या।प्यपृथिवीत्वस्यासंतताभावस्तद्दन्यो
न्याभावोवापृथिवीत्वेपृथिव्यावारूपादिज्ञानमज्ञाप्यत्वस्यपृथिवीज्ञानसामान्येरूपादिज्ञानजन्यत्वस्यपृथिवीज्ञानहेतुतामात्रे
रूपादिज्ञानसंबंधस्यपृथिवीज्ञानजनकेषुरूपादिविषयकत्वस्यवाभावोनबोधयितुंशक्यतेनेवाधात्।पृथिवीत्वव्याप्यरूपवान्च
टइत्यादिना।श्चान्त्परामर्शेनघटेगंधवानित्यनुमितिजननादितिचेत्।अत्रप्रतिज्ञासमभिव्याहृतहेतुपंचम्याहेतोसंबंधोपिप्रति
पाद्यतेअतएवहेतुत्वयव।चेनगतार्थत्वादुपनयादिप्रयोगाभावादुदाहरणांतएवन्यायः॥एवंचघटःपृथिवीगंधान्नपटत्वादित्या राम
दौपटत्वेघटसंबंधाभावएवप्रतीयतेइतिगुरुमतानुसारिणः।वस्तुतोभ्रमसामान्यभिन्नत्वविशिष्टकेवलविषयतासंसर्गेण १३६

लिंगबोधकपदशक्यस्यतत्त्वस्यार्थेज्ञानेपंचम्यर्थहेतुतायास्तत्प्रकृतपक्षकप्रकृतसाध्यकानुमितित्वावच्छिन्ननिरूपकतासंसर्गेणसा १
धवानिपदत्वस्यार्थेसाध्यज्ञानेन्वयइतिसुसत्वाघटःपृथिवीगंधान्नपटत्वादित्यादौपृथिवीज्ञानेकेवलगंधविषयकभ्रमसा
मान्यभिन्नज्ञानवृत्तिहेतुतायाःघटपक्षकपृथिवीत्वादात्म्यसाध्यकानुमितित्वावच्छिन्ननिरूपकतास्वरूपसंसर्गस्तत्संसर्गावच्छिन्नप्रति
योगिताकःपटत्वविषयकभ्रमसामान्यभिन्नज्ञानेहेतुत्वस्याभावश्चभासते।विषयतायांतुकेवल्यंतुविशेष्यताद्युपासवलनंतेनपरोगं
धव्याप्यपटत्ववान्परोगंधव्याप्यपटत्ववानितिसमूहालंबनेहेतुकस्यगंधवानित्यनुमितौसत्वेपितप्रकृतवाक्यार्थबाधः॥अस्महालं
बनीविषयताद्युपेतेनतद्विषयतायाःकैवल्याभावादितिसंक्षेपः॥नानापृथग्विनायुक्तादिदूरांतिकवाचकात्।पंचमीचतृतीयाचद्विती
यासप्तमीतथा।नानादिशब्दयोगेपंचमीतृतीयाद्वितीयाः।दूरार्थकात्संचमीद्वितीयातृतीयासप्तम्यइतिव्यवस्थितोविधिः॥विनादिश
ब्दानामसताभावस्तद्वानन्योन्याभावस्तद्वानस्ययापथमर्थः॥गंधंविनावायुर्धर्मविनाविहिर्ब्रह्मत्वंविनानिःस्नेहोगंधवत्वादिवन्नानापृथक्पद
योरप्युदाहरणानि।ग्रामस्यदूरंदूराद्दूरेणांतिकमंतिकांदंतिकेनिकेनेत्यादौदूरार्थकापदानांअसमानाधिकरणत्वेप्रातिपदिकार्थमात्रेप्रथमावच्छनतो
विभक्तयः॥समानाधिकरणत्वेतुदूरःपंथाइत्यादौविशेष्यपरतंत्रैवविभक्तिः॥दूरादावसथान्मूत्रमित्यादावधिकरणेपिपंचम्यादयोदृश्यंतेअल्पक

प्र०वा०र० त्स्तोकान्निपयस्तोकावद्व्येशाइमे। येपक्षेतेपंचमीनत्तृतीयांचकरणार्थिकां। अल्पाख्यः शब्दासामानाधिकरण्येनद्रव्यमवशेषयंल्लः करणत्वेनान्वि
१३८ तौपंचमीतृतीयांनव्यपेक्षेते॥ यथाल्पेनाल्पाद्वामुक्तइत्यादि॥ द्रव्यसमानाधिकरणेस्तोकेणविषपाहतइत्यादौत्तृतीयैव॥ क्रियासमानाधिकरणे
स्तोकंपचतीत्यादौकर्मणिद्वितीयैव। वाजपेनयजेतेत्यादौकरणानुत्तृतीयेवप्रमाणं। इत्युपपदपंचमीविवरणं॥ विभक्त्यंतरवाध्येभ्योभिन्नश्शे
शेषोविधीयते॥ संबंधत्वनिमित्तेनषष्ठीतत्रप्रवर्तते॥ प्रथमादीनांयानिप्रवृत्तिनिमित्तानिसंबुद्धित्वादीनितदितरधर्मविशेषः शेषस्तेन
षष्ठीसंबंधत्वेनप्रवृत्तिनिमित्तेनाभिधत्ते॥ अस्तिहिसंयोगसमवायस्वस्वामिभाववैशिष्ट्यकर्तृकरणकर्मत्वादिरनुगतत्वानुयुक्तत्वप्र
तियुक्तत्वादिस्थितः समवायेवाध्यनुयोगिकत्वावच्छिन्नरूपप्रतियोगिकत्वविरहान्नवायोरूपमितिप्रतीतिव्यवहारौसएवचानुयुक्त
त्वादिधर्मः संबंधत्वाश्रयतएवशास्त्रेषष्ठ्यर्थाइतिमहाभाष्यपरिगणनमपितत्प्रवृत्तिनिमित्तानामपरिमितत्वंग्राहयति। किंतुशेषव्य
क्तीनांराज्ञः पुरुषोघटस्यरूपमित्यादौराजप्रतियोगिकत्वादिनास्वत्वसमवायादिः पुरुषरूपादौभासते। स्वत्वसमवायत्वादिनातथा
त्वोपगमेमातुः स्मरतीत्यादौकर्मतायांताद्रूप्येणषष्ठीनप्रवर्ततेनाद्वितीयाप्रवृत्तिनिमित्तविशिष्टस्यतस्यशेषत्वाभावात्॥ नचैवमधि राम
गर्थदयेशांकर्मणीत्यनुशासनसिद्धास्मरतेरधिपूर्वकेणधातुल्यार्थकस्ययोगेकारकषष्ठीनत्रापिसूत्रेशेषइत्यनुवृत्तेः॥ अतएवशेषे १३८

षष्ठ्येवसिद्धेऽर्थदर्विदर्थस्यकरणइत्याद्युत्तरसूत्रैर्विधानंसर्पिषोज्ञानंमातुः स्मरणमित्यादौशेषषष्ठीप्रयोगनियमप्रतिपत्तिद्वारानुप्रयो
जकसमासनिषेधप्रतिपत्त्यर्थमित्यभियुक्ताः॥ यदाहहरिः॥ कारकेव्यपदिष्टेचश्रूयमाणक्रियापुनः॥ प्रोक्ताप्रतिपदंषष्ठीसमासस्य
निवर्तयइतिकारकविशेषधातुविशेषनिर्देशादिमतिज्ञोविदर्थस्यादिसूत्राष्टकेपदमुपलक्ष्यविहिताषष्ठीसमासनिषेधार्थेतिनदर्थः॥
हरिस्मरणमित्यादौकृद्योगलक्षणकारकषष्ठ्यासमासः। शेषषष्ठीसमासस्तुष्टसूत्रीज्ञाप्यस्यनिषेधस्याविषयः॥ हरिसंबंधिस्मरण
हरिकर्मकस्मरणयोः समानार्थयोश्चरमेप्रतिपाद्येसमासः साधुः॥ नप्रथमेपीति॥ उत्तरप्रकृतिस्वरएवास्यसमासस्य। नांतोदात्तइति
वानिष्पत्ते। कारकपूर्वकेहिसमासेभवत्युत्तरप्रकृतिस्वरः॥ शेषषष्ठीसमासेत्वंतोदात्तः॥ हरिस्क। अष्टसूत्र्यामातुः स्मृतइत्यादौ
समासनिषेधएवप्रयोजनं। नहिकृद्योगषष्ठीसंभवति। कृत्तुनिष्ठायाः पर्युदासादित्यभिप्रायेण। निष्ठायांकर्मविषयाषष्ठीचप्रतिषिध्यते। शेषल
क्षणायाषष्ठ्यासमासस्तत्रनेष्यतेइत्यनुशासनं॥ यत्तुज्ञोविदर्थस्यकरणइतिसूत्रेप्रवृत्त्यर्थकज्ञानातेःसर्पिषोज्ञानकारणत्वविवक्षायांस
र्पिषाजानीतइति। अधीगर्थदयेशांकर्मणीतिसूत्रेमातुः स्मरतिदीनस्यदयते। जनस्येष्टइतिरुजार्थानांभाववचनानामज्वरेरितिज्व

प॰ शा॰ २॰ रिसंनापिवर्जितानां रोगार्थानां धातूनां कर्मणि षष्ठी स्यादित्यर्थके। रोगश्चोरस्य रुजति। ज्वरिसंताप्योरोगश्चोरं ज्वरयति संतापयति वा
१३५ भावान्यकर्तृके नदीकूलं रुजतीति। आशिषि नाथः इति सूत्रे सर्पिषो नाथनेऽआशीर्भिर्नाथके माणवकं नाथतीति जासिनिप्रहणनाटक्राथ
पिषां हिंसायामिति सूत्रे चौरस्योज्जासयतीति निहंतीति। प्रहरंत्वं तिउन्नाटयति क्राथयतिपिनष्टीति हिंसायां धातोः पिनष्टीति। व्यवहृपणोः
समर्थयोः। दिवस्तदर्थस्येति सूत्रे द्यूतक्रयव्यवहारार्थकानां व्यवहृपणिदिवां कर्मणि षष्ठीत्यर्थकयोः। शतस्य व्यवहरतिपणा
यतिदीव्यतीति गणनार्थके व्यवहरति शलाकां व्यवहरति। स्तुत्यर्थके पणो दीव्यतेर्न ब्राह्मणं पणायति दीव्यतीति। कृञः प्रतियत्न इ
ति सूत्रे प्रयत्नो गुणाधानं अप्रधानतया सन्निधापनं वा चरितं गर्भोनस्य कृञः कर्मणि षष्ठी स्यादित्यर्थके। एधोदकस्योपस्कुरुत इ
ति वृत्त्याख्याने न उदाहरणं। प्रत्युदाहरणं चतत्सर्वं कुरुते नोपलक्षणतया नेममुमिति हरदत्तः॥ एवं कृतोऽर्थप्रयोगकालेपि
करणे इति सूत्रेण विहिता द्विरन्हो भुंक्ते द्विरह्नो भोजनमिति समासश्चोत्तरप्रकृतस्वरोपेतः प्रमाणं॥ सर्वनामसमानाधिकरणे प्र राम
थमादयः॥ अन्यथे हेतुपर्यायेवनीयाधाविभन्हो भोजनमित्यादौ शेषषष्ठ्यपि समासप्रतिषेधार्थैव। नाह्नपेणाधिकरणतां विवक्षायां तु १३५
द्विरन्हो भोजनमित्येवविग्रहे द्विरह्न॰

भक्तय॰। हेतुकारणनिमित्तेन मर्षे सर्वासां प्रायदर्शनादिशब्दोपादिसर्वनामसमानाधिकरणस्तत्र को हेतुर्वसति कं हेतुं वसतीत्यादिक्रमेण सर्वा वि
भक्तयः॥ अन्येनानिमित्तेन वसतीत्यादौ तृतीयाद्याएवसाधवो न प्रथमाद्वितीये। अत्र यथायथं हेत्वादिशब्दो जनकं प्रयोजनं चा
भिधत्त इत्यभिहितं प्राक्विभक्तीनां हेतुकर्तृसमर्थः शेषो वा॥ अतसर्थयुनात्षष्ठी द्वितीयायोनपाद्युतान। दूरान्तिकार्थयुक्तात्तु षष्ठी पक्षे तु
पञ्चमी। ग्रामस्य दक्षिणतः पुरः पुरस्तात् उपर्युपरिष्टादित्यादौ षष्ठ्येव। विंध्याद्दक्षिणतः इत्यादौ विंध्यमारभ्य दक्षिणत इति स्यपवना ध्याहारे
कर्मणि षष्ठीति पंचमी। एवं दक्षिणेन ग्रामस्येत्येन वंते नु योगे षष्ठी द्वितीया च प्रमाणं। न तु पंचमी। प्रकृतायाः पंचम्याः षष्ठी द्वितीयेषापि
के प्रबलतरेति महाभाष्यात्। न चागारं धनपतिगृहाद्दुरेणास्मदीयमित्या रावुत्तरेणेनि पदं न। तीयानंतरदपिनोरणेत्यस्य समानाधि
करणमनोरिच्छ ब्योगे पंचमी। ततः पश्चास्त्वेस्मद्इति भाष्यप्रयोगादतः सप्तम्यन्तोपिपश्चाच्छब्दः पंचम्या निमित्तं। लुप्ताप्यनसर्व
प्रत्ययः षष्ठीतिनिमित्तमिति प्राग्ग्रामादित्यादौ षष्ठीमपवादित्तुमंकूनरपदयोगे पंचम्याः प्रतिप्रसवमित्यभिहितमभ्रत्लात्। द
रमंतिकं ग्रामस्य ग्रामादित्तु प्रयमपि प्रमाणं। कृदंतधातुयोगेन मवक्तृनेरिकर्मणि। प्रधानेक्यितापष्ठीगुणेन्यप्रमानता। ओदनस्य

प०वा०र० पाकः। कृत्तस्य कृतिरित्यादौ द्वितीयापत्तिर्नीयापत्तुकर्मत्वं कर्तृत्वं च षष्ठ्यर्थः। द्विकर्मकधातुयोगे प्रधानकर्मणि षष्ठ्येव गुणकर्मणि द्वि
१३९ तीयापि प्रमाणं। नेताश्वस्य ग्रामस्य ग्रामं वा। एतेन कर्तृकर्मणोः कृतीत्यनुशासनं व्याख्यातं। नन्वत्र सूत्रे कृतीति निर्व्यर्थं। नलोका
व्ययनिष्ठाखलर्थतृनामित्येव लादेशपर्युदासे अर्थादेव कृदंतधातुयोगे कर्तृकर्मणोर्लोभादिति निर्व्यर्थं। कृतपूर्वः कटमित्यादौ न
स्थितयोगे कर्मणि षष्ठ्यपवादायदूतप्रादानात्। अथ पर्वतहनमनेननिर्वियहेसपर्वाथ्यैतिसूत्रेण सोपपदात्पूर्वपदादिनिः कर्तरि
विधीयते। इति षष्ठ्यपवादाय तुनत्र कृतपस्य कटसमानाधिकरणत्वे तु वृत्तिरेवानुपपन्ना। अरःश्वस्य राज्ञः पुरुषइत्यादौ विवसवि
शेषणानां वृत्तिर्नेति निर्वार्तिकेनतन्निषेधात्। सूत्रे कृत्यस्यापि वैय्यर्थ्यं। निष्ठाभिहिते कर्मण्यनभिहिताधिकारीयषष्ठ्यप्रसक्तेः क
टमिति न द्वितीयाद्वितीयाप्यनुपपन्ना। तनभिहिताधिकारीयत्वात्। अत्र कृतमिति भावक्तांतं विवक्षितकर्मकमेव। पूर्वेण समासस
मासायनस्थितं तनपि ताकृतपूर्वः निशब्दं साधयति। सचप्राक् कालीनकरणकर्तृतिबोधसमर्थोपतिष्ठते। भावक्तांत कृञर्थसकर्म राम
कर्मकत्वान्वयइति भाषमाणो भट्टोजिर्भ्राम। कर्मान्वयिनः कृञो भावप्रत्ययपरोर्लभ्यात्। अन्यभावप्रत्ययांतगम्यपर्वप्रा १३९

सकर्मकत्वस्यासंभवेन गमनं गम्यते वा ग्रामं मितिप्रयोगापत्तेः॥ अविवक्षितकर्मकेकृदापि कर्मान्वयस्य विवक्षितकर्मकेभाव
प्रत्ययस्य चानुपपत्तेरेव व्युत्पत्त्युपपत्तेः। कर्मप्रत्ययांत कृतशब्दस्य वृत्त्यभ्युपगमे तु कर्मणि षष्ठीप्रसक्तेर्द्वितीयास्वरूपेण रूपसंभवए
वावनंते। किंच कृञोऽर्थे कर्मान्वयोपगमे कृतीत्यत्र तेन नद्वारणं। निष्ठापर्युदासानुसारेण कशरषष्ठ्यस्ते तु किं कृतीत्युपादानेन। यद
पिकारकाणां सर्वप्रत्ययार्थभावनायामेवान्वयान तु धात्वर्थे गुणानां च परार्थत्वादसंबंधः सुमत्वात्स्यादिति न्यायात्। कर्मभा
वप्रत्ययावव्ययकृतश्च भावनामभिरपत्यन्यथाकारकान्वयानुपपत्तेः। कर्मकृतांतु शब्दे वा भावनायां कारककर्मकर्तृत्वा तृप्मा
वोपकृत्यमिति। ग्रामं गतवानित्यर्थे त्वादौ भावनायां कर्तृत्वस्येव कृतपूर्वः कटमित्यादौ कर्तृकृतस्थितोपात्तभाव
नायां कारककर्मकत्वस्यान्वयः। कृदर्थभावनाकर्मणो निष्ठयाभिधानेपि तत्स्थितार्थकर्मणो द्वितीयानुपपत्तिः। तथान कृदुपा
त्तायां भावनायाः कर्मण्येव षष्ठितनस्थितोपात्तायाइत्याविदेमि तुंडू। तीतिसूत्रे निर्दिष्टमिति। यदाह हरिः। ननः क्रियाभावनाक
श्रयोगो भवति कर्मणां अविभ्रमहाद्भावस्थायस्थाग्रामादिकर्मभिः। क्रियापंचधातुनत्तद्व्रत्कृतपूर्व्यादिषु स्थिता॥ क्रियाभाव

१०४।०१० नाकर्त्रोर्योगः कर्त्रैकदेशेक्रियायामन्वयः।यद्विग्रहाजप्रधानमितितन्निरर्थइतिमहेरुक्तं।तच्चिंत्यं।भावकत्वाभावानाबोधकत्वस्य।
१४० नुभवविरुद्धत्वात्।भवतुनदोदनस्यपाकइत्यादौशेषषष्ठ्येव।कृद्योगषष्ठीतुकर्तृकर्मणोःकृतीत्येवोपपत्स्यतइतिचेन्न।उभयप्रा
प्तौकर्मणीत्यस्यनिर्विषयत्वापत्तेः।ननुकरणादिकृतविषयः।वस्तुतोगुणानांचेतिन्यायेनभावनायांकारकत्वेनान्वितोधात्वर्थ
कारकाद्वन्वयोपिनिर्णीयते।नतुप्रत्ययेनप्रधानत्वमुपस्थापितेनतस्मिन्नितिचेत्तथापिकृतएवेत्थंकटमित्यादौकृतपदार्थभा
त्त्यनन्वितार्थभावनायामनन्वयेअसामर्थ्यमन्वयेतुतेनैवाकांक्षाविशिष्टेनघटादेःकर्मत्वेनतत्रान्वयःसंभवति।अन्यथाधात्व
र्थेतन्निष्ठकर्मकयत्नस्यार्थभावनायामपिकर्मान्वयप्रसंगात्।अथप्रकृत्यादिपदार्थपरित्यागेनकृतपूर्वीत्यस्यपाककालीन
भावनाश्रयत्वरूपकृतपूर्वीत्सूपानधितपूर्वीविशेदानिसादेःपर्यायतापसंगः।पक्वादिपदसमभिव्याहृतेनतत्रक्तिनेनपाकादिमा
नेवप्रतिपाद्यतइतितत्रक्तान्तानांपर्यायत्वमितिचेत्।एवंसतिविग्रहावस्थायांसमासावस्थायांचाविवक्षितस्यापितस्य राम
धर्मस्यकर्त्रंशस्यक्तिनोसत्त्वोसत्त्वयोरविवक्षायां।केवलंनिरर्थकत्वंयुज्यतेनतुधातोरर्तोधातोरर्थेधात्वर्थोपहितत्वक्ति १४०

तार्थभावनायांकर्मान्वयःसंभवती।निकिंतुक्तिनानांपाकादिभावनावाचकत्वमानान्तर्थेनयाभ्युपगमेनेतिचेदुक्तेन्यत्वेन।
क्रिमोक्तायांभावनायामिति।क्तांतोनिरर्थकः।सत्त्वेकृतीत्युपादानसामर्थ्याद्वसीयते।पक्वपूर्वइत्यपानिइत्यादौपाकाद्यनुकू
लभावनायामितिप्रत्ययस्यैवार्थोनतुपाककर्म।पाकोवाक्तांतानाप्रत्यादिपदजन्यपाकाद्युपस्थितेपाकाद्यनुकूलभावनावति
तत्क्तिनशक्तिग्राहकत्वनयेवोपयोगात्।नक्तिनांनजन्यवाक्यार्थबोधेसाक्षादजनकत्वादिदमादिपदजन्यबोधप्रत्यक्षोप
स्थितिनिवृत्तस्यपरिच्छेदनत्रपच्यर्थेकारकान्वयःस्यादुदानस्यपचेःकृदन्ततेनषष्ठ्येवप्रवर्तते।नित्यापर्युदासेनषष्ठीवारणंतुकृती
त्युपादानमनर्थकमापद्येतेतितदुपादानसामर्थ्यमेवपक्वपूर्वइत्यादौपूर्वपदोपादानमर्थापयतीतिदिक्।कृद्योगषष्ठीविधि
रनित्योभ्यामैरामोरसुतममितिभाष्येप्रयोगात्।नदहमितिनिर्देशात् कर्मण्येवाजभ्यासात्तनीयाकर्तरीदर्शनीयमवस्थाप्यकी
तेनद्धक्तिनवषष्ठ्यपिकर्तरि।आचार्ययोगवादोहोगोपेनेत्यादौकर्तरितनीयावत्षष्ठ्यपिप्रमाणं।शब्दानामनुशासनमभ्यापस्येति
दर्शनात्।यत्तुनेरकृभतयदइत्याकारश्चभावश्चानिरूपिताप्रत्ययांजस्तत्रकर्तृकर्मणोरुभयोषष्ठ्येवसाधुः।भेदिकावरुञ्जस्य

१० वा०र० जगतोविभीत्सावेत्यत्ररुद्रकर्तृकोजगत्कर्मकोभेदोभेदाभिलाषश्चवाक्यार्थः। काशिकायांतुस्फटासीत्युपयोवा
१४१ धनेत्यकारस्यस्त्रीप्रत्ययांतस्ययोगेत्तनीयाप्रयोगोनकर्तरिकिंतुकरणेउकारांतलडादेशाःउकाव्ययखलर्थकाः
षष्ठीविधौपर्युदस्ताकृत्कतृषात्तनोनथा।हरिदिदृक्षुरलंकरिष्णुरित्यादावुकाराः तोः।स्तृष्टिंकुर्वेनकुर्वाणइत्यादौ
लादेशाः।शत्रून्घातकइत्यादावुकः।पाकंकृत्वापाकंवतुमित्यादावव्ययं।ईषत्करोदुष्करोवाप्रपासोलाकेनेत्या
दौक्तक्तवतूखरूपानिष्ठा।वेदमधीयन्सोमंपवमानः।आत्मानंखंडयानः।कर्तालोकानित्यादौशतृशानच्चन
शतृनः।प्रत्ययाःतृन्प्रत्याहारशान्याः।एतेषामन्योन्याभावोषष्ठीप्रयोजकधर्मविशेषणतयोपतिष्ठते।लक्ष्म्याः
कामुकइत्यादौकमितिप्रकृतिकस्योकस्यानिषेधः।मुरमुरस्यद्विषन्इत्यादिद्विषस्थशतृप्रकृतिकस्यशतुर्विभाषाषष्ठी
निमित्ताप्रवृत्तिप्रसक्तेइक्ष्वाकूणामपरेपर्थेतदधीनाहिसिस्क्षयः। इत्यत्रेक्ष्वाकूणांसिस्क्षयइति। अपिवागपि राम
परस्यदुर्वेवनंनक्षीरदधीन विस्मयमित्यत्रवागभिपस्यविस्मयमितियोजना।।तेनेक्ष्वाकुभिर्दुरपि।वा १४१

यपिपेनदुर्वचनमित्यादिनाप्रयोगापादानंसमाहितं।भविष्यत्वाधमर्ण्येचनेनः षष्ठीनिमित्तता।भविष्यतिनवकस्यकृत्या
नांवातुकर्तरि।सज्जनंपालकोवनरिष्यतीयोसालनेपिभविष्यतावगमादकप्रत्ययस्यनषष्ठीनिमित्तत्वं।व्रजंगामीत्यत्रभविष्य
द्गमनकर्तरिशतंदायीत्यत्रशताधमर्णप्रयुक्तदानकर्तरिविवक्षितेनेनन्प्रत्ययस्यतथात्वं।कृत्यानांतव्यादीनांप्रत्ययानांमो
गाह्निकर्मकधातोरनभिहितकर्तरिगौणकर्मणिचयथाप्रथमंतनीयेद्वितीयानतुषष्ठी।गोविंदेनव्रजंनेतव्यागोवानतुगोविंदस्यव्र
जस्येति।गेयोमाणवकः सान्नामित्यादौकर्तरिकृत्प्रत्ययकर्मणिषष्ठ्येव।मयाममवासेव्यो।हरिरित्यत्रकर्तरिषष्ठीतनी
यत्प्रमाणं।लिट्कार्यकारिणोःषष्ठीकिकिनोःप्रतिषिध्यते।प्रतिप्रसक्त्यनेनासुन्कुसुनोस्तनिमित्तता।आदृगन्हन्
जनः।किकिनोलिट्वेत्यनुशासनेनादेनाद्गमिहन्जिजनान्यश्चलिडर्थेकिकिनोविधीयेते।तत्रापिछ्दिषश्चनिषेधः।वज्रस्यप
रोक्षातीतभरणकर्तर्यर्थेवज्रंबभ्रिरिति।तथाजलंपपिर्देवैरपिग्रामंजग्मिः।शत्रुंजघ्निरित्यादिप्रयोगाः।वत्सानपाकर्तुमित्य
र्थेपुरावत्सानामपाकर्तोरित्यर्थेवज्रंबभ्रिरिति त्रसुन।कूरान्विसर्पितुमित्यर्थेपुराकूरस्यविसृपइत्यकसन्।एवमव्यया

प०वा०र० वपित्तोरुत्कसूनौषध्यपवादकाविनिनयो: सूत्रेन प्रसक्तायाअव्ययत्वेनषष्ठ्या: प्रतिप्रसवोयं॥ शब्दैस्तुल्योपमाभिन्नैर्योगेसादृश्यवा
१४२ चिभिः। प्रतियोगिनिषष्ठीचतृतीयाचानुशिष्यते। सादृश्यवाचिभिस्तुल्यसदृशादिशब्दैर्योगेचंद्रेणचंद्रस्यवासदृशइत्यादौतृती
याषष्ठीचप्रतियोगित्वमभिधत्ते। चंद्रस्यतुल्यंचंद्रस्योपमेत्यत्रतुषष्ठ्येवप्रमाणंनतृतीया। तुलांयदारोहतिदंतवाससेत्य
त्रस्फुटोपमंभूतिसितेनशंभुनेत्यत्रचसहार्थेतृतीया। समंचमर्त्यैर्वतुल्यापितृणाइतिवत्। चंद्रइवमुखमित्यादाविवादि
शब्दयोगेनतृतीयाषष्ठीवा। तुल्यार्थैरतुलोपमाभ्यांतृतीयान्यतरस्यामितिसूत्रेबहुवचनेनवत्तुल्यप्रभृतिलाभेप्य
र्थग्रहणसामर्थ्येनयथेवादिशब्दपर्युदाससिद्धेः। वस्तुतोन्योन्याभावार्थकस्यनञ प्रतियोगित्वविशेषादावर्थेपंच
मीषष्ठ्यादिरिवेवादिरेवनिपातानामपिविभक्तिविर्व्यपेक्ष्यत्वस्याभाव्यात्। यत्तुनिपातानांसर्वत्रदर्शनान्विनाभिधानमे
वन्याय्यं। नञः प्रतियोगित्वसांसर्गिकविषयतानिरूपितान्योन्याभावादिविषयकबुद्धाविवसप्रतियोगित्वसांसर्गिकविषयतानि
रूपितसादृश्याविषयताविशिष्टबुद्धौस्योसकेनस्यप्रयुक्तत्वात्। अतएवचंद्रेवत्सुवादिपदानांतरेणमुखादिपदेनतुल्यंमुखमित्यादावि राम
वसादृश्यविशिष्टंमुखंनप्रत्याप्यते। निम्र प्रतियोग्यनुयोगिकसादृश्यद्वादीनामसामर्थ्यात्। अतएवेवादि १४२

तस्तत्रकर्तृकर्मणोरुभयोःषष्ठ्येवसाधुः। भेदिकावरुद्रज्ञस्यजगतोविभीत्याविस्यत्ररुद्रकर्तृकोज्जगत्कर्मकोभेदोभेदाभि
लाषश्चवाक्यार्थः। काशिकायांतुस्कदासीस्क्त्रोवाधनेव्यापारस्यस्त्रीप्रत्ययान्तस्ययोगेतृतीयाप्रयोगोनकर्त्तरिकिं
तुकरणेउकारान्तलङादेशाउकाव्ययखलर्थकाःषष्ठीव्युदोपर्युदस्ताःकृस्कतिष्ठात्नौतथा। हरिंदिदृक्षुरलंकरिष्णुरि
त्यादावुकारान्तः। सृष्टिंकुर्वन्नकुर्वाणइत्यादौलादेशाः। शत्रुन्घातकइत्यादौवुकः। पाकंकृत्वापाकंकर्तुमित्यादावव्यया
ईषत्करोदुष्करोवाप्रवासोलोकेत्यानेदौखलर्थाः। ग्रामंगतोघटंकृतवानित्यादौक्तक्तवतूस्वरूपातिष्ठावेदमधीयंसोमाप
वमानः। आत्मानंखंडयानः। कर्तालोकानित्यादौरात्शानच्कनशातनःप्रत्ययास्तन्प्रत्याहारवाच्याः। एतेषामन्योन्या
भावःषष्ठीप्रयोजककृद्विशेषणतयोपतिष्ठतेलक्ष्माः। कामुकइत्यादौकमिप्रकृतिकस्योकस्यनित्यमुरुंमुरस्यद्विषमित्या
द्विषत्प्रकृतिकस्यशतुर्विभाषाषष्ठीनिमित्ताप्रतिप्रतिसूयते। इक्ष्वाकूणांदुरापेर्थेत्वदधीनादिसिद्ध्यइत्यत्रइक्ष्वाकू
णांसिद्धइति। अपिवामधिपस्यदुर्वचंधकवचनंतद्विदधीतविस्मयमित्यत्रवागधिपदस्यविस्मयमितियोजना। तेने

प॰ ३।३।२॰ कुभिंदुरापे। वागधिपेन दुर्वचनमित्यादिप्रयोगापादने समाहिते। भविष्यत्याधमर्ण्येचनेनः षष्ठीनिमित्तता। भविष्यतिन
१४३ वाकेस्यकृत्यानां वा तु कर्त्तरी। संजनं पालकोवत्तरिष्यतिरुत्स्यर्थापालने विभविष्यत्वावगमादकप्रत्ययस्य न षष्ठीनिमित्तत्वं।
व्रजंगामित्यत्र भविष्यद्व्रजगमनकर्त्तरिज्ञानं वापीत्यत्र ज्ञानाधमर्ण्यप्रयुक्तदानकर्त्तरि विवक्षिते नेनप्रत्ययस्य तथात्वं। कृत्या
नां तव्यादीनां प्रत्ययानां योगे द्विकर्मकधातोरनभिहितकर्तरि गौवणकर्मणि च यथायथं। द्वितीयेन तु षष्ठी। गोविंदेन व्रजं ने
तव्या। गावो न तु गोविंदस्य व्रजनेष्यति। ज्ञेयो माणवकः साम्नामित्यादौ कर्तरि कृत्ययेकर्मणि षष्ठेवा। मयाममव्यसेव्यो हरिरिति
अत्र कर्त्तरि षष्ठी तृतीयाच प्रमाणं। लिङ्कारिणाः षष्ठी किं किनोप्रतिषिध्यते। प्रतिप्रसूयते तो सुन्कसुनोस्तन्निमित्तता।
आहृगन्नहृनजनाः किं किनौ विधीयते तत्रापि षष्ठीनिषेधः। वज्ञस्य परोक्षातीनभरणाकर्ते त्यर्थेव ज्ञेबधिरिति तथा ज्ञलं
पपिर्दं दधिग्रामं जगमिः। ज्ञार्त्रुं जग्निरित्यादिप्रयोगाः। घस्सानपाकर्त्तमित्यर्थे पुरावस्सानामुपाकर्तोरित्यत्र तोसुनु। क्रूरान्विस
र्पितुमित्यर्थे पराक्रूरस्य विस्रपइत्यकसुन्। एवमव्ययावपि तोसुन्कसुनौ षष्ठ्यपवादकाविति तयोरुत्वेन प्रसक्तायाय्य राम १४३

यत्वेन षष्ठ्याः प्रतिप्रसवोऽयं ॥ ॥शब्दैस्तुलोपमाभिन्नैर्योगे सादृश्यवाचिभिः। प्रतियोगिनि षष्ठी च तृतीया वानुशिष्यते। साद
श्यवाचिभिस्तुल्यसदृशादिशब्दयोगे चंद्रेण चंद्रस्य वा सदृशादृश्यादौ तृतीया षष्ठी च प्रतियोगित्वमभिधत्ते। चंद्रस्य तुला चं
द्रस्योपमेत्यत्र तु षष्ठ्येव प्रमाणं न तृतीया तुलापक्षोहतीदंतवाससेत्यत्र स्फुटोपमं भूतिस्फुटेन शंभुनेत्यत्र च सहार्थे तृतीया।
समं च मर्यैव तुलाबिनइतिवत्। चंद्र इव मुखमित्यादाविवशब्दयोगे न तृतीया षष्ठी वा तुल्यार्थैरतुलोपमाभ्यां तृतीया
न्यतरस्यामिति सूत्रे बहुवचनेनेद तुल्यप्रभृतिलाभे पर्यग्रहणसामर्थ्येनयथेवादिशब्दपर्युदाससिद्धेः। वस्तुतोऽन्योन्या
भावार्थकस्य नञः प्रतियोगित्वाविशेषादावर्थे पंचमीषष्ठ्यादिशिववादितिपातानामपि विभक्तिनिर्पेक्षत्वं स्वाभाव्यात्।य
वेत्र नुनिपातानां संसर्गदर्शनेन अन्विताभिधानमेवन्याय्यं न नञः प्रतियोगित्वसांसर्गिकस्य विषयितानिरूपितान्योन्याभावा
दिविषयकबुद्धाविव स्वप्रतियोगित्वसांसर्गिकविषयतानिरूपितसादृश्यविषयताविशिष्टबुधोसंकेतस्य युक्तत्वात्। अत
एवकेवलेवादिपदानंतरेण मुखादिपदेन तुल्यमुखमित्यादाविव सादृश्यविशिष्टमुखन प्रत्याय्यते। निष्प्रतियोग्यनु

यौगिकसादृश्यइवादीनासामर्थ्यात्। अतएवेवादिपदेनप्रतियोगित्वानुयोगित्वस्वरूपम्यनत्वोपमानत्वयोः स्मृतिमात्रेणा
वगनादिवादिशब्दयोगेश्रौतिमुपमामुदाहरंत्यालंकारिकाः। प्रतियोगित्वादिसंसर्गसादृश्यानुभवंप्रतिवादिपदसामर्थ्या
वधारणापिसादृश्यत्वमात्रेणस्मरणंनानुपपन्नं। एवंचचंद्रइवचंद्रोनेत्यादौसंसर्गतयात्वभ्यैर्थेनपष्ट्यादि। उक्तार्थानामप्रयो
गात्। पक्त्वाभुंक्तइत्यादौभावेक्त्वाप्रत्ययेनसंसर्गीभूतसमानकर्तृकत्वलाभात्चैत्रेणपक्त्वाचैत्रोभुंक्तइत्यादपानप्रयोगाइति।
तद्विल्यं॥ समानकर्तृकत्वसांसर्गिकविषयतानिरूपितधातुप्रयोज्यविषयताविशिष्टानुभवेक्त्वासंकेतोपगमेचैत्रःपक्त्वा
चैत्रेणभुज्यतइतिप्रयोगापत्तेः। अन्यलभ्येसंसर्गेघटानचंद्रोइवेत्यादौप्रातिपदिकार्थमात्रेप्रथमापत्तेरितिदिक्। आयुष्यम
द्रकुशलसुखप्रभृतिभिर्हितः॥ योगेषष्ठीचतुर्थ्यौवातत्राशिष्यनुशिष्यते। आयुष्यंचिरंजीवितः। मंद्रमभंगलंनिवृतिःकुश
लमनामयंसुखंशं। एतदर्थैर्हितशब्देनचयोगे। तस्मैतस्यवा॰ आयुष्यंभूयादित्यादावाशीरर्थकत्वकारयोगेषष्ठीचतुर्थ्यौच राम
साधुः। इतिषष्ठीविवरणं॥ ॥उयोसप॰सप्तमे। तत्रानुबंधो ङिसुयोउ॰यो॥ अथाधिकरणं॥ ॥सप्तम्यर्थोधात्वर्थसंग १४५

तः अधिकरणमधिकरणत्वंआधेयत्वंवासप्तम्यर्थः॥ तत्राधेयत्वंस्थाल्यामोदनंपचतीत्यादौकर्मघटितसामानाधिकर
ण्येनफलेगेहेचैत्रःपचतीत्यादौकर्तृघटितसामानाधिकरण्येनव्यापारेन्वेति। यस्मिन्नग्नौपचेदन्नंतत्रहोमेविधीयतइत्या
दावग्निपदमग्न्यधिष्ठितस्थालीपरंतदाधेयत्वंसामानाधिकरण्येनपक्त्यर्थफलेन्वेतिभवतुव्यापारपरत्याख्याधेयत्वमपिसप्त
म्यर्थः। अतएवतच्छब्देनवह्नेःपरामर्शोपिसंघटते। मिथिलायांराजापाटलिपुत्रेब्राह्मणेभ्योददातीत्यादौसप्तम्यर्थोन्यसं
प्रदानघटितसामानाधिकरण्येनधात्वर्थेन्वेति। किंतुसाक्षादेवब्राह्मणेषुएवंगिरौवृक्षात्पर्णपततीत्यादौसप्तम्यर्थोवृक्षेन्वेति।
नत्वपादानघटितपरंपरयाकथंनयदाहुःकर्तृकर्मव्यवहितानसाक्षाद्धान्वयात्। क्रियोउपकुर्वंतुक्रियासिद्धौशास्त्रेणधिकरणं
स्मृतमितिदैशिककालिकीन्यतरसंसर्गावच्छिन्नमधिकरणत्वमाधेयत्वंवासप्तम्यर्थः। तादृशंचक्रियाधिकरणत्वं। कर्तृकर्माधि
करणएवस्त्रीक्रियते। नान्यत्रेत्यपिवदंति। अत्रचक्वचिदाख्यातोपस्थितकालावच्छिन्नमप्याधिकरणत्वंतथायथाभाविनीचै
त्राधिकरणतामभिसंधाययामेगच्छतीतिप्रयुंजते। आतपेतिष्ठतीत्यादावातपपदंतत्संयुक्तप्रदेशपरमितिसंक्षेपः। सप्तमित्या

प॰वा॰र॰ हतचेत्याद्विषयार्थकधातुभिः वैज्ञानिकाधिकरणतदा निर्देक्ति सप्तमी। सविषयार्थकधातुसंकल्पितासप्तमी विशेष्यता
१४५ निरूपितप्रकारतास्वरूपांवैज्ञानिकीमाधेयताभमिधत्ते। शुक्तौरजतत्वंज्ञानातीत्यत्रविषयारोशुक्तिविशेष्यतानिरूपितप्रका
रतादिरजतत्वात्मककर्मघटितपरंपरयाज्ञानाद्यावन्वेति। दूरांतिकाद्वैर्भ्यश्चादाधारेसप्तमीविधिः। विमतत्वंतरवाबाधेप्रतिप्र
सवतांगतः। सप्तम्यधिकरणेचेति। सूत्रेचकारेणदूरांतिकार्थकशब्दादधिकरणेसप्तमीविधिर्यद्यपिनाप्राप्तप्रापकस्त
थापिदूरांतिकार्थेभ्योद्वितीयाचेतिसूत्रेणप्राप्ताभिर्द्वितीयातृतीयापंचमीभिः सप्तम्याबाधप्रसक्तौप्रतिप्रसवविकल्पोयं।
तथाचग्रामाद्दूरेवावनमितिसर्वेप्रयोगाःसाधवः। सप्तमीस्यात्कर्मणिपष्ठ्यादिपदानिः। अन्येतुनित्यावामेवात्रसप्तमी
मान्वचक्षते। इत्यादिगणाद्युत्पन्नस्यकर्तरि। तिप्रत्ययस्ययोगेकर्मणिसप्तमीनित्यमन्यतरस्यावातुशिष्यते। तेनाधीतिवेद्य
न्वेदंवेत्यादौवेदकर्मकाध्ययनकर्तेतिबोधः। अत्रमुख्येकर्मण्येवसप्तमी। नतुगौणे। तेनमासमधीतीत्यादयः॥ इतिकारकसप्त
मीविवरणं। निमित्तकर्मयोगेतुयासप्तम्यनुशिष्यते। चतुर्थ्याद्यवताद्दर्थ्यमथोस्यादितिशाब्दिकाः। चर्मणिद्वीपिनंहंतीभिदंतयो रा॰मु
र्हंतिकुंजरः। केशेषुचमरींहंतिसीम्निपुष्कलकोहतइत्यादौसप्तमीचतुर्थ्यवताद्दर्थ्यमथवातृतीयावन्निमित्तत्वमभिधत्ते। १४५

चर्मार्थंद्वीपीहननमित्यादिवाक्यार्थः। शीमांडकोशाःपुष्कलकोगंधमृगः। सीमाघटाख्येतिक्षेत्रेषंडकोशेषुचस्त्रियामिति।
अथपुष्कलकोगंधमृगमाक्षेपणकीलयोरितिमेदिनीकरः। सीमाघाटस्तज्ज्ञानार्थपुष्कलकःशंकुर्हन्तोनिघातइत्यर्थइतिहर
रिकाः। कर्मक्रियातद्योगताद्दर्थ्यंसप्तम्याभिधत्तइतिसूत्रार्थः। अतएवाविद्यारज्जनीक्षपंपयद्युदतीत्यादौनिमित्तसप्तम्यु
दत्तः। अत्रकर्मणासंयोगः। समवायोवानिमित्तस्वरूपमन्येवसप्तमी। साधुतायांप्रयोजकोनतुशाब्दबोधविषयइतिशा
पपद्यतइत्यपरे। यत्कर्मकर्तृकोभावः परतंत्रतयास्थितः। लक्ष्यकोन्यस्यभावस्यतनोस्तवतिसप्तमी। गोषुदुह्यमाणास्वग
च्छतीत्यादौगवादिकर्मकंदोहनं। गोध्यायानीषुगतइत्यादौगवादिकर्तृकमागमनादिप्रधानभूतांगमनादिक्रियामुपलक्षयति।
कर्मकर्तृपारतंत्र्येणभासमानक्रियासमानकालीनत्वादिसंसर्गेणविशेषणतामापद्यते। क्रियांतरेसप्तमीतुसाधुतामात्रा
र्थत्येकेवर्णयंतीतिसंक्षेपः॥ ॥इतिश्रीमहामहोपाध्यायश्रीगोकुलनाथशर्मप्रणीतपदवाक्यरत्नाकरेसप्तमीविवरणं॥ ॥
स्वस्तिश्रीमन्नृपशालिवाहनशके १७२५ प्रमादीनामसंवत्सरेदक्षिणायनेग्रीष्मर्तौभाद्रपदेमासेकृष्णपक्षेद्वादश्यांभौमवासरेपदवा
क्यरत्नाकरस्येदंपुस्तकंसमाप्तं। जउपाहृत्युपाभिधनारवेकरबाळकृष्णसूरिसूनुघनःशामभट्टस्येदं॥

प.बा.र.
१५६

राम
१५८